श्रीहरिः

॥ श्रीवल्लभो विजयतेतराम् ॥

श्रीवल्लभस्वरूपदर्शन

श्रीमदखण्डभूमण्डलाचार्यवर्य श्रीकृष्णवदनविरहवैश्वानरावतार-

श्रीश्रीमद्वल्लभाचार्यस्य

द्वितीयकुमार श्रीमद् विठ्ठलेशप्रभूचरण-प्रगटितं

श्रीसर्वोत्तमस्तोत्रम्

श्रीमदग्निकुमारात्मज श्रीगोकुलेश-(श्रीवल्लभ) प्रणीत
स्वतंत्रलेखनाख्यात बृहद्विवृत्तिसहितम्

(आनंद इतियारभ्य पतिवृत्तपतिः पर्यन्तम्)
१ ६५ नामानि

दर्भावति (डभोइ) नगरस्थ :
श्रीवल्लभीय वैष्णवमण्डलस्य द्रव्यसहायेन


दर्भावति नगरस्थदरू उपनामक हिंमतलालात्मज
श्रीवल्लभदासानुदास कंचनलालेन
'प्रताप विजय प्रिन्टींग प्रेस'
मुद्रणालये मुद्रयित्वा प्रकटीकृता।

श्रीवल्लभाब्याः ४९०] [संवत् २०२४

अमूल्यम्

॥ શ્રી વલ્લભ: ॥

અ. સૌ. નિર્મલાબહેન રમણલાલ વકીલ



જન્મ-સંવત ૧૯૭૯ના
કારતક વદ ૨

ગોલોકવાસ-સંવત ૨૦૨૪ના
અષાડ વદ ૧૪ ને સોમવાર

સદગતના પૂણ્ય સ્મરણાર્થે સપ્રેમ ભેટ

લી. દાસાનુંદાસ,
રમણલાલ વકીલના જયશ્રીકૃષ્ણ

॥ શ્રીવલ્લભઃ ॥

નમ્ર નિવેદન

શ્રી વલ્લભાધિશકે રૂપરસ સિંધુમેં
પ્રગટ બહુ સ્વાદ પેં સ્વાદ ન્યારે ।
યહાં લોં જાત કો વિના પૂરન કૃપા
બિચહી ભર લિયે પાત્ર સારે ॥

શ્રી સર્વોત્તમ સ્તોત્ર એક મહા અલૌકિક કલ્પવૃક્ષ છે. સર્વ ભગવદીયના સર્વ મનોરથ સિદ્ધ કરવાનું સામર્થ્ય ધરાવતા સર્વશ્રેષ્ટ મહા સ્તોત્ર વડે જ અજ્ઞાન–અંધકાર ભરેલા કલીકાલમાં પ્રેમની પરાકાષ્ઠાએ વશ થતા શ્રીઠાકુરજીને ફકત શ્રદ્ધા વિશુદ્ધ બુદ્ધિ વડે તદેકમના નામ મંત્રજપથી પ્રેમ પરવશ બનાવાય છે. શ્રીસર્વોત્તમજીમાં શ્રીમહાપ્રભુજીના રાસસ્ત્રીભાવ–પુરિત–વિગ્રહ, સદાનંદ, રસાનંદ, ભજનાનંદ સ્વરૂપનું વર્ણન અતિ ગોપ્ય–રહસ્યમય રીતે આલેખાયું છે. નિત્યસિદ્ધ સાકાર સ્વરૂપે બિરાજતા દરેક નામ મંત્રમાં અપૂર્વ અલૌકિક રહસ્ય છુપાયેલું છે.

કૃષ્ણનામક પરમ કાષ્ઠાપન્ન વસ્તુ સૌંદર્યે જગદ્ ઉદ્ધારાર્થ શ્રીકૃષ્ણ સ્વરૂપે પ્રગટ થઇને, જે લીલા સારસ્વત કલ્પમાં કરી તે લીલાનું ગ્રથન શ્રીભાગવત સ્વરૂપે શ્રીવ્યાસજીના નામે કરાવ્યું. રસેશ પ્રભુનો આ આશય સફળ કરવાને શ્રીમદ્ વલ્લભાગ્નિએ પ્રગટ થઇને શ્રીભાગવતના ચાર અર્થ નિબંધમાં અને ત્રણ અર્થ શ્રી સુબોધિનીજીમાં પ્રગટ કરી વાણી દ્વારા જીવનો સમુદ્ધાર માર્ગ પ્રગટ કરી તન, ધન અને મન એકાદશે ઇન્દ્રીયોને એના ધર્મો સહિત સંસારના કાર્યમાં ન યોજતા સદા સર્વદા ભક્તોના હૃદયમાં બિરાજમાન સ્વાચાર્યના ભાવથી ભાવિત કૃપાપારાવાર રસેશ શ્રીકૃષ્ણ વિરહાગ્નિ સ્વરૂપમાં નિયોજવા નિરોધ માર્ગ પ્રગટ કર્યો. જે માર્ગ મન વાણીથી અગોચર છે. અગમ્ય છે પરંતુ જ્યાં અનુભવિત એવો અખંડ રાસ ચાલે છે. વ્રજરત્ના, ગોપાંગનાના વિરહાગ્નિભાવના સમૂહરૂપ વનમાં કોઇથી જઇ શકાતું નથી. સુખના અવધિરૂપ આ નિધિ છે કે જ્યાં ચરણ વિના, અંગવિના અને માર્ગવિના ચાલવું પડે છે. આ માર્ગ સાધન સંપન્નોને પ્રાપ્ત નથી. શ્રીમહાપ્રભુના ચરણરજના, બળની પ્રાપ્તિ વિના સર્વ અશકય છે, સર્વથા અસંભવિત છે. તેમની કૃપાથીજ સર્વ સુલભ છે.

उत्पन्नेन हि परमः पुरुषार्थः साधनीयः । स च भगवदीय भावः । तथा यत्नः कर्तव्यो यथा स भवति । ज्ञान दन्तवान्तर फलरुपं । मोक्षादपि स्वभावत एवायं भावोऽधिकः (सु. १०-३६-२७)

અર્થાત્ દરેક જન્મેલ મનુષ્યે પોતાના જીવનમાં પરમ પુરૂષાર્થ મેળવવો જોઇએ આ પરમ પુરૂષાર્થ કયો ? તે ભગવદીય ભાવ. જે રીતે તે ભાવ પ્રાપ્ત થાય તેમ કરવું જોઇએ. જ્ઞાન વિગેરે તેના અવાન્તર ફળો છે. આ ભગવદીય ભાવ એજ પરમ પુરૂષાર્થ છે; એજ જીવનનું ધ્યેય. તેની પ્રાપ્તિમાંજ જીવનની સિદ્ધિ. તે મોક્ષ કરતાં પણ અધિક છે.

એકાદશ ઈન્દ્રીયોના નિરોધ પૂર્વક બાહ્ય જીવનને આન્તર જીવન સાથે એક રૂપ કર્યા સિવાય ફળ પ્રાપ્તિ કરી શકાતી નથી અને જન્મ મૃત્યુ વિગ્રહનો અંત આવતો નથી. નિરૂદ્ધ થયેલી ઇન્દ્રીયોજ આત્મગામી થાય, તેમાં પણ ભવગદ્ અર્થે ઉપયુકત થાય ત્યારે જ આત્મગામી થાય; ભગવદ્ ભાવ પ્રાપ્ત કરી શકે અને ભગવદ્ કૃપાથી ભગવદ્ રસાસ્વાદ અનુભવે, અન્યથા નહિ. તેથી યોગાદિ માર્ગદ્વારા નિરોધ કર્તાની અપેક્ષાએ જે ઈન્દ્રીયો ભગવદ્ સેવામાં યોજાય તેજ, આત્માનું કુશલ કરવાવાળી છે. ભગવદ્ ધર્મ, ભગવદ્ કથા, ભગવદ્ સેવા, ભગવદ્ ગુણાનુવાદ અને ભગવદ્ લીલાનુભૂતિ ભગવદ્ અનુગ્રહ દ્વારાજ સુલભ અને સુભગ બને છે. રસાલ પ્રમેયાત્મક ભકિતના અભાવમાં ભગવદ્ સ્વરૂપાનંદ, ભજનાનંદ સર્વથા અનુભવિશકાતો નથી. તદ્ અર્થે સ્વરૂપાત્મિકા સ્વતંત્ર ભકિતમાં આવતા સર્વ પ્રકારના અતરાયો દૂર કરવા અને કૃષ્ણાધરામૃત આસ્વાદ સિધ્યર્થેજ શ્રી સર્વોત્તમસ્તોત્ર એકમાત્ર અમોઘ ફળરૂપ સાધન છે. કલ્પવૃક્ષ છે. વાણીના અધિપતિ રસેશ શ્રીકૃષ્ણના મુખારવિન્દરૂપ શ્રીવલ્લભાગ્નિમાં જે દૈવીજીવોની આસકિત છે તેવા તદીય જનો માટે આ ગ્રંથરત્ન એક અમૂલ્ય ભેટ છે.

મૂળ વૈશ્વાનર વલ્લભાગ્નિ રસરૂપ કોટીકંદર્પ લાવણ્ય સ્વંરૂપમાંથી વિપ્રયોગાત્મક સ્વરૂપે પ્રગટ થઈ વિપ્રયોગાત્મક ભકતજનો સાથે આન્તર રમણ કર્યું તેજ સ્થાયી ભાવાત્મક સ્વરૂપનું વિશદ વર્ણન યુગલ ભ્રમરગીતાદિમાં નિરૂપણ કરાયું છે. વિપ્રયોગાત્મક સ્વરૂપમાંથી સંયોગાત્મક સ્વરૂપે પ્રગટ થઈ ભકતો સાથે બાહ્ય વિહાર રમણ રાસાદિક લીલા વિગેરે કરી તેનુ નિરૂપણ રાસ પંચાધ્યાયિમાં કરવામાં આવેલ છે. આવા કોટિકંદર્પ લાવણ્યયુકત પરાત્પર સ્વરૂપનું દર્શન અને જ્ઞાન શ્રી વિઠ્ઠલેશ પ્રભુચરણે ભુતલના દૈવી જીવો ઉપર અનુકંપાયુકત થઇને શ્રી સૌંદર્યપદ્ય, શ્રી સર્વોત્તમજી, શ્રી વલ્લભાષ્ટક, શ્રી સ્ફુરતકૃષ્ણ પ્રેમામૃત દ્વારા કરાવ્યું છે. પુષ્ટિ લીલા કર્તા, અન્તર્યામીના પણ અન્તર્યામી, આનંદ પરમાનંદ રૂપ, દૈવોદ્ધાર પ્રયત્નાત્મા, મહોદાર ચરિત્રવાન શ્રી મહાપ્રભુજીના પરાત્પર સ્વરૂપનું જે જ્ઞાન શ્રી દામોદરદાસ હરસાણીજી, શ્રી કૃષ્ણદાસ મેઘન શ્રી પદ્મનાભદાસજી, પ્રભુદાસજી, દિનકરદાસજીને સ્પષ્ટ હતું તે જ્ઞાનથી શ્રી વિઠ્ઠલેશ પ્રભુચરણની ઉપરોકત કૃતિઓના અભાવમાં આપણે વંચીત રહેત.

વસ્તુતઃ શ્રી મહાપ્રભુજી શ્રી વેણુરવ નિષ્ટ સુધા છે શ્રી ગુસાંઇજી-શ્રી વિઠ્ઠલેશ પ્રભુચરણ શ્રી વેણુજી છે અને શ્રી ગોકુલેશ સુધા સંવલીત વેણુરવનું પુષ્ટ પુષ્ટ યશ છે.

સુધા ત્રિવિધા છે. (૧) દેવભોગ્યા, (૨) ભગવદ્ ભોગ્યા, (૩) સર્વા ભોગ્યા. લોભાત્મક અધરને વિશે સ્થાપન કરાયેલ છે કારણ યથાધિકાર પ્રવર્તન કરાવનાર છે. સુધાજ ભગવદિયત્વ સંપાદન કરી આપનાર છે, તેના સંબંધના અભાવમાં ભગવદિયત્વની સિદ્ધિનો અભાવ છે. સુધા બ્રહ્માનંદ કરતાં પણ અધિક છે અરે! આનંદ સ્વરૂપ ભગવાનની અંદર રહેલો સારમાં સાર છે. કોઈપણ કાળમાં એ સાધન રૂપ થતી નથી પરંતુ સદા ફળ રૂપેજ રહે છે. સુધા પુરૂષાકાર છે અને શુદ્ધ પુષ્ટ ભકિતમાર્ગમાં સપ્ત પ્રકારે એ વિલસે (૧) શ્રી ઠાકોરજી સ્વરૂપે (૨) શ્રી સ્વામીનીજી સ્વરૂપે (૩) શ્રી કૃષ્ણાસ્ય સ્વરૂપે (૪) ત્રિતયાત્મક સાક્ષી સ્વરૂપે (૫) વૈશ્વાનર વાક્પતિ સ્વરૂપે (૬) શ્રી વલ્લભ સ્વરૂપે અને (૭) દૈવોદ્ધાર પ્રયત્નાત્મક સ્વરૂપ તેનો જ સર્વત્ર વિલાસ છે. એની પ્રાપ્તિમાંજ સર્વ પ્રાપ્તિ એના અભાવમાં સર્વ પ્રાપ્ત થયું તો પણ કાંઈ પ્રાપ્ત ન કર્યું, એ શ્રી સર્વોત્તમની ફળશ્રુતિમાં સ્પષ્ટ નિરૂપણ કરવામાં આવ્યું છે. આવા ધર્મિ સ્વરૂપની સેવા તથા કથા સાધન રૂપ નથી પરંતુ ફળરૂપ છે રસરૂપ છે. સાધન અને ફળ ઉભય એક સ્વરૂપેજ છે. તે સ્વરૂપાત્મક છે. તેનો અનુભવ અનન્ય ભકતોને અદ્યાપિપણ થાય છે સ્વરૂપાત્મકરૂપે અનુભવાય તો જ ફલોન્મુખ થાય તે આધિદૈવિક છે નહિ તો તે સાધન રૂપા છે, આવા ભગવદ્ ભાવરૂપ ભવનને બતાવવાની અને મેળવવાની અમોઘ ચાવી આપશ્રીનો અનુભવ અને શ્રી સર્વોત્તમજી છે.

શ્રી વિઠ્ઠલેશપ્રભુચરણ દ્વારા નિરૂપાયેલ નિત્ય સિદ્ધ ૧૦૮ નામ મંત્રોમાં આપશ્રીના ચરિત્રોનું સર્વથા પ્રતિપાદન કરે છે. નામ મંત્રોમાં રહેલા ચરિત્રોનું વર્ગીકરણ મુખ્યત્વે ત્રણ પ્રકારે આધિભૌતિક, આધ્યાત્મિક અને આધિદૈવિક રીતે કરી શકાય આ ત્રિવિધ ચરિત્રોનું પ્રતિપાદન ધર્મ, અર્થ, કામ, મોક્ષ અને ભક્તિ એમ પાંચ પુરૂષાર્થ અને ઐશ્વર્ય, વિર્ય, યશ, શ્રી, જ્ઞાન અને વૈરાગ્ય એ રીતે ષડ્ધર્મ અને ષડ્ધર્મ યુક્ત સપ્તમ ધર્મિ ગણતાં ૧૦૫ નામ મંત્રો થાય છે. બીજાત્મક નામ મંત્રો આનંદ, પરમાનંદ અને શ્રીકૃષ્ણાસ્ય છે. જે એકેક બીજાત્મક નામ મંત્ર પાંત્રીશ પાંત્રીશ નામ મંત્રના બીજરૂપે છે. આ પ્રકારે ૧૦૮ નામ મંત્રો શ્રી સર્વોત્તમજીમાં નિરૂપાયા છે.

શ્રીપ્રભુ ચરણે આર્ષદૃષ્ટા–ઋષિ તરીકે આ મંત્રોનું ગાયત્રી મંત્ર માફક સ્વતઃ દર્શન અનેઅનુભૂતિ કરી છે. અને શ્રી ગોકુળનાથજીએ વિઠ્ઠલેશ્વરપ્રભુના અનુગ્રહ દ્વારા શ્રી વલ્લભાગ્નિના સ્વરૂપની જે રસાનુભૂતિ કરી તેનું પ્રગટ દર્શન એઓશ્રીએ બૃહદટીકામાં અને એઓશ્રીની સ્વમાર્ગિય અન્ય કૃતિઓમાં કરાવ્યું છે.

શુદ્ધ દૈવીજીવ હોય તેનેજ સહજ શ્રી મહાપ્રભુજીના સ્વરૂપમાં આસક્તિ થાય છે અને શ્રી વલ્લભમાંજ સર્વ લીલાસૃષ્ટિની અનુભૂતિ કરે છે. શ્રી દયારામભાઈએ સ્વાનુભવે ભાખ્યુ છે કે :–

શુદ્ધ દૈવી જો હોય સહજ મહાપ્રભુ રૂચિ આવે;
આસુરી લખે પ્રતાપ તદપિ તે શરણે ન આવે ।

卐 卐 卐

સહસ્ર નામ શ્રીકૃષ્ણ, એક શ્રી વલ્લભ કેરૂ;
શ્રી હરિ ઈચ્છા કહ્યું, સુકૃત દશ શતનું ઉહેરૂ ॥

卐 卐 卐

શ્રીજી મુખ, દગ સ્વામિની, નાસા શ્રી ગોસ્વામિ;
મુખમંડળ શ્રી મહાપ્રભુ, યુગ પદપદ્મ નમામિ ॥

શ્રીમદ્ વલ્લભાધિશના પ્રાગટ્ય કાળથી અદ્યાપિ પર્યંત નામી અનામી અનેક સ્વાનુગ્રહીત જીવોએ રાસસ્ત્રીભાવ પૂરિતવિગ્રહનો સ્વાનુભવ કર્યો છે. અને આપશ્રીએ ભક્તેચ્છા પૂરકઃ તરીકે સ્વસ્વરૂપની પ્રતીતિ કરાવી છે.

સંપ્રદાયમાં આ બૃહદ ટીકા શ્રી મહાપ્રભુજીના અલૌકિક નામ મંત્રો ઉપર પ્રકાશ પાડતી પ્રથમ વારજ પ્રગટ થાય છે. શકય તેટલા ઠેકાણે પ્રયત્ન કરવા છતાં પતિવ્રતાપતિઃ એ નામ મંત્ર સુધીની ટીકા પ્રાપ્ત થઇ છે તે પ્રાયઃ ઘણી અશુદ્ધિવાળી છે અને મુદ્રણ દોષ તેમજ અમારા સંસ્કૃતભાષાના અલ્પ જ્ઞાનના કારણે તેમાં ઘણી ત્રુટીઓ રહેલી છે. મહાનુભાવિ શ્રી ગોસ્વામિ બાલકો અને શ્રી મહાપ્રભુજીના અનુરાગી વિદ્વત-જનને અમારી નમ્ર ભાવે વિનંતી છે કે પ્રકાશનમાં રહેલી અશુદ્ધિઓ અને ત્રુટીઓ તરફ અમારૂ લક્ષ્ય ખેંચવા તથા શુદ્ધ સ્વરૂપની પ્રતિકૃતિ તૈયાર કરી અમોને મોકલી આપશો તો હવે પછીની આવૃતિમાં શુદ્ધ સ્વરૂપમાં આ અમૂલ્ય ભેટને પ્રસિદ્ધ કરવામાં સુગમતા થશે.

આ પ્રકાશન કાર્યમાં પરમ ભગવદીય **ડૉ. શ્રી પરમાનંદદાસ જેઠાનંદ છાટપાર કરાંચીવાલા** કે જેઓ હાલમાં મુંબઈ નિવાસી છે. તેમજ ગોલોકવાસી પરમ ભગવદીય **શ્રી જમનાદાસ ઝાલાનીજી** ઉજ્જૈન નિવાસીએ પોતાની પાસેની હસ્ત લિખિત પ્રતો આપી આ પ્રકાશનને સફળ બનાવવામાં સર્વોત્તમ સહયોગ આપ્યો છે તે બદલ તે ભગવદીયોનો અંતઃકરણ પૂર્વક આભાર માનીએ છીએ. ડભોઈ વૈષ્ણવ મંડળ તરફથી આર્થિક તેમજ ઈતર સહાય પ્રાપ્ત થઇ છે કે જેના પરિણામરૂપ આ પ્રકાશન પ્રસિદ્ધ થયું છે, એઓનો પણ અંતઃકરણ પૂર્વક આભાર માનીએ છીએ. “ શ્રી પ્રતાપ વિજય પ્રિન્ટીંગ પ્રેસના મહાનુભાવી ભાગીદારો **શ્રી ગોરધનદાસ હિંમતલાલ શાહ** તથા **શ્રી ગોકલદાસ ગોરધનદાસ શાહ**ના ઉત્સાહ અને ત્યાગ-પૂર્વકની લાગણીના કારણે પ્રકાશનને હાલનું સ્વરૂપ અપાયું છે તે બદલ અમો તેમના ઋણી છીએ.

વિશેષમાં આ ગ્રંથ પ્રસિદ્ધિની વિશિષ્ટતા એ રહી છે કે પ્રકાશન અંગેની મુદ્રણ સહિતની તમામ ક્રિયાઓ પુષ્ટિમાર્ગિય વૈષ્ણવો દ્વારાજ થઈ છે.

આ ગ્રંથની પ્રકાશન માટેની આજ્ઞા તૃતિયપીઠાધિશ્વર શ્રી કાંકરોલી નરેશ **પૂ. પા.ગો. શ્રી વ્રજ-ભૂષણલાલજી મહારાજશ્રી** તરફથી પ્રસન્નતા પૂર્વક મળી અને ઘણા વખતથી આ ગ્રંથનું પ્રકાશન એઓશ્રી કરવા વિચારી રહ્યાની સ્વમુખે આજ્ઞા કરી હતી. વિશેષમાં બાકીના નામ મંત્રોની ટીકા પ્રાપ્ત કરાવી આપવા એઓશ્રીએ પ્રસન્નતા પૂર્વક સ્વિકાર્યું છે હવે પછીની બાકીના નામ મંત્રોની ટીકા પૂર્તિરૂપે વહેલામાં વહેલી તકે પ્રસિધ્ધ થશે એવું નિવેદન કરવા એઓશ્રીએ આજ્ઞા કરી છે. એને અનુલક્ષી આ ભાવના પ્રગટ કરી આભાર વ્યક્ત કરીએ છીએ.

આ ગ્રંથના પ્રકાશનનો હેતુ ભગવદીયોના અંતઃકરણમાં શ્રીમદ્ વલ્લભાધિશ્વરનું અલૌકિક અને રસમય સ્વરૂપ સાકારરૂપે મૂર્તિમંત થાય અને કેવળ આચાર્ય સ્વરૂપના જ્ઞાનમાંજ પરિપુર્તિ ન માનતાં શ્રી વિઠ્ઠલનાથજી, શ્રી ગોકુલનાથજી, શ્રી હરિરાયજી અને શ્રી પુરૂષોત્તમજી તેમજ ચોર્યાસી બસોબાવન ભગવદીયોએ જે સ્વરૂપે અનુભૂતિ કરી છે તે સમજવામાં અને અનુભવવામાં પથ નિદર્શક બને એજ અભ્યર્થના.

માર્ગનું રહસ્ય અને શ્રીમદ્ વલ્લભાધિશનું સ્વરૂપ જેમના હૃદયમાં અહર્નિશ સ્થાયી ભાવે બિરાજે છે. તેવા સર્વોત્તમ ભગવદીય શ્રી દામોદરદાસ હરસાનીજીના પ્રાગટ્ય મહોત્સવના શુભ દિને આ ગ્રંથ પ્રસિદ્ધિમાં મૂકતાં અમોને અનહદ આનંદ થાય છે. અસ્તુ.

: દિનાંક :
મહા સુદ ૪
સં. ૨૦૨૪

લિ. **શ્રી વલ્લભચ ચરણરજોભીલાષી**
કંચનલાલ હિંમતલાલ દરૂના
સપ્રેમ ભગવદ્ સ્મરણ

तृतीय पीठाधीश्वर गो. श्री. १०८ श्रीव्रजभूषणलालर्जा महाराजश्री
कांकरोली. (मेवाड)   प्रागट्य:
व्रज फाल्गुण कृष्ण २ संवत १९६८



भूवि भक्तिप्रचारेण जीवानुग्रहकारकः ।
वल्लभीयं मतं सम्यक् प्रपाल्य सेवनापरः ॥
सारल्यौदार्य गांभीर्यमाधुर्यादिगुणैर्युतः ।
वागीशवंशावतंस जयेछ्रीव्रजभूषणः ॥


श्रीमद् वल्लभः प्रभुः

प्रागट्यः

चैत्र कृष्ण ११ संवत १५३५

लीला प्रवेशः

आषाढ शुक्ल २ संवत १५८७



सौन्दर्यं निजहृद्गतं प्रकटितं स्त्रीगूढभावात्मकम् ।
पुरुषं च पुनस्तदन्तरगतं प्रावीविशत् स्वप्रिये ॥
संश्लिष्टावुभयोर्बभौ रसमयः कृष्णो हि यत्साक्षिकम् ।
रूपं तत् त्रितयात्मकं परमभध्येयं सदा वल्लभम् ॥ १ ॥

॥ श्री वल्लभाधिशो जयति ॥

श्रीमद्द गोकुलनाथजी कृत सर्वोत्तमस्तोत्रोपरी स्वतंत्रलेखाः ॥

नत्वा श्रीतातपादाब्जं निजाभिष्ठ प्रदायकं ।
तुदुक्ताचार्य नामानि विवृणोमि स्वतंत्रतः ॥

तत्र श्रीमदग्निकुमार चरणाः श्रीमद्गोकुलाधीश वदनाब्ज फल विरहाग्निरुपाणां श्रीमदाचार्य पादानां तादृगग्नि रुपाणि नामानि प्रकटयितुं तेषां तादृक् स्वरुपंमाआर्विभावहेतुं च वक्तुमखिल मेयात्मक प्रमाण प्रतिपाद्य सर्व प्रमाण प्रमेय मूलभूतं मूलरुप रसात्मकं पुरूषोत्तमं श्रीमद्दगोकुलाधीशं मंगलार्थं स्तुवंति प्राकृतेति

प्राकृतधर्मानाश्रयमप्राकृनिखिलधर्मरूपमिति ।
निगमप्रतिप्राद्यं यत्तच्छुद्धं साकृति स्तौमि ॥१॥

श्रीगोकुलाधीश्वरो जयति । प्रकृति जगत् सर्जनानुकूल व्यापारवतोऽक्षर ब्रह्मणः सच्चिदानंदात्मकस्य सदंश प्रथम कार्यं, तदीया ये धर्माः सत्वादय स्तदात्मिकाः परिणाम नश्यता विशिष्टाः सर्व दोष श्लिष्टाः क्षुतिपपासादि षडमिः सहितादेहादयो वा, तेषां सर्वेषांमेवानाश्रयं तत्संबंधलेश स्पर्श मात्र रहितं, तेन निश्चेतनात्मक शरीर गुणै विहीनत्वं दर्शितं । तथात्वेऽन्य मत संमत ब्रह्मवन्निर्धर्मक्त्वमायास्यति मूलस्वरुप स्येति शंकातं निरा कायाकरणायाहुः अप्राकृतेति ॥ अप्राकृताः प्रकृति संबंधी गन्ध शून्याः स्वस्वरुप समवायात्मिका येऽलौकिकाः आनदंमया निखिल देहेन्द्रियादयः सर्व धर्मा स्तद्रूपं तदात्मकमित्यर्थः । तेन निर्दोष पूर्ण गुणविग्रहात्मक तंत्रानंदमात्र करपादमुखोदरादित्वं सर्वत्र स्वगत भेद विवर्जितत्वं चदर्शितं । आनंदं ब्रह्म आनंद रुपममृतं ब्रह्मणो विद्वान् रसोवैसः अनुस्थिति धर्मा सर्वतः पाणिपादांत सर्वतो क्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्टति सर्वेन्द्रिय गुणाभासमित्यादयोपि श्रुतयः क्रोडीकृता ज्ञेयाः । अत्राखिल धर्म रुपतोक्तया तेषामपि स्वरुपवदानंदात्मकत्वं स्वाभिन्नत्वे चितेन स्वरुपस्यैव सर्वाकार स्वरुपत्वं च दर्शितमिति । लोकवेदातीतस्यानुभवैक वेद्यत्वादेतत्प्रतिपादनस्यायुक्ति मूलक त्वो-कित शंका व्युदासाय वदंति इतिनिगमप्रतिपाद्यमिति ॥ नितरां गमयति बोधयतीति निगमो वेदः प्रमाण मार्गोपष्टंगमकः । स सर्वोपीतीत्यनेनैव निर्विक्रीय प्रकारेण प्रतिपादयति । परोक्षमव्यपरोक्षतया वा, रसोवैस इत्यादिषु तस्य परोक्षतां चातीततां चदर्शयतीत्यपाणि विहितमेवसर्वं केषां तादृक् प्रभु चरणैक शरणानामेवेति भावः ।

एवंभूतं यत स्वकृपयैव स्वीय दर्शन विषयतापन्नं तत्सर्व प्रमाण प्रमेयाश्रयं प्रमाण बलेन परोक्षं शुद्धंमाया तद्गुण संबंधगंधरहितं साकृति साकारं पूर्वोक्तानंदाकारं न तुमायावाददि भ्रांत शास्त्रोक्ति वन्निराकारं तथात्वे सर्वोविदो विप्लवापेत स्तादृश मूलरुपं वस्तु स्तौमि स्तवनविषयं करोमीत्यर्थः ॥१॥

ननु तादृशो निगमप्रतिपाद्यत्वोक्त्या कथमन्येषां विदुषां न तथा प्रतिपादनं क्वचिदपि प्रतीति चेंति चेत् तत्राहुः कलिकालेति ॥

कलिकालतमश्छन्नदृष्टित्वाद्विदुषामपि ।
सम्प्रत्यविषयस्तस्य माहात्म्यं समभूद् भुवि ॥२॥

विदुषां पुर्वोक्तप्रमाणाखिल ज्ञानिनामपि किमुताऽविदुषां, कलिकालीया येसर्वदोषा किं त्वेनाऽभितः सततं प्रसरमाणा स्तत्कृतेन तमसा सर्वाच्छादकेनांध कारणे तादृशाज्ञानेन, अविश्वास लौकिकदृष्टयनाश्रयारुचि दोषस्फूर्तिं सं देह मिथ्या बुद्धयनादर पूर्व पक्ष नृदृष्टि पाप दुःसंगाशक्ति विषयाशक्ति देवतांतर भक्ति भगवदीय द्रोह तुच्छ फलेच्छा कलत्र पुत्राद्यासक्ति कामक्रोध मदस्पृहा लोभ मत्सररुप जाति कुल विद्या चातुर्य तारुण्य राज धनादि जनिताहंकार इत्येवं विधेनाज्ञानप्रपंचेन च छन्नदृष्टित्वात् दृष्टे ज्ञान शक्तेरावृतत्वात् तस्य श्रुतिप्रति पाद्यस्य मूलवस्तुनो महात्म्यं महिमा संप्रति अधुना भूवि अविषयः ज्ञानस्या गोचरः सम्यक् श्रुत्युक्त प्रकारेणाभूत् तत एवं च स्वतो युक्त्या श्रुति व्यवस्थां चावस्थापनमतः स्वमंधतमसि पातयितुं यतंते ते, इति तेन तदप्येतैःप्रति अधुनैव तथा पूर्वं गोचरमपि। भूवित्युक्त्या भगवल्लोकस्थानां तु तन्माहात्म्यं सदैव गोचरमिति विवेक इति ॥२॥

ननु भवतामपि तत्रस्थितत्वात्तद्बल प्रसरणावश्यकत्वात्कथं गोचरैतत्माहात्म्यं भविष्यतीति विमुख शंकाकलंकावबोधनायाहुः दययेति ॥

दयया निजमाहात्म्यं करिष्यन् प्रकटं हरिः ।
वाण्या यदा तदा स्वास्यं प्रादुर्भूतं चकार हि ॥३॥

दया स्वकीयेषु चिरकालात्धाम्न ऊज्झितेषु कलिकाल बलायतां जीवनात संसृष्टतयाति दुःख परंपरामनुभवत्सु निरुपधित दुःख प्रहोणच्छा तयाहेतुभूतया निजं केवल स्वस्यैव नतु प्रसिद्ध-पुरुषोत्तमादे स्तस्यतु पृथु प्रथितत्वात्तत्र च तेषामासक्त्या भावात्तेन तादृशं माहात्म्यं शुद्ध पुष्टिमार्ग संबंधी स्वरुप लीला रसभाव भावना त्मकंतत्तु स्वैकैवोद्यमेवातो वाण्य स्वाकीय वचनेन यदा यस्मिनकाले निसाधनानां जीवानामन्यत्र कुत्राप्यशति तत्रतोऽनुद्धार चैतदंतराय वैयर्थं च विभाव्य कृपा शक्ति प्रेरणया तदुद्धारपरो हरिः हरति दुःखं स्मर्तॄणां तस्माद् हरिरिहोच्यते इतिच भक्त दुःख हरण कारण स्वशील परिपा-लनाःवश्यकत्वाय तत्प्रकटीकरिष्यनं बभूवं, तदा तस्मिन्समये स्वास्यं स्वकीयमास्यं प्रादुर्भूतं चकारेति । स्वकीया स्वप्रादुर्भावस्तु सन्मनुष्याकार श्रीमदाचाय स्वरुपेणैव तेनास्माकं तादृशपुष्टिमार्गीय फल रसात्मक मूलरुप वस्तुनो महात्म्यज्ञाने तदास्य प्राकटय-मेवासाधारणकारणमिति ;स्वस्यज्ञानमन्येषामज्ञानमिति नकापि शंकावतरतीति । किंचास्ये प्राकटये स्वपदोक्त्या विभूति भावेशांश प्रसिद्धपुरुषोत्तमेषु तदुद्धारासामर्थ्य लोक वेदातीता क्षरातीतस्य च स्वस्य महास्म्य स्थापित द्रग्गोचरतां विचार्य तादृग्शेष सामर्थ्यं समभ्यर्थमानं स्वखिल समवायिनंस्वाखिल स्वरुपलीला गुणरस भावभावनावबोधनिपुणं स्वविरहानलात्मकं स्ववदनमेव श्रीमदाचार्यात्मना प्रकटंकृतवान् । हीतिं निश्चये, नात्र संशय लेशोपि । यतोऽ-शांदयस्तु स्वस्व स्वरुप गुणमाहात्म्येषु संमग्ना, नतु स्वातीतस्यापि, तस्य तस्य तु तेषां ज्ञानेपितेन शक्ता अतिदूरं तत्र निमग्नंत्व, तथा च लोकवेदातीतस्याक्षरातीतस्य तु स्वरुप गुण लीला माहात्म्यानि तदेक गोचराण्येव, (इतःपरं गु.कुलेशस्य वाणी) तद् बोधस्तु तेषु निमग्नानामेव तत्तदर्थावबोधात् संस्पर्श पूर्वको भवति नान्येषामिति भावः ॥ अतएव भगवद् वाग्रुतेन भगवद्भावविषयक शास्त्रादि गतत्वार्थं विवेचितुं स्वयमेव प्रकटः । अतो दययेति

(अत्र पितृ चरणानां सिद्धवत्कारेणाचार्याणां पुरुषोत्तमास्यत्व कथनस्यायमाशयः ॥ भगवदाज्ञया श्रीभागवत गूढार्थ विवरणारंभे आचार्यैरेव स्वातिरिक्तस्य श्रीभागवत गुढार्थाज्ञाने "अर्थं तस्य विवेचितुं" इति श्लोके स्वस्य ज्ञाने वैश्वानरो वाक्पतित्वेन साक्षपुरुषोत्तम मुखारविन्दाधिष्ठातृत्वं निरुपितं । तत्रहेतुः श्रीभागवतस्य द्वादशांगत्वेन पुरुषोत्तमस्यत्वात् पुरुषोत्तमस्वरुपं पुरुषोत्तमस्यैवगम्यं नान्यस्येति तथैव गीतास्वपि अर्जुनेनोक्तं "नहि ते भगवान व्यक्तिं विदुर्देवानदानवाः स्वयमेवात्मनात्मानं वेत्थत्वं पुरुषोत्तमे"ति, तस्मादाचार्याणां पुरुषोत्तम स्वरुप निरुपकत्वात् निरुपणस्य वाग्रूपत्वादाचार्याणां श्री भागवातार्थ निरुपकत्वात् वाग्रूपत्वेपि वाचः आस्ये एव सत्वात् आचार्याणामास्य रुपत्वमेवेति ज्ञापनायोक्तं स्वास्यं प्रादुर्भूतं चकार हीति ॥३॥

अतः परमास्यरुपेणाविभूर्य प्रकटित सुबोधिन्यादि स्वसिद्धांत ग्रंथानां गूढार्थत्वेन स्वीयानामपि सम्यक् तदर्थावबोधनाभावात् अकृतार्थतैव भवेदिति यथा स्वीयानां तदर्थावबोधने कृतार्थता भवेत् तदर्थं तदुक्तार्थावबोध प्रकार ज्ञापनायासाधारणं साधनमाहुः तदुक्तमपीति ।

तदुक्तमपि दुर्बोधं सुबोधं स्याद्यथा तथा ।
तन्नामाष्टोत्तरशतं प्रवक्ष्याम्यखिलाघहृत् ॥४॥

ननु भवद्भिः श्रीमद्वल्लभाग्नेः स्वरसात्मकया मर्यादया रसात्मक पुरुषोत्तमास्यत्व निरुपणात्तस्यापिरसात्मकत्वात् भावात्मकत्वात् द्विधा श्रृंगारात्मकत्वात् तन्निरोधाखिलांगसांगत्वात् व्रजवल्लभातो भोग्य योग्यैक रुपत्वात् तत्तद्भाव रंग भूमिकाग्रहपरत्वात् विरहाग्न्यवयवैकमात्रत्वात् कथं श्री भागवतस्य द्वादशांगाखिल चरित्रमतस्य अतस्तत्केवल भाव पद्धत्यतिरिक्तस्य विवरणे रुचिश्भूत्, स्मापि स्यात्तर्हितस्यां स्वानुभवफल पर्यवसायित्वस्याभावादनुभवांतर वर्तिनः स्व स्वतंत्रानुभवादयः कथमुपरमतां जग्मुरिति चेत्, सत्यं, यद्यपि श्री भागवतस्य द्वादशांगत्वेन स्वयं विवृतिः कृता, परन्तु द्वादशांगत्वेन ननु फल मुखार्विन्दरुपस्य दशमस्कंधस्यैव मुखार्विन्दफलरुपत्वे ननु फल प्रकरणीयाखिललीलैव तदतिरक्त तत्तदंशकलाविभूतिपरत्वात्, यत्र यादृक्स्वरुपं तत्र स्वस्यापि, तत्तत्कलांशविभूति चरितार्थतासु, चरितार्थतादृत्कर्मणः प्रवृत्यानुसृत्य तथैव स्वरुप विवेचने स्वस्याखिलचरित्रार्थतां तत्तद्भृगस्यापि प्रदर्शितवंतो वल्लभाग्न स्तत्र बोधार्हा अपेक्षयन्ते, अत ऊक्तं पितृचरणैः श्रीभागवत पीयूष समुद्रमथन क्षम स्तत्सारभूतरास स्त्री भाव पूरित विग्रह इति ॥ अतः फल प्रकरणीय विविध रस रसात्मक रासायनेकलीलाब्धिमालोडय स्व विरहाग्न्यवयवाखिल समवायि संबंधाधाराधेय विचार परत्वादेव तत्सारभूत रास स्त्री भावपूरित विग्रहत्वेनैव रास स्त्री भावपूरित विग्रह इति ॥ आत्रायं भावः ॥ यथा निरोध लक्षणेऽहं निरुद्धो रोधेन मुखार्विन्द फल वियोगाग्नि रुपेण परम सैंदर्यतात्विक विविध संचित विचित्र भाव संतानाधिष्ठातृत्वेन व्रज वर घोष रत्न सीमन्तिनीषु तन्निरोध मार्ग प्रवर्तकत्वे सत्यापि स्वयमाचचक्षिरेऽहं निरुद्धो रोधेन, निरोधस्य रोधावलंबातिमात्रकत्वात् रोधस्य श्रीमद्व्रजेंद्रकुमार बर्हापीडं नटवरवपुरखिलावयव संपत्यतिमात्रकत्वात् तस्य मुखार्विन्द फल वल्लभ विरहाग्न्यखिल चरित्रातिप्राचुर्यात् तद्भवनाखिलस्य पुन र्विरहाग्नावेव संनिवेशादुक्तवंतो वल्लभाग्नयोहं निरुद्धो रोधेनेति ॥ अनेनाप्युपक्रमेण सन्मनुष्याकृति, रतिकरुणस्य हुताशस्य, विरहाग्नि वहत्वेन साकं विजानीयात्, तथैव रास स्त्री भाव पूरित श्रीमद्वल्लभाग्न्यखिलानंद परमानंद रुपां व्यवस्थां च फलप्रकरणीये श्री मद्भागवते समुह रस रसाब्धो सारत्वेन मुखार्विन्द फल वियोगाग्न्यखिल

चरित्रार्थतैवाबधेया भवति, तद्विज्ञाने जाते तत्सारं पूरति विग्रह विभूतिमत्वं मुखारविन्द फल वल्लभाग्नेरेव निश्चयादवगम्यते, एव तत्सारभूत पूरितविग्रहो वल्लभाग्नि मुखारविन्द फल भक्तिमार्गाब्जमार्त्तण्डः स्वयमेव तासु रासस्त्रीषु तत्सार भाव पूरकः पुनस्तासां तत्सारखिल भाव सामग्र्यादिभि र्निभृत्तानां भावैः मुखाग्नि फलफलात्मकै पूर्णोपि स्वयमेव भवतीति भावः, न त्वपूर्णत्वेन पूर्णो भवति किन्तु पूर्णत्वेनैव पूर्णो भवतीति यावत्, स्वयं तुपूर्णानंदः पूर्णकामस्तत्र यथाऽपूर्णत्वेन स्वस्मिन्पूर्णत्वं करोति कुर्यादपि, तदाद्ध्यनामार्थं भावसंपत्तौ निरर्थकताप्राप्तेः तभजन पराणामत्र संदेहास्पदं स्यात्, तन्निरासाय मया श्री मदाचार्यचरणानां स्वरुपानंद परमानंदानुभवानुभावेन यथाऽहं निरुद्धोरोधेन तथा इति भावः ऊक्तं च श्री मदाचार्यचरणैः "निरोधो यदि भक्तानां स्वस्मिन् स्वस्य च तेषुचातदातूभय संबंधात्दृढो भवति नान्यथे"-त्यादिनापि तदेवावगम्यते, तस्माद्रास स्त्री भाव पूरित विग्रहेणैव रास स्त्री भाव पूरकोध्यव-सीयते अस्माभिः । तत्रहेतुः स्वस्य फल प्रकरणीय समूह रसरासाद्यनेक सार समुच्चया वयवात्मकत्वात् रासलीलैकाभिधेयार्थादपियद्यपि श्री भागवत द्वादशांगरुपा विवृति र्यथावसरं प्राप्य कृता तथापि तत्तदंप्रवरत्वात् स्वस्वरुपमपि तत्तद गपरं प्रदर्शन्नेवेति भावः ॥ अतः प्रकटित श्री मद्वल्लभाग्निः पुष्टि भक्तिमार्गस्थैरपि एतद्भावार्थानुरोधोपक्रममुपगम्य भगवदैश्वर्यादि माहात्म्यमभिज्ञातुबाह्याभ्यंतर भेदेनान्तःकरणेंद्रियातिविषयार्थेषु भगवदनुभवसाक्षात्फल संबंध एवोत्पादयितुं चित्त शुद्ध्यर्थं श्री भागवतस्य द्वादशांगस्य मनननिदध्यासनादिनांतरियं विचारः कर्त्तव्योस्ति सुधीभिः । परन्तु फलप्रकरणीयां लीलामास्थायैव न तु तामुत्सृज्य, तत्सं-गानन्यताग्रहाभावे यथाकमलं मूलस्थानाद्भ्रष्ट सत् दुरवस्थां गच्छति तथैव भवेदिति नियमात् । तस्मात् साक्षाद्विधा श्रृंगार रसानुभवानंद मात्र करपाद मुखोदरादिरुपैः परम सौंदर्यं स्वांन्त-रास्थितमनुभूय तदेकानुभवानंद परमानंद मात्र विग्रह विभूतिधारी श्री मद्वृंदावन विहाराखिल नित्य बाह्याभ्यंतर भेदेनाविर्भावात्मादर्शः श्री मद्यशोदोत्संगलालित परम तत्व, स्तत्स्वरुपानुभव साक्षात्फल संबंध परम भावरंग भूमिकायामेव, प्रकटति कृष्ण मुखारविन्द फल वल्लभाग्नि मार्गांतरवर्तिनः सुखेनैव स्वसेव्य स्वरुपानुभवादिषु तत्संबंधिनीषु साधनसंपत्तिषु श्रीभागवत विचार भावार्थाखिल विषयेषु अपि विचरेयुः । नतु मूल स्थानमुत्सृज्येति मे शिक्षा तदीयैः श्रिमद्यशोदोत्संगलालित स्वरुपानुभावानन्यैः सादरेण ग्रहणीया ॥ अत्रानादरे स्वष्टैव फलाप्ता-वप्यानादरातिमात्रकत्वमवधेयं, नतत्र संदेह तत्रहेतुः, आत्मानुभाव प्रकटितोयंमार्गः, तन्मार्ग मर्यादास्थितेरयमेवाग्रह इतिनियामात् । आत्मानुभाव प्रकटित मार्ग इत्यनेन किं बोध्यम् भवति फलभक्तिमार्गस्थैर्विबुधै स्तमेव वच्मि ॥ श्रीमद्वृंदावने दुष्प्रकटितेति । श्रीमद्वृंदावनस्य श्रीमत्वोक्त्या इतर वन वैलक्षण्यं द्योतितं, तदितरस्य श्रीमत्त्वाभावात् बाह्याभ्यंतरभेदेन श्रीम-त्स्वामिनीनां स्त्रीपुंभावाखिल चरितार्थावयवात्मकत्वस्याभावादिति, अत्रायंभावः । किंच, श्रीमत्स्वामिन्यंगभूतानिखिल व्रजघोष रत्नसीमन्तिन्योपि मूल श्रीलक्ष्म्यखिल सौभाग्य विशिष्टा, स्ताभिरेव यस्मिन् प्रतिक्षणेष्वभिनवतरुणानंदरुपेण रासाद्यनेक लीला विरहणं तत्सुखानुभव संदोह सांप्रतत्वान्नैतत्समत्वमितरेषु, एतस्योक्तभावाखिल विभूतिमत्वान्महद्वैलक्षण्यं, अस्यालौ-किकत्वे धर्मान्तिरमपि आह, यथा लौकिक वनस्याधिपति लौकिकश्चंद्रः 'सोम औषधीनाम-धिपति'रिति श्रुतेः अल्हादकः स्वामृतस्पंदेन पोषक श्च, अत्र साक्षाद्रसात्मकरमण पुरुषोत्तम मनश्चंद्रः परमालोकिकोऽनेक रासादि लीला रसाब्धियंतरवर्ती प्रकट कर्तापि च वनरुहानन परमसौंदर्य माधुर्यौषधीनांपोषकविकाशकश्च, यतो महद्वैलक्षण्यमितरेषु । किंचैतस्मिन् विविध रसनिभृत श्रीमत्स्वामिनीनां गुणगानानुभवाखिल निरोधावयव निखिल सामग्रीभिर्निभृत वेणु-द्वारा पत्र पत्रेषु शाखा शाखासु तत्तद्भावामृत प्रवेशनेन तत्तदार्द्रतयार्द्रीकरणं ॥ इंदुपदात्

इंदीक्लेदन इतियत्त्वर्थस्य तथैवसिद्धेः उंदेरिच्चेति उः आदेशईकारः इतोपि महद्वैलक्षण्यं ॥ तेन इंदुना प्रकटितो यः रसिकेषु अंतरंगभक्तेषु यदानंदसंदोह आनंद समूह स्तद्रूपस्तत्स्वरुपः। सचासौ स्फूर्जद्रासादि लीलादिरुपाः विविध रसामृतजलधयः रस रसावयवात्मकत्वात्साकार रसात्मक ब्रह्म स्वरुपात्मकत्वादमृत समुद्रास्तेन प्रतिक्षणेश्वभिनवतर तरुणानंदरुपेण निरवधित्वेनागाधत्वं तरंगवत्वं च तेषु ध्वन्यते, तेन कृत्वा यथा जलधौ ऊत्तरोत्तर तरंगाधिक्यं तद्वदत्रापि लीला रस भावाब्धीनामप्युत्तरोत्तर मुखारविन्द फल वियोगाग्ने र्नानात्वस्यानुभव निरोधरसाधिक्याद्याधिक्यं, तादृशानां जलधीनां भरः आधिक्यं, तेनाक्रांतं नित्यत्वाद्विग्रह विरहाग्नि स्वभावत एव सर्वदेहेंद्रिय प्राणान्तःकरणादि यस्य स स्तादृशः। आक्रांतत्वे भावस्यानवछिन्नत्वद्योतनाय शश्वदित्युक्तं। मुखारविन्द फल वियोगाग्नि विग्रह विभूति स्वभावत एव अनवछिन्नत्वे तदाक्रान्तत्वस्येत्यपि बोधयितुं शश्वदिति पदं, इति कृत्वाचार्याणां स्वरुपाखिलावयवसामग्रीषु बाह्याभ्यंतर भेदेनानवछिन्नत्वेन पूर्वोक्त प्रकारकांगभूतैः रसरसात्मकैः रासाद्यनेक लीलाब्धिभिः पूर्णत्वं निरुपितं, तेन कृत्वा निरवधित्वेन परमालौकिका अव्यक्त मधुरतरा बाह्याभ्यंतर भेदेनाचार्यचरणानां धर्मा निरुपिताः॥ अतः परं तादृशानां लोके इतर साधारण्येन जन्मादिकमसंभावितमिति लौकिक प्रकारेण जन्माभाववत्वं प्राकट्ये च हेतुमाहुः तत्र प्राकट्यस्याप्यसंभावितत्वात् कथं प्राकटयमित्यपि शब्देन समाधानमाहुः यद्यपि प्राकट्यं न संभवति तथापि प्रादुर्भावस्य मूल सृष्ट्युद्धारार्थावश्यकत्वात् प्राकट्य हेतुभूतं स्वमूल स्वरुपं मुखाग्निरुपं तदाज्ञामाहुः आत्मानुभाव प्रकटनहृदयस्येति॥ आत्मनः स्वामिन्युत्तरदल भागरुपस्य, स्थायिविप्रयोग रस संज्ञकस्य, स्वस्य भगवतोयोनुभावः असाधारण लीलाकरणरुपः तस्य प्रकटने हृदयमंतःकरणं यस्य तादृशस्याज्ञया, वस्तुतो मुखारविन्दफलवियोगाभ्याग्न्याधिष्टातृत्वेन स्वरुपेणैवाज्ञापितं स्वप्रतिनिधि स्वरुपं प्रति, प्रतिनिधिरुपं इलमागारु सुतस्यैवावधेयं॥ मूलस्वरुपेणविविध विरहाग्न्यवयव धारिणा, मुखारविन्दे, विविध रसभाव संचित विचित्रा दर्शांतरे, विविध छबि संकीर्ण वने एव विहरति तन्प्रतिनिधिरुपेण दैवोद्धारार्थं भूतले प्रादुरासीदिति विजानीयात्। अतस्तिस्रः आज्ञापि स्वप्रतिनिधि स्वरुपं प्रति मूलमुखाग्नेरेव जाता स्वप्रतिनिधि स्वरुप वियोगासहिष्णुत्वात। अत एव आत्मानुभाव इतिमूल वस्तु वास्तवविचारणात् श्रीमद्वल्लभाग्नेरेव प्रथेति यावत्॥ अत एव पितृ चरणैरपि तथैवोक्तमात्मानुभाव इति, भगवत आत्मनोनुभावः, उत्तर श्रृंगाररस स्थायिभावरुप स्तदनुभवानुरुपः आत्मानुभावः, अनु पश्चात् यो भवति सोऽनुभावः उत्तर श्रृंगार रसानुभवः, निरोधांतरुप, परमसौंदर्याधिष्टाताग्नि बीजरुपस्य वल्लभाग्नेरेव सांप्रतत्वादात्मानुभाव इति प्रथार्थोऽनुक्त सिद्ध एवास्तिनात्रकिंचिदनुपपत्तिः॥ यद्वा, भगवत आत्मनोनुभावोऽत्युग्रप्रतापः स एवस्थायि विप्रयोगानुभावानुरुपः। स एव मुखारविंदफल वियोग वल्लभाग्निः। यतः पूर्वमुक्तं प्रकटितात्मानुभाव भक्तिमार्गे इति स्वरुपं। अस्मिन्मार्गे यत् किंचितत्वात्मानुभावानुरुपं तत्स्वरुप तल्लीलानुकूल क्रियानुकरणादेः समवाय संबंधातिमात्रकं। तस्मादस्मिन्मार्गे आगत्य पुनः स्वरुपान्तर कथा प्रसंगांतर शास्त्रांतरासक्तिर्वा, व्रजवर रसिक चुडामणि स्वरुपानुभवोपासन लालसावत्वं मन्येयुः तदा मूलमुत्पाद्यफलाशां करोति तद्वद्भवति तस्मादेवं न कार्यं, श्रीमद्यशोदोत्संग लालित स्वरुपानुभवरंग भूमिकायामेव स्थित्वा, ध्यात्वापूर्वोक्त प्रकारेण, यत्कर्त्तव्यं तत्समीचीनम, एतदकरणे मार्गमर्यादया विरुद्धतरमेव मार्गाद् भ्रश्यतेऽपिचेति मया मार्गीय सिद्धान्तो निरुपितोस्ति। श्रीमद्वल्लभाग्न्यंगीकृतानां शुद्धपुष्टि मूढ दैवीजीवानां शुभार्थैव। किंचात्मानुभावस्य श्रीमद्वल्लाग्ने विविध लीलावयवात्मकत्वेन तदनुभव निरोधातिमात्रकानां भावानामनुभवैकवेद्यत्वेन तल्लीलान्तः पात्यतिरिक्तस्यावेद्यत्वेन तदन्तः पातिन एववेद्यत्वादेतेषामाज्ञा, तेन प्रादुर्भावस्यैवावश्यकत्व

निरुपितं तेन प्रादुरासीदिति पदेन तत्स्वरुपाज्ञानवतामेव लौकिक साधारण जन्मादि स्फूर्त्तिः नतु पद्मनाभदासादीनां परमान्तरंग भक्तानाम् ॥ अत एवास्मत्प्रभुचरणानामाचार्याणां स्वरुपानुभावाखिल तात्पर्यार्थं गूढभावास्ते त्वत्यंतदुर्लभतमाः ॥ किंच; तत्स्वरुप विषयेपि दुर्लभतर स्तत्क्रियापि च तदुक्तसुबोधिन्यादि वाग्विलासाखिल निगूढभावार्थं संपत्तिरपि ॥ अतस्तदास्य रुपेणाविर्भूय प्रकटित सुबोधिन्यादि स्वसिद्धान्त ग्रंथानां गूढार्थत्वेन स्वीयानामपि सम्यक् तदर्थावबोधनाभावादकृतार्थतैव भवेदिति, यथा स्वीयानां तदुक्तार्थावबोधने कृतार्थता परमफलानुभवपर्यवसायिनी भवेत्तदर्थं तदुक्तार्थावबोध प्रकार ज्ञापनायासाधारणंसाधनमाहुः तदुक्तमपि इति ॥ ननुभवद्भिः स्वस्यसाक्षाद्भक्तिमार्गीय महात्म्यज्ञाने भगवदास्य प्राकट्य हेतुरुक्तः तेन भवतां तन्माहात्म्यज्ञाने संपत्तिः सर्वापि सिध्येवेति पुन स्तन्नाम्नामाष्टोत्तरशत प्राकट्ये को हेतुरिति तत्प्रकार प्राकट्य प्रयोजनमाहः तदुक्तमपीति, यद्यप्यस्माकं तदर्थं प्रकटित मुखारविन्द फलरुपाचार्यानुग्रह वशात्तदुक्त सुबोधिन्यादि पूर्णार्थावबोधोऽजनि, तथापि येषामुद्धारार्थं स्वयं भूमौ प्रादुरासीत्तेषां मूललीला मध्यपातिनां जीवत्वेनाल्पबुद्धिमत्वात् भुवि पतन दुःसंसर्गात् धाम्नश्चिरोज्झि तत्वात्, तेन देहाध्यासेंद्रियाध्यासान्तःकरणाध्यास प्राणाध्यास स्वरुपानुभवादेरखिल परमानंद रसाधिक्यि विस्मरणं चाभूत् तेन तेषां सुबोधिन्यादीनां मूल वास्तव तात्पर्यानवगमादफलात्तेरेव संभवाद कृतार्थतैव संपद्येदिति, यथा तेषामपि तत्तात्पर्यावबोधो भवेत्तदर्थं तेषांमेवाचार्याणामेवाष्टोतरशत संख्याकानि नामानि प्रवक्ष्यामि । प्रकर्षेण तत्स्वरुपानुभवाविर्भावाधिक्येन कथयामीत्यर्थः ॥ यद्यपितन्नामाष्टोतरशतं (प्र) वक्ष्यामीत्येतावतैव चरितार्थेपि यत् प्रशब्दोपादानं तदेतन्नाम्नां नित्यत्वेन पूर्वं सिद्धानामेव प्राकट्यकरणं प्रशब्देन द्योत्यते ॥ यतः एतन्नामाष्टोत्तरशतं पूर्वोक्तधर्मविशिष्टम्, अत एतदुक्तार्थावबोधप्रतिबंधनाशकमित्याहुः ॥ तत्रापिहेतुः, कतिपयानी नामानि भूमावतणरानुकूलानुकरण रुपाणि तत्कार्य करणरुपाणि, कतिपयानि नामानि मुखारविन्द फलानुभवाश्रयवयावात्मकानि यथातेषामर्थावबोध स्तु वस्तु विचारेण दुर्लभतर एव, अतः एव तदर्थबोध सिद्धये अखिलाघहृदिति ॥ यद्यपि लोकेऽघ शब्दस्य पाप वाचकत्वं प्रसिद्धं तदाचार्य प्रकटित भक्तिमार्गानुवर्तिनांतत्संभावनापिदूरतरेति, परन्तु मार्गानुवर्तिनां नतु कुमार्गानुवर्तिनां तत्सभावनापि दूरतरेति संसव्या, तस्मादत्राघ शब्देन सुबोधिन्यादि अर्थावबोध प्रतिबंधस्यैवाघरुपत्वात्तन्नामाष्टोतरशतस्यैवेति ज्ञापनार्थमुक्तमखिलाघहृदिति ॥ वस्तुतोस्मिन्पुष्टिभक्तिरुप मार्गे तापात्मके स्वरुप लीलात्मके तूर्णमेव श्रीमद गोकुलनाथसंगम सुधा संप्रापके आगत्याद्यौ श्रीमद्वल्लभाग्नि स्वरुप साक्षातद्विधाश्रृंगार रसात्मक भगवन्मुखारविन्दफलवियोगभर भावित न ज्ञातं तदज्ञाते सति साक्षाद्भजनानंदस्वरुपानुभवादिषु सेव्यस्वरुपाखिल चरितार्थतास्वपि प्रवेशाभिनिवेशाभावत् पूर्वं स्थितिः पूर्वकैवासीत्, तेनाल्प बुद्धिमत्वंजीवत्वंचाभूत, तेनात्महा भवति, इतिकृताऽस्मिन्मार्गेऽघ पापरुपस्येदमेवस्वरुपं, इतः पापस्वरुपमधिकतरं किं यन्निरुपियामि, तस्मादेतन्नामाष्टोत्तर शतमेव तत्पाप नाशकं, तस्मात्प्रत्यहं श्रद्धाविशुद्धबुध्या वल्लभाग्निमार्गानुवर्तिभिरादरान्नियमपुरः सरेदम् सर्वोत्तमस्तोत्रं पठनीयं ॥ ४ ॥

एवमाचार्यस्वरुपस्य तन्नाम्नांचानंद परमानंदमयत्वालौकिकत्वमुपपाद्य सर्वत्र नाम प्राकट्ये छंदर्षि देवता नियमस्यावश्यकत्वाद्याचार्यनाम्नामानंदमयत्वेन परमाऽव्यक्ततरालौकिकत्वात् तद्द्रष्टा ऋषिरग्नि कुमारस्त्विति ।

ऋषिरग्निकुमारस्तु नाम्नां छन्दो जगत्यसौ ।
श्रीकृष्णास्यं देवता च बीजं कारुणिकः प्रभुः ॥५॥

तुशब्देनात्र ऋष्यंतरापेक्षया परमालौककत्वं ज्ञायते ॥ अन्येषामृषीणां ऋषीगणनायां प्रसिद्धत्वात् तद्दृष्ट मंत्र सहस्त्र नामादीनांमपि वेदपुराण प्रसिद्ध त्वेनापूर्व दृष्टत्वाभावान्नालौकिकमृषित्वं, प्रकृते तु साक्षात् भगवद् मुखारविन्द फलवियोगाग्नि भक्तिमार्गाचार्याष्टोत्तर शतनाम्नां वेद पुराणाद्यतीतत्वाद्वेद पुराणेष्वप्रसिद्धत्वेन सर्वाज्ञातत्वात् तज्ज्ञाता ऋषिः अन्येभ्यः सर्वेभ्यः विशिष्यते इति एतदृषिरग्नि कुमारत्वमुक्तं ॥ तत्रायमाशयः। यथा एतदन्य ऋषीणां वेदपुराणोक्त मंत्रानामदृष्टत्वात् शुद्ध मर्यादा मार्गीयत्वं तथात्रापि ऋषित्वेप्यग्निकुमारत्व कथनात् शुद्धपुष्टि भक्तिमार्गीयत्वं ॥ ननु मुखारविन्द फल वियोगाग्ने र्नाम्नां वेद पुराणेष्व प्रसिद्धत्वेन सर्वाज्ञातत्वात्तज्ज्ञातां ऋषिः पुष्टिमार्गानुरोधेनाग्निकुमार एवास्तु, परंतु अग्नि कुमारेत्युक्त्या जन्य जनकयोः भावार्थ कोटि परामर्शात् कुमारे जन्यत्वादग्नेर्वाकत्वात्तन्नामाष्टोत्तर शतस्य नित्यत्वात् कथं ऋषिरग्नि कुमारस्त्वित्युक्तं। सत्यम्, जन्य जनकभाव परामर्षादेवावगम्यते, तच्छृणु। जनके यथा जन्यादिभावस्यनित्यत्वमस्ति तथाग्नि कुमारत्वस्याप्य भिव्यक्त्यंतरे अग्नावेव नित्यत्वेन कथं न मन्येत। यथा प्रकृते निखिल मायिकत्वं संभवति पुन र्लयेतस्यामेवस्थितं भवति पुनर्ब्रह्मांडोत्पत्यंतरे तथैव तस्य संभवः तथैव ब्रह्मात्मिकाः विभूतयो ब्राह्मणः सकाशादेव प्रभवंति, लयकाले ब्रह्मणि एव गच्छंति, तस्मात् प्रकृति पुरुषयो र्ब्रह्मात्मकत्वात् ब्रह्मात्मकस्य प्रपंचस्य प्रकृत्यात्मकत्वात्प्रकृत्यात्मकस्य प्रपंचस्य नित्यत्वं, तदात्वत्र तदपेक्षया सर्वैः प्रकारैः सर्वाधिक्यातुल्यातिशयानुभावै र्वैलक्षण्यातिमात्रकत्वादग्नावग्निकुमारत्वस्य नित्यतयैव तन्नामाष्टोतरशतस्यर्षित्वमग्निकुमारस्यैवोपपन्नमित्यत्र पुष्टिमार्गीयं परमरहस्यमिदमेव ॥ किंच यथा व्रतवरदानप्रस्ताव निरुपणे वेदपुराणाप्रसिद्धत्वेनसर्वा ज्ञातो मंत्रः कात्यायनिमहाभागेति तत्प्रतिपाद्यदेवता सहितस्तैरेव दृष्टोनान्यै स्तथैवतान्यप्याचार्यनामानि वेदपुराणाप्रसिद्धत्वेनान्याज्ञातान्येभिरेव प्रकटितानि इति एतन्नामप्रगकटने एषामेव ऋषित्वमितिज्ञापनायाग्निकुमारत्वोक्तिः, वस्तुतस्तेषामेव तच्छोभनकाले प्रसादरूपाशक्तेः प्रसादात्पुष्टिमार्गीयमग्निकुमारत्वं मुखारविन्दफलवियोगग्न्यनुभवादभिनिवेशात्तज्जनितक्लेशाविर्भावावेशाद्भूत् जातमिति भावः ॥ अतस्तन्नाम प्रकटने एषामेव ऋषित्वमितिज्ञापनायअग्निकुमारत्वोक्तिः यथाग्निकुमारैक प्रकटित मंत्रकृतपूजायाः क्रमेणावांतरफल परमफल प्राप्तिरभूत्तथैवैतत्प्रकटित नाम पाठात्क्रमेणैतन्मार्गोक्तावांतरफल परमफल प्राप्ति संपत्स्यत इति ज्ञापितं भवति ॥ वस्तुतः स्वस्मिन्नेवग्निकुमारत्वं परम पुष्टिमार्गीयं तत्समवाय साधर्म्यातिमात्रकं सूचितमर्थं गोपायितुाचमार्याणाम ग्नित्वप्रसिद्ध्या स्वस्य तदात्मजत्वेनाग्निकुारत्वमुक्तमित्यर्थः ॥ किंच, ऋषित्वेन स्वस्मिन् द्विधाशृंगार रसात्मक पुरुषोत्तम भजनानंद मुखारविन्दफल वियोगाग्न्यंतरित स्त्रीभावाद्यवयवधारी, तेनकृत्वा प्रादुर्भूय यत्कृतं निखल भक्तिमार्गीयं सेवाकथाकीर्तनादिकं तत्तद्भावाग्न्यवयवाखिलसामग्री साहित्येनैव, अत एवाग्निकुमारे ऋषित्वमेव तदनुभावकम् ॥ एतन्नामाष्टोतरशतपाठ कर्तृणामपि स्वहृद्गत भावसंपत्तिदानकरणायैव विराहाग्निनाम प्रकटने स्वस्यैवाग्निकुमारत्वं ध्वनितं ॥ एवं ऋषिं निरुप्यातः परम् छंदोनिरुपणमाहुः नाम्नां छंद इति ॥ नाम्नांसहस्रनामाष्टोतरशतनाम्नां जगतियत्प्रसिद्धछंद स्तद्वदत्रापि सर्वोत्तमस्तोत्रे छंद इत्यर्थः छंदो निरुप्यातः परं देवता निरुपणमाहुः श्रीकृष्णस्यं मसौंदेवता॥अत्रश्रीकृष्णपदोक्त्या मुख्य भक्तमुखारविन्द पीतेन्दु, बदरपांडु, विविध रसरसात्मकस्याति साहित्य कथनेन तत्तल्लीला रसाविष्टकथनेनैतत्स्तोत्रभावार्थाभिज्ञातामुपासकानां तत्तद्भाव संपति संसिद्धये स्वयमेव देवताभूदिति, अत्रायंभावः ॥ किंचास्यकथनेन स्वीयानां तद्विरहाग्नेर्नानात्वस्यानुभवज्ञानक्रिया जातात्यंतालौकिक फलदान करणाद्यैवास्यरुपेण प्रादुर्भूत इति ज्ञापितं भवति। कृष्णास्याखिलांगावयवादेः कृष्णभावाग्निः स्त्रीभावाग्निः करपादादि युक्तत्व.द्विविध लीलारस भावात्मकत्वादौपपत्तिक प्रकृतिा स्तदेव तदधिकरणभूत पदार्थमात्रेषु

संपादकत्वात्स एवाध्यवसीयत इतिभावः ।। देवतात्व कथनेनैतत्स्तोत्राधिष्टातृत्वमेतत्स्तोत्रोक्त फलदातृत्वंच ज्ञापितं ।। स्वयं फलरुपेण परमात्यंतालौकिक देवतात्वेन स्वोपासकानां स्वशरणागतनां स्वाखिल परमानंदानुभवानुरुप समृद्धि साहित्येन स्वयमेव फलरुपो भवतीतिभावः ।। ततः स्वस्वरुपानुभवादिकं कारयित्वा पुन स्तदनुभव निरोध जन्यं परमफलात्मकं दुःखफलरुपं स्वयमप्यनुभवति, स्वस्याप्येतत्फल भोक्तृत्वस्य नित्यत्वात् गुणातीत रुपेणा ऽहं निरुधो रोधेनेत्यादिना ।। अत एतदुभय समुच्चयार्थं चकारः ।। ननुब्रह्मादि दुर्लभस्य मर्यादामार्गीय श्रुत्यगम्यस्य स्वकीयेष्वेवदाने किं बीजमित्याकांक्षायामाहुः बीजंकारुणिक इति ।। अग्नि बीजेनाग्निपर्यवसायिकत्वं करोतीतिभावः ।। स्वकीयेषु मूल लीलांतःपातिषु मुखारविन्दफलवियोगाग्नेविस्फुलिंगांगितेषु तत्साकाराकृति संप्रदायावयवधारीषु निरुपध्यिसाधारण करुणावत्व ज्ञापनार्थमुक्तं कारुणिक इति ।। यदीतर मार्गाचार्यवत् स्वस्वकीयानामपि मुक्तिफलंदद्यात्तदा स्व प्रकटित मुखारविन्दफल भक्तिमार्गानधिकारित्वेन शुद्धपुष्टिभक्तिमार्गीयत्वं न स्यात् । अतः स्वीयान्पूर्वोक्त भाव संपति प्रयुक्तान्सर्वतः पृथक् कृत्य प्रकटित शुद्ध पुष्टिभक्तिमार्गीय फल दानेन तद्गत सर्वोत्कर्ष परमात्यंतालौकिक सिद्धौ करुणावत्वमेव बीजमिति ज्ञापनायोक्तं बीजंकारुणिक इति ।। यद्वा, बीजरुपं करुणा रसभर स्वरुपं स्वस्यैव तेनैव स्वरुपानुभावानुरुपदानेनानिर्वचनीयानंदानुभव साक्षात्फल संबंध स्वीयानां भवतीत्युक्तं बीजंकारुणिक इति ।। यद्वा, अग्निबीजामृतबीजयोःस्वयमेव कारणरुप स्तेनकृत्वा यथा क्वणित वेणु रवांतरे द्वयोः स्थितिं प्रदर्शयंत स्तासु हरिणीष्वसंभावित भावानुभावकासु मुख्य स्वामिन्यधिकारत्वं प्रणयावलोकनाखिल सामग्री साहित्यं संपादितवंतोऽतिकरुणास्तद्वदत्रापि स्वीयेष्वपि स्वनामाष्टोत्तरशत पाठादेव करिष्यंतीत्यभिप्रेत्येवोक्तवंतः पितृचरणाः बीजं कारुणिक इति ।। एतद्देय दाने करुणावत्वस्य निरवधे किं वाच्यं ।। ननु उक्तप्रकाराखिल सामग्री साहित्येन करुणात्वेप्येतत्फलस्य सर्वावेद्यत्वेन भगवतोप्यंतरंगभक्तेष्वेव प्रकटितस्य दाने कथं सामर्थ्यमितिचेत् तत्राहुः प्रभुरिति ।। प्रभुत्वेनात्यंतासाधारण सामर्थ्यान्मुखारविन्दफल वियोगाग्न्यिनुभव प्रमेय पूर्ण बलरुपा तादृशफलस्यदानेपि सामर्थ्यं ज्ञापनार्थमुक्तं प्रभुरिति ।।५।।

एवं बीजत्वमुपपाद्यैतत्स्तोत्र पाठस्य कुत्र विनियोग इत्याकांक्षायामाहुः विनियोग इति ।।

विनियोगो भक्तियोगप्रतिबन्धविनाशने ।
कृष्णाधरामृतास्वादसिद्धिरत्र न संशयः ।।६।।

साक्षात् द्विधा शृंगार रस निभृत विविध संचित विचित्र भावात्मादर्श, सर्वासां व्रजवर घोष रत्न सीमन्तिनीनां परमोपास्यास्पद मुखारविन्द, फल मुख्यभक्ति वियोगाग्न्यवयवैक मात्र, तद्भक्तियोगे यः कश्चन प्रतिबंधः दृष्टादृष्टरुपः तस्य विनाशे विशेषेण नाशेन मूलोच्छेदे एतत्स्तोत्रस्य विनियोगःप्रयोजनमित्यर्थः यतस्तदीयानां तादृशानुभव रस प्रेप्सूनां तत् श्रीमुखाखिल परम सैांदर्य साकार विभूति दिदृक्षु मनसां मनन निदिध्यासादिनेदंस्तोत्रमादरेण नियम पुरः सरं जप्यमिति परमफल रुपं । अत्र परम रसात्मक भक्तौकेवल भक्तिपद विहाय योगपदोपादानाद्भक्तेः ज्ञान क्रिया साधन संपृक्ताया अनेक विधत्वेन भक्तियोगो बहुविध इत्यत्र भक्तेरनेकविध फल साधकत्वेन निरुपणात्प्रकृते योगपदोपादानं भवावता सहयोगः स्वरुपानुभवदिभिः साक्षात् फलसंबंध स्तत्प्रतिबंध विनाशने अस्योपयोग इति । अत्रायंमाशयः। यद्वा साक्षात् स्वरुपानुभव फलसंबंध योगमात्रा स्वयमेव कारयति । सापि स्वयं स्पष्टयति अयंमूलदैवी जीवः मुखारविन्द फलवियोगाग्नि वल्लभोपासकोऽस्ति तत्स्तोत्र भजनीयोस्ति वा नास्तीति निश्चित्यैव मुखारविन्द फलानुभवभ क्तियोगे योगायोगमेव कारयतीत्यत उक्तं योगपदम् ।। एवं विनियोगमुक्त्वैतत्साध्यं

फलमाहुः कृष्णाधरामृतास्वाद इति॥ कृष्णाधरामृते कृष्णाधरामृत स्वादो नान्यत्र, तिल्कं कृष्णभावनाभिभूता बाह्याभ्यंतरयोरभिभूता स्वयं स्वामिनी तेनांतरलापिक या साकृष्णाख्या तत्कृष्णाधरामृतास्वादस्तु कृष्ण स्त्रीभावात्मक पुरुषोत्तमाधरे एव, तन्निरोधाधिकरण भूतः स्वयं, मुखारविन्दफल वियोगाग्न्यखिल सामग्रयधिष्ठातृत्वेन स्वयं वल्लभाग्नि स्तेन कृष्णाधरामृतास्वाद इति॥ यथा आसमन्तादास्वादे एव निरोधाग्नरति प्राचुर्य सांप्रतत्वान्निरोधाग्नेर्मूल वल्लभाग्नौ विविध निरोध तारतम्यज विशेषात्मदर्शे समावेशान्नित्यत्वा त्स्वभावत्त एव तथैव प्रथाभूत् कृष्णाधरामृतास्वाद इति॥ किंच, कृष्णधरामृतस्वरुपं त्रतयात्मकं देवभोग्यं भगवद्भोग्यं सर्वाभोग्यं। श्रीकृष्णदेवताभोग्यत्वेन देवभोग्यं, तत्तु निरोधाग्नि रंगभूमिकायां परम गुणातीतायामेव स्वयं गुणातीत रुपेणास्य विभेदेन भुनक्ति। भगवद् भोग्यत्वेनेति प्रसिद्धं राधाधर सुधाया पातुरित्यादिना। सर्वाभोग्यत्वेन सर्वासां व्रजघोष रत्न सीमन्तिनीनां, सर्वात्मभावाखिल भाव संपतिवतीनां, तदलंकार परम सौंदर्यादिभि बाह्याभ्यंतरभेदेनाभिभूतानामेव नान्येषामिति भक्तिमार्गस्थै र्विबुधैरवबोद्धव्यं। तत्रापि वास्तवतः कृष्णाधरामृत स्वरुप त्रितयात्मकत्वेन किं लक्षणं तमेव वच्मि। स्त्रीभावाग्निरुपेण बर्हापीडनटवरवपु स्वरुपात्मक तन्निखिलावयव लीला सामग्री सहितं, कृष्णभावाग्निरुपेण परमसौंदर्य साकाराखिलाधिकरणभूता स्थायिभावाखिल निरोध गहनांगवती स्वामिनीरचना रुपात्मकं, देवभोग्यत्वेन मुखारविन्दफलवियोगानलमुक्त मितेन तापात्मकं, तदवयवाखिल सामग्री साहित्येनाग्निज्वालात्मकं, तेनकृत्वा त्यागानुरागं वैराग्य गायत्री चतुर्थपाद सन्यासाश्रमाचरणादेः प्रवर्तकमधरामृतं, तस्यस्थितिः कृष्णाधरेव श्रीमत्स्वामिन्यधरे एवेति यावत्॥ "सुधात्रिविधा देव भोग्या भगवद् भोग्या सर्वाभोग्ये"ति सुबोधिन्यां "सालोभात्मकऽधरे स्थापिते" त्यपिच "सा सर्वेषां भगवदीयत्वं संपादयती"त्यनेन सुधायां यत् त्रतयात्मकत्वं तत् त्रिषु स्थलेषु स्वरुप स्थल भावना तारतम्येन भगवदीयत्वं भावाकाराखिल मात्रकत्वं संपादयति, पुन र्वेणुद्वारा सर्वासु व्रजवर घोष रत्न सीमन्तिनीनां नाभिकमलकोशेषु तथैवाकरोति सर्वेषां लीला लोकेऽधिकारानधिकार विचार परत्वेन तथाविधिवत्व संपादने भगवदीयत्वं संपादने भगवदीयत्वं संपादयतीति यावत्॥ एवं कृष्णाधरामृत स्वरुपं तदास्वदानंद स्वरुपयो र्व्यवस्थां निरुप्यैतत्स्तोत्र जप्य रसानुभवाधिक्याच्छ्रीमद्वल्लाभाग्न्य गीकृत दैवी जीवानामपि तद्देयदानार्थं यदौदार्याखिल चरित्रयन्नाम तन्निरुप्यते कृष्णाधरामृतास्वाद इति॥ यद्यपि पूर्वोक्तभाव संपति दानस्याप्रसिद्ध स्याति दुर्लभत्वे सर्वत्र देयासंभवादत्रास्वाद पदोपादानात् आङ ईषत् अर्थत्वं एवाभिप्रेतं। तेन यथा गवादीनां वेणुनाद श्रवणद्वारा ईषदनुभव कर्तृत्वं, तथैतत्स्तोत्र पाठकर्तृणामपि यथाऽधिकारं मुख्याधिकारीतर व्रजवासि वदत्रास्मिन् स्तोत्रे सिद्धिः फल सिद्धिरित्यर्थः। सिद्धिरित्यनेन साधनानपेक्षायस्याः, स्वतः सर्व भवनरुपा, कर्तुमकर्तुमन्यथा करण समर्था, सा, तु मुखारविन्द फल वियोगाग्न्यनुभवानुरुपा, निरोधास्वादजन्या निरोधवनचरि मुखारविन्द फल वियोगाग्नि वल्लभाग्नावेव विहरति, विविध विहारान् कुर्वाणाग्न्यनुभवात् तारतम्येन सर्वेभ्यस्तदनुभव निरोध वनाश्रमिभ्यः फल प्रयच्छतीतिसिद्धिः स्वतः पुरुषार्थो मया निरुपतिः। एतत्सिध्यतिरिक्तायाः सिद्धयोऽणिमादयो योग तप दानाद्भवादयस्तासामेतत्फल दानासाधकत्वादत्र न विनियोगादस्मिं स्तोत्रे इयमेव सिद्धि स्तत्फलदात्री निश्चित्य तदीयानां प्रदर्शयंत उक्तवंतः स्वयमग्निकुमाराः पितृचरणाः कृष्णाधरामृतास्वाद इति तदग्रे सिद्धिरिति॥ सा सिद्धि कुत्र तिष्ठति, कृष्णाधरामृतास्वादे निरोध गहनवनेत्यर्थः। तया सिध्यैव तदीयानां फलानुभवपर्यवसायिकत्वस्य ज्ञान विज्ञान विषय क्रिया प्रवृत्ते र्निखिलत्वं फलरुपेण सिध्यति। तत्फलानुभवज समग्रमाप्नोतीत्यर्थः॥ फल सिद्धेरावश्यकत्व ज्ञापनार्थमाहुः न संशय इति॥ ६॥

एवं फलपर्यंतं निरूप्यातः परं नाम निरूपण प्रस्तावे तत् हेतुक स्वरूप स्मरणे जाते तज्जनितानंद भरेण स्वरूपे केवलानंदत्व स्फूर्त्या प्रथमतः आनंदत्वेनैव नाम निरूपणमाहुः आनंद इतिः ॥

आनन्दः परमानन्दः श्रीकृष्णास्यं कृपानिधिः ।
दैवोद्धारप्रयत्नात्मा स्मृतिमात्रार्तिनाशनः ॥७॥

आनंद मात्र करपादादि विग्रह विभूतेः संस्मरण परामर्शे आनंदानुभवस्यैव सांप्रतत्वादानंद इत्युक्तम् भवति ॥ यद्यानंद जनकस्यांतरीय परम सौंदर्यादेः रसात्मक साकार पर ब्रह्मद्विधांगभूतस्यात्यंतालौकिक परामर्शोद्रेक विधौ वस्तुतोऽनुभवोपलब्धिर्भवति । तत्स्फूर्त्या तत्हेतुस्मरणे जाते परमानंदत्वेनैव नाम निरूपणं भवति परमानंद इति ॥ इति कृत्वांतरीय परमसौंदर्यादेः सौंदर्य साकारातिमात्रकत्वात्तदांतरीय भावावयव संघातातिमात्रकत्वादानंद मात्र करपाद मुखोदरादि विग्रहापेक्षयाशरीरत्वात् केवलानुभवैक गम्यमानत्वात्परमानंदत्वमस्ति । विप्रयोगोत्तरांग रूपत्वात्तदनुभवानुरूपत्वेन परमानंदः । आनंदाकाराति मात्रे भगवति रसात्मक ब्रह्मणि परम सौंदर्याधिकरणभूते आनंद इतियावत् । वस्तुतः संयोगानुभवे आनंदः विप्रयोगानुभवे परमानंद इत्याभ्यामानंदाभ्यां परमानंदरूपः स्वयं श्रीमद्वल्लभाभिः आनंदरूपेणानंद मात्र करपाद मुखोदरादि स्वरूपस्य भगवतोनिखिल लीला रसरसात्मकां साकारतां स्थायि विप्रयोगाखिल विभूति मतींप्रदर्शयतीति कृत्वात्वानंदः परमानंद इति नाम द्वयस्यायमाशयोऽस्माभि र्निरूपितः ॥ यद्वा, यद्यपिमनसि अति आनंद भरवशात्पुरुषोत्तमाक्षरानंदयो स्तारतम्यास्फूर्त्या केवलमानंद इत्येवोक्तं तथाप्यग्रिम विचारे आचार्याणां साक्षाद्रमण पुरुषोत्तमास्यत्वेनागणितानंद स्फूर्त्या गणितानंदेनानंदत्वमक्षरेपि वर्तत इति आचार्येषु तत् व्यावृत्त्यिर्थं परमानंद इत्युक्तं ॥ अतः परमानंद इति परमः अगणितः यतोवाचोनिवर्तंते इति श्रुति प्रतिपाद्योयः पुरुषोत्तमानंद स्तद्रूप इत्यर्थः । ननु पूर्णस्य लोके प्रकटस्य पुरुषोतमत्वे विरहाग्निरूपत्वे किं प्रमाणमिति चेत्तत्राहुः श्रीकृष्णास्यमिति ॥ श्रीकृष्णपदेन द्विधाशृंगार रसात्मक पुरुषोत्तमत्वेन तदास्यस्यापि तथात्वं युक्तमेवेतिनाशंकनीयं किञ्चित् । ननु तदास्यस्यापि यथा तथात्वं तदाऽलौकिकत्वं विप्रयोगाग्न्यावयवातिमात्रकत्वात्तथा तथात्वेऽलौकिके व्रजे एव प्रकट, तथैवास्यस्यात्यंतालौकिके एव प्राकट्यमुचितं ननु लौकिकेष्वित्याशंका निरासायाहुः कृपानिधिरिति ॥ कृपायाः निधिः निधानं । निरुपधि अलौकिक कृपाश्रय इत्यर्थः । यमाश्रित्य स्वयं कृपाशक्ति र्मूलतीलादिषु स्वकृपात्वं लीलानुभव तारतम्येन समं लीलानुभवादिषु पीतभुक्त मधुरादिष्वपि संपादयति, पुन स्तस्य कृपानिधित्वस्य किं वक्तव्यम् ॥ एवा दैवीसृष्टि र्भगवदंगात्मिका धाम्नश्चिरोज्झिता तस्या उद्धारार्थमेव भुवि स्वयमास्याग्नि रूपेण प्रादुर्भूतो निःसाधन फलात्मा तेन कृत्वा स्व संनिधानत्वं संपाद्य तेषां साक्षात भगवत्स्वरूपानुभवरस प्रेप्सूनां भावनादिषु स्वतापाग्नि प्राचुर्य वितन्वन साधनत्वेन सर्वत्र फलात्मकत्वमेव कुर्वन् उत्तरदशा पर्यवसायित्वमेव कृतवान पुनस्तेषां कृपानिधित्वे किं वक्तव्यमितिभावः । कृपाविषयाणां लौकिकेष्वेव प्राकट्यात्स्वस्यान्यत्र प्राकट्ये एतेषु कृपाविषयत्वासंभवात्कृपानिधित्वमेव नस्यादिति लौकिकेषु प्राकट्य हेतुत्व ज्ञापनार्थमुक्तं कृपानिधिरिति ॥ ननु ते के कृपाविषयाः? यदर्थमलौकिकेषु भावकोटि विषयेषु स्वप्राकट्यमकृत्वा यल्लौकिकेषु प्राकट्यं कृतवान तदर्थं कृपा विषयानाहुः दैवोद्धारेति ॥ दैवाः "पुष्टिंकायेननिश्चयः," "तस्माज्जीवाः पुष्टि

मार्गे भिन्ना एव न संशय," इत्यादि वाक्यै र्दामोदरदास पद्मनाभदास प्रभृत ये। धाम्निश्चिरोज्झिता मूललीलान्तःपातिन स्त एव भगवदुक्त दैवसृष्टौ प्रादुर्भूता स्तेषामुद्धारे प्रयत्नो, भगवत्सेवा साक्षात्कार प्रदर्शनादिनाभिभूतो, निखिल श्रीमद् व्रजेन्द्रगृह संबंधिनीभि र्लीलाभिरुपचितः, श्रीव्रजघोषरत्न सीमन्तिनीनां विविधभावसंपत्तिभावित, स्तस्मिन्नात्मा अन्तः करणं यस्य सः ॥ ननु दैव सृष्ट्युत्पन्नानांमुक्तफल सिध्यर्थं वेदपुराणोक्त साधनानि सिद्धान्येव सन्तीति किमाचार्य प्राकट्येनेति चेत्, सत्यम्, भगवता पुष्टिमर्यादामार्ग भेदेन जीवानाम गीकारान्मर्यादामार्गफल-साधकत्वेन पुर्वोक्तफल साधकानां मर्यादामार्गीयफल साधकत्वमस्तु नाम; साक्षात्भगवन्मुखारविन्द फल वियोगाग्नि भक्तिमार्गीयाणां मुक्तिफलातिरिक्त साक्षात् द्विधा श्रृगांर रसरुपस्य रसात्मक ब्रह्मणो भगवतः स्वरुपानुभवफलसंबंधस्यैव फलत्वात्साधनानामन्याप्रसिद्धत्वेन शुद्धपुष्टिमार्गीयैक गम्यत्वेन तदितराज्ञानादेतन्मार्गीयाणामनुद्धार एव भवेदित्येतन्मार्गफलाऽऽस्धिया उद्धाराभावे, तदर्थमेवाचार्याणां प्राकट्यमिति ज्ञापनायोक्तं दैवोद्धारप्रयत्नात्मेति ॥ वस्तुतो मूलतो वल्लाभा ग्न्यंगीकृतजीवानामेतन्मार्गांगी प्रमेयबल स्वभावात्, तदितर मार्गीय फलेफलत्वाभाव स्फूर्त्या स्वमार्गीयफलसाधनयोः स्वतोऽज्ञानात्स्वोद्धार विषयिनीएवार्तिः सदातिष्ठत्येव। यदाचार्यैः प्रकटीभूय मुखारविन्दफल वियोगानल शुद्धपुष्टि भक्तिमार्गीय प्राकट्यं कृतं स्वीयेषु, स्वरुपा-नंदानुभव साक्षात्फल संबंधदान करणाधिकरणभूतेषु, तदा वल्लभाग्नि चरणाविन्द स्मरण मात्रेणैव स्वमार्गीय परमालौकिक फल निश्चयज्ञानात्पूर्वं स्वस्मिन् स्वमार्गीय फल निश्चया-ज्ञान जनित स्वाकृतार्थतार्त्ति स्तदार्त्ति अपशमन ज्ञापनार्थमुक्तं स्मृतिमात्रार्तिनाशनेति ॥ मुखारविन्दफल वियोगाग्ने र्निसर्गादेव तत्स्मरणारुप संनिधान मात्रेणैव तदीयानां परमालौकिक स्वतंत्र पुरुषार्थं प्राप्तवतां स्वाच्छंद्य चरितार्थादार्ति नाशकत्वंभवत्येवेति व्रजवर घोषरत्नसीम-न्तिनीनामनुभवैकवेद्य हार्द रहसि प्रसिद्धम् ॥७॥

ननु भगवन्मुखारविन्दफल वल्लभाग्नि प्रकटित शुद्धपुष्टि भक्तिमार्गस्य स्वीयानां तन्मार्गोक्त फलानुभवात्सर्वतोऽव्यभिचारि प्रामाण्य ज्ञानमस्त्येव तथापि आचार्य स्वरुपाज्ञानवतां शास्त्रार्थ प्रमत्तानां पंडितानामपि कदाचित्तत्प्रवर्तित शुद्धपुष्टिभक्तिमार्गे तन्मूलाज्ञानाद् प्रामाण्ये शंका-भवेदिति तत्प्रामाण्यार्थं स्वप्रकटित शुद्धपुष्टिभक्तिमार्गस्य स्व सर्वं निखिलत्वं समूलत्वं ज्ञापनार्थं तन्मूलज्ञान प्रकाशकत्वमाहुः श्रीभागवत गुढार्थ प्रकाशनपरायण इति ॥

श्रीभागवतगूढार्थप्रकाशनपरायणः।
साकारब्रह्मवादैकस्थापको वेदपारगः ॥८॥

श्रीभागवत्पदात् फलप्रकरणावधि पर्यंतं व्रजवर घोषरत्न सीमन्तिनीनां रासमंडल मंडनानां परमोपास्यरुपं तस्मिन्नेव तन्मूल ज्ञान प्रकाशकत्वमुक्तमिति विमृश्यं भवति सुद्धिभिः ॥ ननु श्रीभागवतमन्यैरपि व्याख्यायत एव यदि तत्राप्ययंमार्गः प्रकटो भवेत्तदान्यैरपि ज्ञायेतैवति शंकानिरासायाहुः गूढार्थेति ॥ यद्यपि सर्वैरपि श्रीभागवतं व्याख्यायत एव तत्पीयूष समुद्र तलभागो, रास स्त्रीभाव रत्नाकर विकीर्ण वरसंवृत,स्तत्रत्यो सर्वाज्ञातः गुढ योऽर्थ, सर्वासां व्रजवर रत्नसीमन्तिनीनां भावनान्वेषण प्रयास पर्यवसायी फलरुप,स्तत्प्रकाशने तत्प्राकटयकरणे परायणः तदेव निरोध परामर्श विषयनिष्ठः ॥ ननु सर्वाज्ञातो यो गूढार्थः श्रीभागत पीयूष समुद्रतल भागेस्थित समालोडय बहिरानीत स्तदसाधारण प्रयोजनं वक्तव्यमव्यकतस्य निगढहृदयत्वेन व्यक्तिरित्यनुचिततरं यतोऽत्रकश्चन विशेष प्रदर्शनीयो भवति कृपयेति केचित्, सत्यम्। व्रजवर कुमारिकासु षोडश सहस्र संख्यावधिरुपासु"तेषां प्रसाद रुपाशक्तिः स्त्रीभवती"ति,

रसात्मककृष्णवदनानले, रसरसात्मकलीला लोकाखिल सामग्री शक्ति धृक् शकत्या, स्त्रीत्वेन तासु मुख्य श्रीमत्स्वामिनीत्वं, व्याप्य व्यापकत्व धर्मावछिन्नत्वेन विप्रयोग स्थायिभावंरुपं, श्रीमत् कौशलेन्द्र स्वरुपे स्वयं प्रसादरुपा शक्तिः प्रविश्य तावत् शोभनत्वमिति तेनैव पुरुषोत्तमत्वं मूख्य श्रीमत्स्वामिनी भावात्मकमाविर्भावयित्वा तद्वारैव, संपादितवती तेन ते तं भावं समासाद्य पुन गौडदेशे प्रादुभूता पुनर्वरप्रसादाभिप्रायाखिल रसात्मक सामग्री साहित्येन श्रीमद् व्रजेन्द्र व्रजे समागताः पुनर्वृतवरदान प्रस्तावे परमफल दान परम शोभन समये एकैक वस्त्रांतरे श्रीमत्स्वामिनी भावः कृष्णपदार्थैः पुष्टिमार्गे तत्वं स्तं निधाय ताभ्योः दत्तवान् , वस्तुतः स्वामिनी-कृष्णयोः स्थिति कुर्वन तास्वपि द्विदलात्मकत्वं संपाद्य स्वरमणाधिकरणकत्वमेव संपादयामास। ननु पूतना ग्रसितास्तेषां पुंभावा स्तेतु येनस्वरुपेण पूतना स्तनपानं कृतं तस्मिन्नेवासन् गोविंदस्य कलयासित कृष्णकेशविवृतौ सुबोधिन्यां विवृतमस्ति श्रीमदाचार्यचरणैः। तस्मात् श्रीमदवल्लभाग्रे श्वरण कमल किंजल्कांतरीय गलदमंदमकरंद मधुलिड्भिर्मिलिन्दैरपि तद्भिमृग्यैतत्स्थले कश्चन विशेष स्पष्टार्थो विचारणणीयोन्वेषणीयो भवति ॥ इति कृत्वा व्रजवर कुमारिकासु, समूह रसरसात्मक रासाब्धिरुपासु, श्रीभागवत भावाभरण सुषमाः संदोह भूषासु, गुढार्थत्वेन स्थापित युग्मभाव गूढार्थो मया विचार्य निरणायितः। तथैव श्रुतिरुपास्वपि वेणुद्वारा पूर्व वरदान प्रस्तावेनापि लसहत्यैव (इत्यैव) भगवता युग्मत्वं स्त्रीपुंभावत्वं संपादितं,तस्मात्ता स्वपिगुढार्थत्वेन श्रीभागवत-फल प्रकरणीय लीलाब्ध्यधिकरणभूतासु स एवावधेयः ॥ तं समूह रसरसात्मकं रासलीलाब्धिमा-लोडय स्वानुभवादेस्तदेकानुभावन विषयैका ग्रहातिमात्रकत्वात्तमेव प्रकटयितुं प्रकाशयितुं स्वीयेषु तदितर साधनरहितेषु तथैव संपादयितुं परायण इति अत्रायमलक्षकुटीरस्थो भावो मया निरुपितोस्ति ॥ परंतु बोधार्हा अपेक्षात् ते कुतः, यस्तत्प्रकाशने तत्प्रकट करणे परायणः तदेक-भावनाभाव विषयनिष्टः, एतेन श्रीभागवत गूढार्थ विचारकत्वेन सांद्रगत मुखारविन्दफल वियोगानल मार्गीय परम पुष्टिमार्ग प्रकटन सामर्थ्यं मुखारविन्दफल रसानुभवाग्नि भक्तिमार्गा चार्याणामेव नान्येषामेतन्मार्गाज्ञानाद विचारकत्वमेवेतिज्ञापनायोक्तं श्रीभागवत गुढार्थ प्रकाशन पराण इति ॥ अत्र प्रकृते श्रीमदाचार्यणां, रसात्मकस्य ब्रह्मणो भगवतः स्वरुप लीलादेः, व्रजवरघोष रत्न सीमन्तिनीनां, वनप्रसूनलता तृणपर्यंतानांच, ब्रह्माभ्यांतर भेदेन परम रसरुपत्वात्, शुद्ध रसात्मकाग्न्यवयवात्मकत्वात् ब्रह्माकारता कृष्णकर पद्मादि युक्ततैवावधेया॥ ननु श्रीभागवते मुक्त्यादेरपिफलत्वं निरुपणात्कथं भवद्विचारितस्यैव निगूढार्थत्वेन फलत्वमिति चेत्सत्यम। रसात्मक मुखारविंन्द फलवियोगानलैः श्रीमदाचार्यचरणैः फलप्रकटणीये रसात्मके श्रीभागवते पूर्वोक्त प्रकाराभिव्यंजकया प्रणालिकयैव फलस्यैव फल रुपत्वं निश्चितमस्ति नान्यस्यैवेति श्रीशुकैरपि श्रीभागवतस्य निगम कल्पतरोरिति श्लोकेपि फल प्रकरणीयाभिप्राय समुदायमभि-प्रत्यैव रस समूहे फलरुपे रासे एव फल निरुपणे पिबत भागवत रसमालयमिति एतन्मार्गीय फलस्यैव फलत्वं निरुपितं नान्यस्यैव फलत्वं ॥ निगम कल्पतरोरित्यनेन श्रृंगार कल्पतरुरितिभावः व्रजवर वन्यंतरितो यः श्रृंगार कल्पतरु स एव निगमकल्पतरुः निगमत्वमनुक्तसिद्धं रसरसात्मकाणां श्रुतिरुपाणामस्त्येव। अत एवोक्तं भजे व्रजवनी श्रृंगार कल्पद्रुममित्यादि वाक्यैरपि तदेवावगम्यते ऽवधेयमपि तदेव तदीये नान्यत् ॥ तासां समुदायित्वेन वियोगाग्न्युत्कट भाव सांद्रेण भवत्येव व्रज वनीत्वं, तस्मिन्नैवोद्भूतो यः श्रृंगार द्विधांगभूतो रमण पुरुषोत्तमः कल्पतरु, स्तेनास्मिन्मार्गे उच्येत निगम कल्पतरु स्तस्माद्गलितं श्रीशुकभाग्यवशात् फलप्रकरणीयं परमफलं, विविध रसानुभव रसै स्तन्निरोधरस स्वादजा-त्यंतोत्कटभावैः निभृतं, सर्वांशैरंकुर कंदल शाखादिभि र्ज्ञान क्रिया शुद्धफलरुपैः साधनैः फलरुपं रसावयवति मात्रकं, तद्रसमनुभूय तद्रस भावुकेभ्यः प्रक्षेपितं निरवधि निखिल रसालयं

यत् उक्त निगमकल्प तरोर्गलितं फलं शुकमुखादमृतद्रव संयुतं पिबत भागवतं रसमालयं मुहुर्मुहुः रहो रसिका भुविभावुका इति ।। शुकमुखादमृतद्रव संयुतत्वोक्तया तत्फल प्रकरणीय श्रीभागवत व्याख्यानावसरे शोभन समये तावत् परिमित काल एव शुकस्य शुद्धाविर्भावादेः संसर्गतो मुखवाण्यादिष्वपि साक्षात् क्रिया श्रृंगार रसात्मक पुरुषोत्तमाविर्भावाति मात्रक प्रसंगात् स्वरुपलीलानुभवामृत रसरुपत्वमेवाभूदित्यत उक्तं शुकमुखादमृतद्रव संयुतमिति ।। द्रवत्वेन-रसानुभवादेः रसाधिक्यं सूचितम् ।। किंच, मुखारविंद फल वियोगानल विक्षोभयोगाधिक्य संस्पर्शोपि तत्समये तस्य देहेंद्रियाखिल विषयार्थेषु ध्वनितः । अग्ने विक्षोभसंस्पर्शात् यथा धात्वादीनां कठिनांगभूतानां द्रवत्वस्याप्यभाव स्तथैवात्र नैर्गुण्यपरिनिष्ठानांतद्धर्मात्रिह विशिष्टानां द्रवत्वस्यातिदुर्लभत्वात्शुके तद्दर्शनादुक्तं शुकमुखादमृसद्रवसंयुतमिति ।। ननु नैर्गुण्यपरिनिष्ठे-श्रीशुके साक्षाद्भगवन्मुखारविन्द फल वियोगाग्नि विक्षोभसंस्पर्शाधिकरणाभावे कथं तत्संस्पर्शज देहेंद्रियार्थेषु तत् द्रव समवायित्वस्यासन्निधावमृतत्वमभूदिति चेत् सत्यम् । तन्नु स्वयं श्रीशुके-नैवोक्तमस्ति"परिनिष्ठितोपि नैर्गुण्ये उत्तम श्लोक लीलया ग्रहीत"इत्यादिषु यदंशेन नैर्गुण्य-चेतसा विविध रसात्मकस्या प्रमेयस्यानंदमात्र गुणात्मनो लीलाद्यनुभव ग्रहणं भवति तत्कारणंतु नैर्गुण्येऽक्षरब्रह्मण्येवास्ति, यतस्तस्यापि ब्रह्मांडातीतस्य वेदातीतस्यमनन निदिध्यासादिभि दर्श-नार्तिस्तिष्टत्येव तदार्तिशमनाय ।। किंच, मूलसृष्टे ब्रह्मानंदानुभवैच्छोद्रेकेणापि श्रीमद्व्रजेन्द्र सद्मनि व्रजे स्वयं परब्रह्मरुपेण प्रादुरासीत् तस्मात्तदार्त्यंशभूताः शुकादयः आदि पदेन नारदादयोपि क्रोडीकृता स्तैरपि तथैव भगवद्गुणगानादिकं कृतं गीतं वर्णितं च, तदार्त्यंशावयवत्वेनेति सर्वमवदातं तेषु शुकस्य तदंश विभागत्वेंशविभागाधिक्यात्तदार्त्तेराधिक्यादस्य पर ब्रह्म कृष्णलीलया चरितस्य ग्रहणं तेन वर्णितमखिल रसात्मक ब्रह्मणो भगवतो लीला चरित्रादिकमिति भावः ।। यत उक्तं शुकमुखादमृतद्रव संयुतमिति । तस्मादेव तदग्नि संस्पर्शज भगवद्रस संस्पर्श संसर्गत एव राजऋषिरपि ज्ञानाग्नि दग्धदेहोऽभूत्तस्य मर्यादांगातिमात्रकत्वात् पुष्टिय्यंशांगभूतस्याग्नेरपि योगमायाभिप्रायेण सम ज्ञानांगपरत्वेन दाहकादिकमभूदित्यत उक्तं निबंधतत्वदीपके ज्ञानाग्निदग्ध देहस्य न दाहोलौकिको मत इति कृतासर्वत्र साक्षाद् भगवद् मुखारविन्द्फल वल्लभाग्नेः साक्षात् भजनानंद फलरुप कृष्णकरपादादि युक्तामेव संपादयतः कारणमवगंतव्यं दाहक शक्त्याति-मात्रकत्वान्मूललीलादिषु साकार ब्रह्मत्वस्यैव स्वतापाग्निमार्गेण संपादकत्वाच्च । तत्रत्वस्मिन्मार्गे राजऋषि ज्ञानाग्नि दाहापेक्षया प्रकटित शुद्ध मुखारविन्दफलगियोगानल मार्गस्थानां तदीयानां तद्विरहाग्निना तद्दाहकाशक्त्या भस्मसाद्भवितव्यमिति परमफल पर्यवसायित्वं वा फलपर्यवसा-यित्वमिति विमृग्यं भवति ।। यत्रमर्यादापुष्ट्यंगभूतस्य राजऋषे ज्ञानाग्नि दाह संस्कार पूर्वकैव मुक्ति सदर्शनस्य संव्यक्ति, स्तत्र तदीयानां शुद्धपुरुषोत्तमास्याग्निदाहाभावे कथं लीलोपयिक देहादि संघातेन समं मूललीलामध्यपातित्वंसेत्स्यति न कदापि इत्यर्थः यतो निगम कल्प-तरोरिति श्लोके पिबत भागवतं रसमालयमिति वास्तवत्व निरुपण प्रस्तावे शुकस्यापि संक्षेपेन व्यवस्था निरुपिता मया । रसात्मक फलात्मक श्रीभागवतस्यापि यत्र फलं तत्रैव तस्मिन् रसः । यथा फलान्तेर बीजानि बहुनि भंवति तथैव स्वरुप लीलारस भाव भावना तारतम्येन प्रमेया-चिंत्यरुपरुपकवंताग्नि बीजामृत बीजाभ्यां बहुनिसंति, नित्यत्वात्तस्य पर्यवसायित्वेन फलत्वं रसत्वं चावगन्तव्यम ।। तत्तुफल प्रकरणीय एव रसात्मके भागवतेऽतो रससमूहात्मकत्वं फल प्रकरणीयस्य रासादेरनुक्त सिद्धमस्ति । तस्मादत्रैव स्थित्वा सुखेनैव यावत्पर्यन्तं श्रीमद्व्रजेन्द्-कुमारस्वरुपं, स्थायिविप्रयोग रसघनीभूतं, सजलजलदालिनिभव्रतं, तद्गत परमसौंदर्यं, रासाद्यनेक लीला स्वरुप गुणगानादेः साकारातिमात्रक विधायकं आधायकं कृष्णशब्देन परंवस्तूच्यते, तदेव " कदाचित्परम सौंदर्यं स्वहृद्गतं प्रकटं करिष्यामीतीच्छया साकार

प्रादुर्भूतं सत् श्रीकृष्ण " इति कृष्ण मुखारविन्द फल वियोगाग्नि परमसौंदर्य पीठिकाखिल सामग्री मूर्तिमान, निगूढ हृदयाशय, स्पष्टकरादर्शाभिव्यक्त्यांतरितस्य लीलादेः स्वरुपं च यावत्पर्यंतं हृदयारूढं न भवेत्तावत्पर्यंतं तत्स्थायित्व संसिद्धये ज्ञान विज्ञान क्रियासंसृतेः पोषणाय च चित शुद्धिवैराग्याद्यर्थं च द्वादशांगभूते फल प्रकरणीयातिरिक्ते विचरेयुः पुष्टिमार्गीयाः साधनदशाखिल क्रिया पराः, ननु फलप्रकरणीयानुभवाध्यासातिमात्रकाः, वस्तुतस्तत्स्वरुपानुभवामृत रस पाना स्वाद निरोध निसर्गत एव तदीया स्तद्भावुका ब्रह्मानंद प्रपंचेभ्यः प्रकृति प्राकृत प्रपंचेभ्य स्तदनुभव व्यतरेकादिभ्यो विमुक्ता भवंत्यनायासेन तत्स्वरुपानुभवौत्पत्तिक प्रकृतित एव । चेदेतत्स्वरुपानुभव स्थित्यनंतरमपि तदितरे मनोवृत्तेः संसृतिः स्यात्तदात्ववगन्तव्यं हृदि तत्स्वरुपानुभवादेः स्थितिरेवनास्ति नाभूत् विरहाग्न्यनुभवस्यापरिपाकात् । तस्मात्यत्कर्त्तव्यं तत्फलात्मानुभवरंग भुमिकायामेव स्थित्वा इति मार्गस्थित्याग्रहस्य परम सौष्ठवत्वं परम फल पर्यवसायित्वं परम फल रुपमेव ॥ ननु पिबत भागवतं रसमालयमिति पदैः कथं तस्यैव फलत्वमायातीतिचेत्, अत्र वदामः । श्रीमदभागवतस्य शब्दात्मकत्वात् श्रवणस्यैव प्राप्तत्वात् श्रुणुत इति पदमनुक्त्वा यतो रसं पिबतेत्युक्तं तेन श्रीभागवते शब्दप्रतिपाद्यः कश्चनासाधारणो रसोस्तीति स तु मया फल प्रकरणे प्रदर्शितो ज्ञायते, तस्य विचारे क्रियमाणे " तस्यैव हेतोः प्रयते"तिश्लोके भक्तौ एव पुरुष प्रयत्नस्योक्तत्वात् श्रीभागवत प्रतिपाद्यो रसो भक्तिरस एवेति निश्चीयते । भक्तिरसो मुख्य भक्तिरस, स्तद्रसाखिल सामग्री मूर्तिमन्मुखारविन्द भगवतो द्विधा श्रृंगार रस रुपस्य, तदनुभवाग्नि विक्षोभसंप्रसार विधिना व्रजवरघोषरत्न सीमन्तिनीषु तद्भक्ति रसाधिकरण भुतासु तद भक्ति रसस्यातिव्याप्ति, स्तत्प्राप्तेः परमफल विधायिकायाः संदर्शनं शारीरी लीलायां फलप्रकरणीय शब्द संदर्भ भावार्थाभिज्ञापकायामित्युपक्रमेणापि फलत्वं भक्तिरसत्वं विविधरसरसात्मकत्वं लीलात्मकत्वं स्वरुपात्मकत्वं परात्परब्रह्मात्मकत्वं फलप्रकरणीयस्य भागवतस्यैवायाति इतिनिश्चीयतेपि तदाग्रहवशादस्माभिरपि तथैव च तस्य वास्तवी स्थिति स्वाच्छंद्यत्वेन प्रदर्शितास्ति ननु किमपिविरोधबाधोत्रशंक्यः॥ तद्भक्तिरसामृत पानमंतः प्रवेशनमेव पानं यथा दुग्धादे र्मुखद्वारा अन्तः प्रवेशनमेव पानं तथा श्रीभागवत प्रतिपाद्य पूर्वोक्त भक्तिरसस्याप्यंतः प्रवेशनमेव पानं, यद्यपि श्रीभागवते भक्तियोगो बहुविधः, भक्तियोग स्तत्फलसाधकः निरुपितोस्ति तथापि श्रीभागवते न तस्य मुख्यत्वं मुक्त्याधिक फलसाधकत्वात् । श्रीभागवत प्रतिपाद्य परम भक्तिरसस्यालयत्वं रस पीठिका स्थानं च कथने नात्र आङ ईषदर्थ वाचकत्वे फलपदस्य मुक्तिवाचकत्वेन । अऽक्षण्वतां फल मिदमिति फलं मुक्त्याधिक फलसाधकत्वात् शुद्धपुष्टिभक्तिमार्गीयस्यैव परम फलत्वं नान्यस्येति प्रमेयरुप प्रमाण पूर्वक प्रतिपादन सामर्थ्यमाचार्यचरणानामेव नान्येषामितिज्ञापनायाहुः श्रीभागवत गूढार्थ प्रकाशनपरायण इति ॥ किंच श्रीमद्वल्लभाग्नि मुखकमल किंजल्कानि र्वचनीय सौगन्ध्य सामग्रीभि रभिभृता सुबोधिनी भावार्थं निखिल प्रमा परम प्रमेयरुपा तत्प्रकारांतरेणाप्यध्यवसीयते ॥ भगवान् चतुर्मूर्ति गोविन्दकलयाक्रमेण वसुदेव ग्रहे आर्विर्भूत इति तु निस्तुयः कृतः श्रीमदाचार्यचरणैः । यद्यपि भगवान् चतुर्मूर्ति न भवेत् तदैव चतुष्टयं कार्यं न संगछेत, पुतनासु पय पानेन तन्मोक्षः शकटोपमर्दः यमलार्जुन मध्यगमनं तदुन्मुलनं च, नहि वासुदेवादन्यः मोक्षंदातु शक्तः, नहि संकर्षणादन्यःस्पर्शमात्रेण नाशकः, नह्यनिरुद्धादन्यो नारद शाप विमोक्षार्थ सान्निध्य निरुपणेन वृक्षयोरंतराग्च्छति, नहि पद्युम्नादन्यः शाप जन्म मूलोच्छेदपूर्वकं पूर्वस्थित देवता जन्म संपादयति, भगवतैव स्थाप्यते इत्यादि श्रीमदाचार्यचरणलेखादवगम्यते ॥ चतुसुर्ते भगवतः स्वरुपमिदमेव, चतुर्णां समुदायत्वे

कलयेत्युक्तत्वाद्रसात्मक पर ब्रह्म पुरुषोत्तमस्तु स्वयमस्पर्शो भिन्नेवास्तीति निस्तुषोजातः सर्वश्रुति श्रीभागवत स्मृति विरोध शंका परिहार पूर्वकः । पुनरुक्तं, तस्मात्प्रमेय बलेनैव सा मुक्ति इति मंतव्यं । प्रमेयं च शुद्धपरब्रह्म न केनाप्यंशेन, तथासति तादृशस्य मुक्तिदाने समर्थत्वं न संभवति ॥ अतः साधन व्यतिरेकेणैव साध्यकरणान्मुक्तिदान च साक्षात्पुरुषोत्तमः कृष्ण इति पूर्वलेखोऽयं लेखश्च द्वयो र्भावार्थानुरोध संगत्यैक वाक्यार्थः कथं संगछति, तस्मादेवात्र दृढत्वेन विमृग्योस्ति भावार्थः संदर्भ स्तदीयैः शुद्धपरब्रह्मोपसकैः, परन्तु अत्र विचार परामर्श स्तुकेषां ये केवलरसात्मक श्रीमद्यशोदोत्संगलालित परम ब्रह्म रसरसात्मक स्वरुपानुभवामृतपानैक प्रमत्ताः सन्ति, नतु तदितराणां, तद्व्यतिरिक्तानां तु तादृशानुभवामृत रसपानास्वाद निरोध व्यावृत्यभावे द्वादशांगभूते श्रीभागवते सर्वत्रैव रसात्मकत्वं शुद्धब्रह्मत्वमस्ति, परंतु वस्तु विचारे क्रियमाणे स्यात् कथं ॥ तस्मादत्र श्रीमद् वल्लभाग्निचरणानां परमकृपातुल्यातिशय सामर्थ्य लव संस्पर्श पूर्ण प्रमेय बल संग व्यासंग प्राचुर्यत एव तदीयानां तद्रसानुभवामृत रसपानप्रेप्सूनां शुभावैव किंचिंत् सुबोधिनीहार्दं लिखामि, अतः साधन व्यतिरेकेणैव साध्यकरणान्मुक्तिदाना च साक्षात्पुरुषोत्तम कृष्ण इति ॥ अत्रायंमाशयः , मानुष्यं लोकमासाद्येति श्लोके सुबोधिन्यां मनुष्यलोकं मानुष्यभावं शिशुभावं चासाद्येत्युक्त्या शिशुभाव प्राप्त्यंतरे तच्छिशुभावांशेन साक्षात्पुरुषोत्तम कृष्णस्य पर ब्रह्मण आविर्भाव मात्रं निश्चीयते स्वीक्रियते च नतु साक्षात्पुरुषोत्तमः॥ नहि वासुदेवादन्यो मोक्षंदातुंशक्त इत्युक्त्या तत्स्तन पानं तस्यः मोक्षदानं च तत्स्वरुपेण विनिश्चितमभूत् श्रीमद्वल्लभाग्निलेखात् ॥ पुनरुक्तं साधन व्यतिरेकेणैव साध्यकरणान्मुक्तिदानाश्च साक्षात्पुरुषोत्तमः कृष्ण इति कृत्वाविर्भाव तत्समये शिशुभावांतर एवावधेयो विज्ञेयो भवति। शिशुत्वस्य पुरुषोत्तमांगभूतत्वान्नतु वासुदेवस्य, अत स्तत्पानं च शिशुनैवकृतं । किंच सा प्राण हारिणी उलुकिका व्रजवर घोषरत्न सीमन्तिनी वेश विडंबनं कृत्वैव श्रीमद् व्रजेन्द्र सद्मनि समागता स्थिता, तद्वेष शिशुवेषयो र्वस्तु विचारणामिथो रसात्मकांग भूतयोः सजातीयत्वात् पुरुषोत्तमस्याविर्भावाधिकरणकत्वा त्तच्छोभन समये पुरुषोत्तमस्याविर्भाव एव जात स्तस्मिननिति विनिगमकं, विनिगमकाभावे तन्मोक्षदानस्याप्यभावः स्यात् , पुरुषोत्तमकृष्ण स्यापि च तत्राविर्भाव एव कारण इत्युच्यते । किंच आविर्भावस्यापि तारतम्याद् भगवद् गुणगानादिभिः अप्यविर्भावो रसात्मक ब्रह्मणो भगवतः सर्वत्र लीला लोके भवति ॥ यथा वेणुनाद श्रवणाद् गोद्विजद्रुमादिष्वभूत्। नहिबलभद्रो व्रजेशस्यपुत्रः किंतु कृष्णावेशान कृष्ण एवाविशतीत्युक्त्यापिच बलभद्रे आवेशमात्रमेव निरुपणात्कृष्णत्वं निरुपितं नतु निसर्गत स्तस्मिन् पुरुषोत्तमत्वं कृष्णत्वमिति लेख प्रणालिकयैव मार्गमर्यादां, केवल रसात्मक रमण प्रिय मुखारविन्द फल विविध रसानुभवामृत पानज निरोध परिनिष्टामांस्थायैवाविर्भाव, एवमंश कलात्मकेऽवतारादिषु मंतव्यो भवति ॥ किंच साक्षात्प्राकटयं रसात्मकस्य ब्रह्मणो भगवतः श्रीगोपराज गृहे एव वर्तते, पुरुषोत्तमस्तु नंदगृहे एव माययासह जात इत्यादि वाक्यैरपि पूर्ण पुरुषोत्तमत्वं कृष्णत्वं परब्रह्मत्वं श्रीगोपराजगृह एवास्ति नत्वन्यत्र । इतोहेतोरपि तत्सन्निधानोग्र महिम्न एव तदिच्छयैव साधन व्यतिरेकेणैव तस्यामुक्तिदानमभूदित्यत्र कः संदेह, संदेह स्तत्तदर्थानवगमादेव तदर्थाम्रे स्तद्विमर्श मध्यपातात् न कश्चन संदेहोस्ति, तस्मात् चतुमूर्ति भंगवत्यन्येऽवतारादिष्वपि भगवादाविर्भावस्यांशांश विभागोत्कटत्वस्य प्रदर्शकस्यैव संनिधानात्तेषु पूर्णत्वं परब्रह्मत्वं पुरुषोतमत्वं नतु स्वाछंद रीत्या, अनेन प्रकारेण यदि साक्षाद्भजनानंद पुरुषोतमस्यानन्य गोकुल स्वामिनो भजनपराः परि शोधका भवेयु स्तदैव तेप्यनन्या भजनीया अपि भवंति नो चेद् भजन व्यभिचारदोषादि संपृक्ता वेदितव्याः । नतु शुद्ध भजनांग भृता इति सर्वमवदातम् । किंचात्र तदीयानामेतद्भाव संपत्ति र्दाढय करणार्थमिदमेव भाव संदर्भादिकं श्रीमद्वल्लभाग्निभिरणुभाष्ये प्रपंचितमस्ति तदेव वच्मि ॥ ननु

अथर्वणोपनिषत्सुपठयते सहोवाचाब्जयोनिः योवताराणां मध्ये श्रेष्ठोवतारः को भविता येन लोकास्तुष्टा देवास्तुष्टा भवंति, यंस्मृत्वा मुक्ता अस्मत्संसाराद्भवंति कथं चास्यावतारस्य ब्रह्मता भवति, सहो वाचत नारायणोदेव इत्युपक्रम्य मथुरा स्वरुपं निरुप्य निगद्यते, यत्रासौ स्थितः कृष्णः स्त्रीभिः शक्त्या समाहित इति तेनास्यावतारस्य शेषावताराणां मध्ये श्रैष्ठ्यं निरुप्यते । श्रीभागवतेपि च एते चांशकलाः पुंसः कृष्णस्तुभगवान्स्वयमिति गीयते । पूर्वोक्तरीत्या तु सर्वतुल्यता प्रतीयते इतिनैकतर निर्धार संभवति । किंच ब्रह्मणो निरवयवत्वेनैकस्यांशित्वमन्येषां तदंशत्वमित्यपि वक्तुमशक्यमिति प्रातेभिधीयते । "सत्वं यस्य प्रियामूर्तिः" विशुद्ध सत्वं तव धाम शांतमि"त्यादि वाक्यैरप्राकृतो भगवत् स्थानभूतः, सत्व नाम भगवद्धर्मरुप एव कश्चनोस्ति । यादृशेन रुपेण भगवान् कार्यं कर्तुमिच्छति तादृग्रूपं तंप्रकटी कृत्य तस्मिन्स्वयमाविर्भूयायः पिंडे वन्हिवत्तत्तत्कार्याणि करोति, यस्मिन्यस्मिनवतारे स सोंश इत्युच्यते, तत्रहि विग्रह स्तत्राविर्भूतं ब्रह्मस्वरुपं च प्रतीयते, विग्रहस्य सत्वात्मकत्वेन धर्मरुपत्वात् तत्राविर्भूतस्यैव ब्रह्मत्वात् समुदितस्यावतारत्वेन गणनात्त्वैकस्यैवांशस्य तद्रूपत्वं यत्तदेवांशत्वं, यत्राधिष्टानमनपेक्ष्य स्वयमेव शुद्ध साकारं ब्रह्माविर्भवति भक्तार्थं सः स्वयं पूर्णभगवानुच्यते ॥ एतदेव च श्रैष्ट्यम्, अत एव सर्वतः पाणि पादांतत्वं स्वस्मिन् स्फुटं ज्ञापयितुं तोकादि भावेनाविर्बभूव, तेन यादृग् यादृग् लीला विशिष्टं यद्यद् बाल्य पौगन्डाद्यवस्था विशिष्टं तद्रूपं नित्यमेवेति वयं जानीम इत्यादि लेखान्मदुक्तार्थ संदर्भस्यैव सौदृढत्वं, तद्भजन पराणां परम भजन पर्यवसायित्वेन परमफलरुपं, नेतोऽधिकंफलमन्य संमेलने इति यावत् ॥ इतिनिस्तुषादप्यन्यतरेष्ववताराद्दिषु भजनोपासनाग्रहादेः दर्शनान्न ते साक्षाद्रसात्मक भजनपरानन्य । येषामिति आग्रह इत्यपि मंतव्यम् ॥ "अनन्या श्चिन्तयंतोमां ये जना पर्युपासते तेषां नित्याभियुक्तानां योग क्षेमं वहामी"ति भगवद् वाक्यादिनाप्यनन्यानां भक्तानांमेव भक्तियोग संप्रदाये मुखारविन्दफल वियोगाग्न्यनुभवज निरोध योग संप्रदाये भगवतैव रक्षणादिकं क्रियते । पर्यासंमंतात्स्वंरुपानुभवाद्दिभिरनन्याः यत्किमपि किंचिदपि करोति भाषणादिकं तत्तु मां श्रीमत्स्वामिनीनां निगूढभाव विषयमास्थायैव, यत एत एवानन्य स्तानेवाहं मद्भजनपराः स्पष्टयामि जानामि च । तेषां भजन व्यवहार व्यासंगादावहमेव रक्षकोऽहमेव पाताऽहमेव नियंताऽहमेव नर्मदोस्मि नान्यत् यत उक्तं योग क्षेमं वहाम्यहं ॥ येन मुखारविन्दफल वियोगाग्न्यनुभव शुद्ध संप्रदाय योगेन केवल पुष्टिभक्ति रसाकृतिमतांनित्याभियुक्ता योगिन आभवद् तद् योगांतरे यथा तद् योगानुभवादेः संप्रवृत्यनवछिन्नत्वेन यथाभवेत् तथैवाहं तद्योगरक्षितुं तन्मार्गीय मोक्ष मंगल शुभाय तत्परोस्मीति द्योतितम् ॥ तस्मादस्मिन्प्रकटित श्रीमद् वल्लभाग्निमार्ग स्थानां पूर्वोक्त प्रकारेणानन्य संप्रदायः परमफलप्रदोस्ति सर्वै प्रकारैः इति हेतोस्तैस्तथैव कर्त्तव्यो मार्गस्थिति मर्यादयेति मे शिक्षाग्रहेपि गवेषणीयो भवति तैः, तस्मादवताराद्दिषु चतुर्णां वासुदेवादीनां कार्य संप्रवृत्तिष्वपि तदाविर्भाव संमेलनेनैव पुरुषोत्तमत्वं परब्रह्मत्वं ध्वन्यते, नतु स्वाछंदरीत्येति बोधव्यमित्यन्वेष्टव्यं ॥ किंचान्यदपि आविर्भावस्य द्विधर्मत्वं यत्र यत्र मुखारविन्द फल वियोगाग्निरुतरानुभवस्थायित्वेनाधिकरण संप्रदाय स्तत्र तत्र स्वयं प्रादुर्भावः स्वस्थितिं "सुस्थिरे नील जलदे स्थिर सौदामिनीयुते" तदानुपूर्व्यासमं नित्यत्वेन स्थायित्वेन तथैव प्रदर्शयति । स्वस्यानन्य वृत्त्यतिमात्रकत्वात्स्वामिनी कंदर्प निगूढभावात्मकत्वादस्पर्श योगावधिन्नत्वात्तथैव स्वसमवायित्वाधिकवमाकलय्यैव स्थिरो भवति नान्यद्विमर्षोऽपिप्यवधेयो भवति ॥ एतत् च यथा तथा सुबोधिन्यादिषु श्रीमदाचार्य चरणैः प्रपंचितमस्ति । यत्र यत्र साक्षात् शुद्ध रसात्मक ब्रह्म विविध संचित विचित्र भावात्मक मुखारविन्द फल वियोगाग्न्यनुभव

श्रीमद् वल्लभाग्न्युक्तिसारभूतेन, ब्रह्मसूत्राणुभाष्य शुद्ध साकार ब्रह्म प्रदर्शयता परम रस निरोधज संप्रदाय एव नास्ति तत्र तत्र सेवाविर्भावः स्वस्थितिं, यथाद्विज पत्नीषु प्रदर्शनेन कार्यमेव स्वकृतावदानत्वं प्रदर्शितवान तथैव प्रदर्शयति स्वस्य श्रीस्वामिनी कंदर्प भावात्मकत्वात्तत्समवाय सामञ्ज्यादेरदर्शनादि तिभावाइति तु स्पष्टार्थ दर्शनं भगवद्विभूत्यात्मकेष्ववतारादिषु भवति। साक्षात श्रीमत्स्वामिनीनां निगूढकृष्णपदार्थाधिकरण समवायत्वस्य संभावनापि न भाव्या तेष्वप्यस्पर्शपिन, तेषामक्षरब्रह्मात्मकत्वादक्षरब्रह्मणो गणितानंदात्मकत्वाद् ब्रह्मानंदात्मकत्वात्तं दगभूतानामपि तथात्वात्तस्माद्यथा द्विजपत्नीनां स्वरुप दर्शनामृत रसदान प्रस्तावे भगवद् विप्रयोगस्यार्तितापाग्नि प्राचुर्यत्वेनासह्यत्वात्क्षणमात्रमपि प्राणस्थित्यसंभव स्वभावत्वादेकाया एव तत्कालमेव प्राणस्थित्य-दर्शनं तदतिरिक्तानां तथात्वेपि प्राणस्थिति दर्शनमित्यत्र द्रष्टव्यमेकस्यैव स्वभावविपर्यासेन कार्य द्वयं कर्तव्यत्वमनया प्रणालिकयैव बोधव्यमाविर्भाव प्रादूर्भावयो। साक्षात् श्रीमत् स्वामिनी कोटि कंदर्प रुपात्मकत्वात् द्विधात्वमनूक्त सिद्धमेवात्र नकाचिदनुपपत्तिः॥ आविर्भाव व्यस्थात्वधिष्टान-परत्वाद समवयित्वाद्विज्ञेया, प्रादुर्भावोधिष्टान समवाय संबंधातिमात्रकत्वादुक्तं मयाविर्भाव प्रादुर्भावस्योरिति। कोटिकंदर्पत्वेन कृत्वातावंतमात्मानं यावत्य गोप योषित इति कृत्वा ते आत्मन एवोद्भूताः प्रादुर्भूता स्तासां निगूढ भावरुपेण कृष्णपदार्थत्वेन ते एवागणिताः कोटिकदंर्परुपाः श्रीमत्स्वामिनीनां दुःखानुभवाग्नि यँज्ञफलावयव धारिणो यतोऽनेनैव क्रमेण भगवतः कोटि कंदर्प लावण्यत्वं श्रीमत्स्वामिन्याश्च बोधव्यम्, नतु तदितर कोटि मध्यगैः कोटि कंदर्पैः भगवतः कोटिकंदर्पत्वमस्ति, तेषांमक्षरानदं मध्यपातित्वादत्रावसरोप्य-संभावितावतारादिषु। किंच चतुर्मूर्तिमति भगवत्यपि चाविर्भावस्य स्थितिरस्थायित्वात् पूर्वोक्त प्रकार विशिष्टया मार्ग मर्यादयैव यावत्पर्यंतं कार्यं तावत्पर्यंतमेव विबुध्यताम्॥ किंचान्यदपि यत्र यस्मिन् ब्रह्मांडे तस्यैवानंदस्य मात्रा ब्रह्म स्तंभ पर्यंतं तान् लोकान्पुष्णाति, निखिल तदंग सामग्र्यानुपूर्व्यां समं तत्रत्व सात्विक कल्पीय श्चतुर्मूर्तिं भगवान् प्रादुरासीत, पुनस्तस्मिन् परब्रह्मत्वमानंदत्वं पुरुषोत्तमत्व कृष्णत्वं तदाविर्भाव श्रैष्ठ्यं विशिष्टायां भूमिकायां स्थित्वै वक्तव्यं परमोपपन्नं, तत्र विरोध बाधो न शंकनीयो मुखारविन्द फल वियोगाग्नि वल्लभ प्रकटित पुष्टि भक्तिमार्ग स्थैरनन्यैः। कलया बलभद्रेण सह सित कृष्णौ केशौ यस्य स वैकुण्ठ स्थित एव समागत इतिकेचित॥ वस्तुत यः सितकृष्णकेशः गोविन्दस्य कलया संकर्षण रुपत्वात् संहाररुप तामस शक्त्या सित कृष्ण रुपस्य संकर्षण रुपस्य कलया केशरुपेण समर्थत्वात् "ता विभौ वैभगवतो हरेरंशाविहागतांवि"ति वाक्य विरोधात्। तदा"वां परितुष्टो-हममुनावपुषे"ति वाक्य विरोध श्च इत्यादि वाक्यैरेव सितकृष्ण केशयो र्गोविंद कलाया एव कलात्व निश्चयात्पुन स्तस्मादेका मूर्तिरेव मूर्ति भगवानभूत्॥ तत्रादौ सित कृष्णकेशत्वेन किमितिनिश्चीयते॥ तत्रादौ गोविन्दस्य कलाया, गोविन्द स्वरुपात्स्वनिखलत्वं पृथकत्वेन प्रदर्शकायाः, मुखारविन्दे ब्रह्मांड समग्रत्वस्याभिज्ञापकाया, स्तस्मिन्नेष स्व स्थिति बोधकाया, अद्भुत कर्मण एवार्जुनादीं स्तद्दर्शनमभूत्। तत्कलात्मक स्वरुपस्य प्रतिरोमान्तरे अनंत कोटि ब्रह्मांड समृद्धि निरवधित्वेनाचिंत्यास्ति कर्तुमकर्तुमन्यथा कर्तुं सामर्थ्यं तदंगपरत्वेन तदाविर्भावात् पर ब्रह्मत्वं च, इत्यनेन गोविंद कलात्मकस्य रोमादेरपि तदनुभात्मकत्वात्त-त्स्वरुपता एवावधेया नतु रोमत्वं, तस्याखिलाचिंत्य शक्तिमत्वाद्रोमस्याप्यखिल शक्तिमत्वमनूक्त सिद्धमस्त्येव॥ अत एव गोविन्दस्य कलयेत्युक्तत्वात् सित कृष्ण केशौ तयोस्तत्कलात्मक त्वा-त्तत्सर्वभवन सामर्थ्यं मूलविर्भाव स्तत्तदंशेन, तेन तदाविर्भावात्मकत्वात्परब्रह्मत्वं पुरुषोतमत्वं कृष्णत्वं चास्ति एव नात्र कश्चन विरोधः॥ किंत्वन्यदपि सित कृष्ण केशौ ताविर्भावविहन समागतौ किंतु तत कला रोम रुपेण केशरुपेणानंत कोटि ब्रह्मान्डेश्वर्यवतात्तौ समागतौ नतु

केशरुपौ । अत उक्तं सुबोधिन्यां कृष्ण केशो यथावतीर्णो भवतीति । ननु तावन्मात्रं मर्द्दन क्लेशाभावार्थं साक्षादानंदमय : येन स्वरूपेण तद्भावान् परितुष्टोहममुना वपुषेत्युक्त, तस्मिन्नेव भगवदाविर्भाव संपर्कत एवानंदमयत्वमित्युक्तंभवतीति बुध्यस्व । रोम पदं विहाय केश इत्युक्तत्वादन्येभ्योवतारेभ्य एषु चतुर्मूर्तिषु भगवद्भावाविर्भावाति सांनिध्यमात्रकत्वाद् वैलक्षण्यातिमात्रकत्वं ध्वनितम् केशस्य वरांगस्थितेः । तत्रापि प्रद्युम्नः तेभ्यस्त्रितय स्वरुपेभ्यो विशेषो विज्ञेयः तस्य तदाकृत्यधिष्ठानत्वात् । यतो गीतैकादशस्कंधादौ भगवद्वाक्येत्युच्यते, त्तपरब्रह्म स्वरुपेण यदुक्तं तत्सर्वं साक्षाद् भगवदंग परत्वेनन्नैव स्वीकरणी यमित्यपि चास्ति, अपिच विचारणीयं । या सुबोधिन्या श्चारित्यार्थता । प्रथमत उक्तं नहि वासुदेवादन्यो मोक्षदातुं शक्तः पुनरग्रेउक्तं तस्मात्प्रमेय बलेनैव सा मुक्तेति मंतव्यं । प्रमेयं च शुद्धं परब्रह्मनकेनाप्यंशेन, तथा सति तादृशस्य मुक्तिदान समर्थत्वं न संभवति । अतः साधन व्यतिरेकेणैव साध्यकरणान्मुक्तिदानाच्च साक्षात्पुरुषोतमः कृष्णं इत्यादिभिरांतर लापिकाया तदेवावगम्यते । बोधव्य च तथैव तदीयैस्तद्वाग्विलास माधुरी मधुलिड्भिरेव, नान्यै र्बहुशास्त्र शब्दार्थ विणयाक्रान्तैः । प्रमेयं च शुद्धंब्रह्म इत्युक्तया प्रमेयस्यैव शुद्धब्रह्मत्वाद्भग-वदाविर्भाव प्रादुर्भावात्तावत्कालावछिन्नत्व एवतस्य शुद्धब्रह्मत्वा त्तेनैव रुपेण साधन व्यतिरेकेणैव तस्यै मुक्तिदानमभूदिति सर्वं सुस्थं, यत, उक्तं अतः साधनव्यतिरेकेणैव साध्यकरणान्मुक्तिदानाच्च सत्क्षात्पुरुषोतमः कृष्ण इति ॥ साध्यकरणदिति कोर्थः, साधन व्यतिरेकेण पुरुषोतमाविर्भाव साध्य तस्य सांप्रतत्व भवनं स्वेनैव कृष्णाविर्भावेनैवेत्यभिप्रेत्यैवोक्तं साक्षात्पुरुषोतमः कृष्णो न केनाप्यंशेन, तदाविर्भावस्य कलांशधर्मसंसर्गाभावादुक्तं न केनाप्यंशेनेति । सतु साक्षा-त्पुरुषोतमः वस्तुत आविर्भावस्यैव सर्वं भवन सामर्थ्यं परब्रह्मत्वं निरंशकत्वं पुरुषोतमत्वं कृष्णात्वमस्माभि र्निश्चितं । ब्रह्मभूत्राणुभाष्य पूर्णातुल्यातिशयाब्धि तट प्रमेय बलमास्थायैव ननु स्वातंत्रिकत्वेन मया स्वतो निश्चितमिति तत्रैवान्वेष्टव्यं विजिज्ञासितव्यं च ॥ अमुना प्रकारेण सुबोधिन्यादिषु लेखाखिल संप्रदायेषु स्वरुप लीला भेद दर्शने पूर्वोक्तप्रणालिकयैव तदीयैं स्तच्छुद्ध ब्रह्मरुपानुभवामृतरस प्रेप्सुभिर्भ दस्तु कर्तव्योस्ति, तद्विवेकाकरणे यथा समुद्रांतरे महामणि गण परिवृता मध्यनायिक सहित जटितापतिता मुद्रिका पुनरस्या उपलब्धिः सातु दुर्लभतमा तथैव भवति भवेदेव, तस्मादेतद्भजनपराणां स्वभजनोपयोग्यानन्य संप्रदाये शुद्धसमाधिना परामर्शस्त्वनिशं भृशं कर्तव्यः पुष्टिभक्तिमार्गं मर्यादा नियमात् ॥ अतोऽनेनैव प्रकारेण श्रीमद्वल्लभाग्निः श्री भावावत गूढार्थ प्रकाश परायणोबोद्धव्यः । ननु पुष्टिभक्तिमार्गे पुष्टि भक्तिमार्गीय फलस्य मुक्त्यधिक कथनेन स्वरुप लीलानुभवानंदात्मकत्वात्तदनुभवोऽल्प-बुद्धिधियां कथमित्याकांक्षायामनुभवप्रकार हेतु भूतं नाम माहुः साकारेति । साकार यद् ब्रह्म तस्य वादः सोपपत्तिकं मूल स्वरुपानुभवप्रमाणाभिमृतमिति यावत् तस्यैव मुख्यत्वेन स्थापकः प्रतिपादक इत्यर्थः अत्रैक शब्दो मुख्यवाची । साकारत्वमुक्त्वा यद् ब्रह्मत्वं निखिलं स्वरुपानुभवानुरुपत्वेन लीलानुभवानुरुपत्वेन भावानुभवानुरुपत्वेनाधरमारभ्य फलितं माधुर्य यन्निखिल माधुर्य तारतम्यविशिष्टं साकारत्वं निरुपितं, तद्यथा ब्रह्म रसात्मक केवलानंदमयं तथा तद्धाम्नो, निखिल विभूतिषु, पुष्प पत्र तृणादेरपि केवलानंदमयत्वं कृष्ण निगूढभाव करपदादि युक्तत्वात्साकारमेवोदाहृतं. तत्तदंगभूतस्य साकारत्व कथनेन पुष्टि भक्ति रस प्रेप्सूनां पुष्टि भक्तिमार्गीय फलस्य सर्वेंद्रियास्वाद्यत्वं फलानुभवे प्रकार इत्युक्तंभवति ॥ अत एव व्रजधर घोष रत्न सीमंतिभिरपि श्रुतिरुपाभिः श्रीमत्स्वामिनी सर्वात्मभावाधिकारभूताभि र्गीतमस्ति अक्षण्वतां फलमिदमिति श्लोके अयमेव फलानुभव प्रकार उक्तः तेन नानुपपन्नम् किंचित् ॥ ननु इयदवधि सर्व शास्त्रार्थ विचारकैरपि ब्रह्मणः साकारत्व निरुपणात्कथमाचार्याणामेव

साकारत्व निरुपकत्वमित्याशंक्य. तत्रोपपतिमाहुः त्रिविध रसात्मकस्य ब्रह्मणो भगवतो ऽत्यतालौकिकत्वात् ये कुयोगिन स्तेषां चक्षुरादीनां लौकिक प्रमाणत्वान्न तद्रूपकत्वमखिल साकारत्वं च चक्षुरादि गम्यत्वं ब्रह्मणि रसात्मके संभवतीति श्रुतिनामत्यंतालौकिक प्रमाणत्वेन श्रुतय एव रसात्मक ब्रह्माणि प्रमाणमिति तत्प्रतिपाद्यमेव ब्रह्म । तास्तु स इक्षां चक्रे तस्मादेकाकी न रमते सद्वितीयमैच्छत् सह्यैतावानासेति साकारमेव निरुपयंति, गीतासु च सर्वत्रः पाणि पादान्तमित्यादिना च साकारत्वमेवोच्यते ॥ ननु निराकारवादिभिरपि निराकार प्रतिपादने अस्थूलमनणवेहस्वत्याद्याः श्रुतय एव प्रमाणत्वेनांगीक्रीयंते इति कथं निराकारत्वासिद्धिरिति चेत्, अत्र वदामः । निराकार प्रतिपादका अपि श्रुतयो रसात्मके ब्रह्मणि देवाद्याकारवत्प्राकृताकारत्वमेव निषेधंति नत्वानंदमात्रकरपादमुखोदरादित्वं ॥ किंच यदि सर्वथा निराकारत्वमेव श्रुत्यभिप्रेतस्यात्तदा निराकारत्वमुक्त्वाग्रे स इक्षांचक्र इत्यादिनाकारं न प्रतिपादयेयुः ॥ अत एव व्याससूत्रमपि प्रकृतैतावत्वं हि प्रतिषेधति । निराकार श्रुति र्नत्वानंदैकाकारत्वं, तत्रहेतुः ततो ब्रवीति च भूय इति, ततोग्रे भूयः पुनरपि स इक्षांचक्र इत्यादिना साकारत्वमेव वदन्तीति । निराकार वादिनां यत्किंचित् श्रुति ज्ञानवत्वेनापि सर्व शास्त्रीयोपनिषत् ज्ञानाभावात् तासु च प्रकार भेदेन ब्रह्म निरुपणात्तत्र परस्पर विरोध परिहार पूर्वकं विषय व्यस्थया यत्सिद्ध्यति तादृशं ब्रह्मेतिनमंतव्यं, निराकार वादिनां सर्व शाखीयोपनिषत्तात्पर्याज्ञानात् स्वबुध्यनुसारेण यत्किंचित् श्रुति तात्पर्यं स्वकलिपतसिद्धान्तानुमित्याकल्पयित्वा निराकारं वदंतीति न तदुक्तं प्रमाणं ॥ आचार्याणांतु तत् वाग्रूपत्वात् श्रुतीनां तदधिष्टानत्वात् तासामभिप्रायादे स्तदधीनत्वात् तत् श्रुति गताशय समुच्चय प्रकटनेऽनुक्त सिद्ध सामर्थ्यंमस्त्येव । निःश्वसितमस्य वेदा इति वचनात् श्रुतिनांभगवद्वाग्रूपत्वादलौकिकाग्नेश्च तदेक परत्वात्स्वतात्पर्यं निखिलाधिष्ठान वपुषांमाचार्याणा चालौकिकाग्नि रूपत्वात् श्रुतेश्च तदेक परत्वात्स्व तात्पर्यस्य तत्रैव ज्ञापनादन्येषामज्ञानमित्येतदेवाभिप्रेत्योक्तं वागधीशादन्यः श्रुतिगण वचसां भावाखिल तात्पर्यं आसमंतात्सर्वात्मना ज्ञातुं समर्थो न भवति तत्र हेतुः यस्मात्साध्वीत्यादि साध्वीसति श्रुतीनां न भगवदेक परत्वात्साध्वीत्वं । ताः पत्युरेवाग्रे स्व रहस्यं रसोवैसः सर्वरस इत्यादि गूढाभि संध्यंतरित भाव संदर्भ समन्वितं प्रकटयति नत्वन्यस्य, तस्मादाचार्य चरणास्तु तत् श्रुतिनामांतर रहस्य गतान् भावार्थ समुदायानादायैव सर्व शाखीयोपनिषत्तात्पर्यस्य विरोध परिहारेणावगमात्तत्र च साकारस्य कृष्णांतरितस्य परमसौंदर्य वस्तुत एव निरुपणात्तत्सर्वमवगम्यैव साकारत्वंमुक्तमित्यता आहुः <u>वेद पारग</u> इति ॥ वेद पारग इत्यनेन वेदस्याब्धित्वं ध्वनयत् तत्पारे रसात्मक ब्राह्मधाम निगेमनं गति श्चयस्य स इति भावः ॥ ननु रसात्मक ब्रह्मणः साकारत्वं श्रुति सिद्धं भवद्भिरुक्तं, तत्तस्यास्तु, पुनरेकत्वेनानेक रूपत्वादनेक रूपत्वं बिभर्ति, तेष्वपि भवतामते तु साकारत्वम् ब्रह्मत्वं शुद्धत्वं नित्यत्वं पुरुषोतमत्वं कृष्णफलरूपत्वं भवद्भिर्निर्णीयते, एवं एवं सतितद्भजनपराणा मेकान्तिनां भजन शुद्ध समाध्यधिष्टाने तत्तदंशानुरोधित्वेन तत्तदानंदाकारत्वं तत्तच्छुद्धत्वं परब्रह्मत्वं परामर्श प्रयासाधिक्ये प्रयोजनाधिक्या भावादेकस्मिन्स्वरुपे परमसौंदर्य भावाखिल तात्पर्य वपुषि निःप्रत्यूरस्व परम फल पर्यवसायित्वात्तदितरे परामर्श व्यासंग गतौ का वा फलाप्तिरिति चेत्तत्र वदामः ॥ यथा प्रश्नोद्देश कोटि तथैव तत्कुर्तुः समाधानं कर्तव्यमिति परमोपपन्नम । तस्मादत्र प्रमेयात्मकत्वेनैव प्रमाणेनाध्यवसीयते । प्रमेयरूपं प्रमाणमितिकिं भगवद्रूपं, भगवद्रूपानुभव प्रमायुजां, तत्स्वरुप परमसौंदर्य माधुर्य भुजां, प्रामाणिकानां, तु भगवद्रूपाखिलानुभव प्रमा विशिष्टं प्रमेयरुपमेव प्रमाणंनान्यत्, अतः प्रमेय रुप प्रमाणमितिभावः ॥ तस्माद्भगवद्रूपानुभव प्रमा विशिष्टेन, साक्षाद्भगवदंगभूतेन,

सतदाविर्भावरुपेण तत्परब्रह्मस्वरुपेण यदुक्तं तत्सर्वं साक्षाद् भगवद्ंगपरत्वेनैव स्वीकरणी रूपेणांशांश विभक्त व्यासंग संगत्यापि, स्वयैक वद्भावाखिल चरितार्थाभिज्ञापकेन, प्रमाणेनै, वात्र व्यवह्रियते । यतः " सावधाननया श्रृणु व्यासे श्च संमंजसं " इति ब्रह्मसूत्राणुभाष्ये श्रीमदाचार्य चरणैः सम्यक प्रकारेण निरुपितमस्ति, तदेवात्र वच्मि ॥ अथेदं विचाचार्यते । विचार्यत इत्यनेन पूर्वापर संबंधपरामर्शाधिक्यमुक्तं । उपास्येषु रूपेषु बाल्य पौंगडादिकमप्युच्यते । इत्यनेन भगवतास्स रसात्मक रूपेण बालभावादिकमुररीकृत्य यथायथा विहरति तथा तथा तेषु स्वाविर्भावं स्थाप्य तद्विग्रहदिष्वपि स्वरसात्मकतां विप्रयुज्य तदधिष्टानादेरपि स्थायित्वेन साकार रसात्मक ब्रह्मवत्वमेव संपादितमिति प्रदर्शयति च. परन्तु आविर्भाव प्रसंग संसर्गत एवतत्करणे हेतुः स्वस्य रसात्मकत्वात् शुद्धब्रह्मात्मकत्वात्स्थायिभावैकरूपत्वा त्ततदाविर्भाव संप्रदायेपि स्थायित्वं रसात्मकत्वं तद्व्यापकत्वस्य सच्चिदानंद रूपत्वमिति मंतव्यम् ॥ सच्चिदानंदादीनां वृंदावनादिषु संव्यापकत्वात्तेषामवयवादिष्वनेक रासाद्यनेक भाव संपत्तिर्दर्शनाद्या सच्चिदानंदादेरपि तथात्वोपयोगित्वात्तथात्वमेव मंतव्यम् ॥ बालभावादिषु पुरुषोतमाविर्भावस्य नित्यत्वात्तद्भाव एव ग्रहणीयो भवति ॥ तद्भावातिव्यात्प्यासमं तद् बाल्याद्यवयवादेरपि नित्यत्वमस्ति, तत्रापिहेतुः । अवयवादीनामधिष्टान समवायित्वात् शुद्ध सत्वात्मकत्वात् तदंग परत्वेन नित्यतावधेया, नतु बालविग्रह परत्वात् । भगवदाविर्भाव बालभाव एव नतु अधिष्टाने, विग्रहे तत्संसर्गत एव तद्विग्रह पर्यवस्यत्वेन तस्यापि तथात्वान्नित्यत्वं । इति वैचित्र्यं तु योगमायाद्भूतकर्मण एव भवति ॥ भगवत्सन्निधौ तस्याः सन्निधानत्वस्यापि नित्यत्वा"त्पुरुषोतमस्तुनदंग्रह एव माययासहजात"इत्यादिनापि च । अत एवोक्तमणुभाष्ये"यत्राधिष्टानमनपेक्ष्य स्वयमेव शुद्धसाकार ब्रह्माविर्भवति भक्तार्थ स स्वयं पूर्णो भगवानि"त्यनेन अधिष्टानापेक्षां निरस्य, स्वयमेव शुद्धं, परमसौंदर्यावयवमात्र द्विधांगभूतं, ब्रह्माविर्भवतीत्यनेन यथाऽक्षर ब्रह्मणोनंतकोटि ब्रह्मांडे व्यापकत्वात्, तत्सत्तातिमात्रकत्वात्, सर्वांगैः सत्यत्वस्यैवप्रमानात, सर्वंखल्विदंब्रह्मे"त्यादिनापि ब्रह्माकारत्वमेवोच्यते, तथैवरसात्मक ब्रह्मणो व्यापकत्वान्मूलधाम्नि, रसात्मक ब्रह्मणि, गुल्मलतौषध्यादिष्वपि तद्रसात्मक ब्रह्मसत्तातिमात्रकत्वं, तत्स्वरुपात्मकत्वं, लीलारसभाव भावात्मकत्वमेवोच्यते, तथैव बाल्यपौगंडाद्यवयवेष्वपि तदाविर्भाव संघातानुभावेन कथं न स्वरुपलीला रसभावात्मकत्वं मंतव्यं, किंतु मंतव्यमेव। परन्तु बालभावयोस्तारतम्यज विशेषमाकलय्यैवेति सिद्धान्तः भक्तिमार्गस्तांत्रिकैः ग्राह्यो भवति ब्रह्मपदस्यायमेवाशयः । तदनुकरणस्य हेतुं स्पष्टयंति भक्तार्थमित्यनेन सृष्ट्युत्पन्नानां भक्तानाँ तदनुकरणाभावे देहेंद्रियप्राणांतःकरणादिभिरनुव करणस्यानुपपत्ते, स्तदुद्धार प्रयत्नादिष्वपि वैयर्थ्यापत्तेः सा सृष्टिरपि व्यर्था स्यादित्यभिसंधायैवोक्तं भक्तार्थमिति ॥ स स्वयं पूर्णो भगवानित्युक्तत्वात् किं द्योतितं, सः पुरुषोत्तमः शुद्धतरः स्वानंदानुभवैकमात्रकरपादमुखोदरादि रुपः सौंदर्य साकाराखिल विभूति मूर्तिमान् पूर्णो भगवानाविर्बभूवः तदतिरिक्तानामवताराणां कलांशांशिकानां तत्साकार शुद्धब्रह्मपूर्णत्वस्याभावादक्षरात्मकत्वात्तस्य ब्रह्मानंदात्मकत्वात् पूर्णं भगवत स्तदतीतत्वाद्भजनानंदात्मकत्वात्तयोरस्पर्शानिर्वचनीयो विशेष एव प्रदर्शितः श्रीमदाचार्य चरणैः । एवं शुद्ध रसात्मकस्य ब्रह्मणो भगवतः शुद्धत्वं साकारत्वं ब्रह्मत्वं सर्वेभ्योऽस्पर्शत्वं पूर्णत्वं निरुप्याग्रे तद्विवक्षाधिष्टानमनधिष्टायैव वक्ष्यति । सर्वतः पाणि पादान्तत्वं स्वस्मिन् स्फूटतरं ज्ञापयितुं तोकभावेनाविर्बभूवः ॥ तोकभावेनाविर्भूवेत्यनेन भावात्मकस्यभाव एवाविर्भावः । स्वस्याधिकरणस्य समवायित्वस्यातिमात्रकत्वात् तद्भावातिप्राचुर्याद्रसप्रकरणीयलीला पर्यंतं तदवयव विग्रहादेरपि तथात्वात् तद्भजनपराणां भजन मनन निदध्यासनादिष्वपि न विरोध बाध शंका काचन । तदनंतरं तु शुद्ध सत्व धामाधिष्टानत्वादक्षर पर्यवसायित्वात्

द्विग्रह व्यवस्था द्वारिका पर्यंतमवधेया सुधिभिर्मुखारविन्द फलयोग शास्त्रतांत्रिकैः ॥ अत एवोक्तं तेन यादृग् यादृग् लीलाविशिष्टं यावद् बालपौगंडावस्थादिशिष्टं तत्तद्रूपं नित्यमेवेति जानीमः, नचैवं सच्चिदानंद विग्रहोक्तिः (सर्वत्र विग्रहोक्तिः) सर्वत्र विरुद्धाभवेदिति वाच्यम्, इत्यनेन पूर्वोक्तप्रकारेण यत्सच्चिदानंदत्वं रसात्मकपुरुषोत्तमात्मकत्वंः सर्वतः पाणि पादांत्वेन व्याप्ति धर्मावच्छिन्नात्मकत्वं तस्मिन् विरोधोभवेत् नभवेदित्यर्थः प्रदर्शितः । सत्वस्यापि भगवद्धर्मत्वेन सच्चिदानंदरुपत्वाद् विशेषात्, रसात्मक सत्वधामाक्षरात्मक सत्वधामयो र्विभेदातिमात्रकत्वात्, लोकभावेनाविर्भूय इत्यत्र रसात्मकस्य सच्चिदानंदस्य संप्रदायं प्रदर्शयंताश्चाचचक्षिरे वल्लभाग्रयः यादृग् यादृग् लीलाविशिष्टं यद् यद् बालपौगंडावस्थाविशिष्टं तत्तद्रूपं नित्यमेवेति जानीमः ॥ तत्तद्रूपमित्युक्तचैव रुपभेद दर्शनात्तत्तद्रूपमितिकोऽर्थः । सर्वतः पाणिपादांतत्वाविर्भावात्मकमित्यर्थः । न तु अयःपिंड वद भावनीयं तत्वक्षरात्मक सत्वाधिष्टान-परत्वादेवाचार्याणां सुष्ठूक्तिरिति विजानीयात् ॥ अतोऽयपिंडत्वमुक्तं । अयस्त्वेनाक्षरात्मकत्वेन शुद्धसत्वधाम भगवद्धर्मरुप स्तस्मिन् पिंडत्वेन चतुमूर्त्याद्या सस्मिन् वह्निरिति व्यापकत्वेन कार्योदेशमधिष्टाय पुरुषोत्तमस्य शुद्धस्य ब्राह्मण आविर्भावत्वेनोच्यते, वत्पदप्रयोगाद् यावत् कार्यं साधनमुपपश्यति तावत्पर्यंतं तस्मिन्नाविर्भूय तं प्रसाध्य,ततः स्वस्मिन्नेव तमाकृष्यायस्या-यस्त्वमेव संप्रादयामास । अक्षरात्मकत्वेन शुद्धसत्वधामत्वमेव संपादितवान्नित्यर्थः । "ब्रह्मानंदान्महानंदो भजने वर्तते स्फुटः ॥ तारतम्यचाभिज्ञातुं प्रदर्श्योर्धृतवान् तत"इत्यादि-भिरपि स्वस्य पूर्णानंद भजनानंदात्मकत्वात्तस्य ब्रह्मानंदात्मकत्वादयः पिंड संज्ञाधिकरण-कत्वात्स्वस्याऽयात्मकत्वात्सत्वं ततः संनिकर्ष्य स्वस्मिन्नेव संपाद्य तस्मिन तथात्वं च विराजते। श्रीमद्व्रजेंद्र सद्मनि मूललीलायामपि च तथैवचेतिभावः ॥ किंचायः पिंडादिषु यथाग्नेः संनिवेशो लोहाकाराभिप्राय कार्यकालावधि पर्यंतमेव, तथैव भगवदाविर्भावस्यापि तावतैव चरितार्थं यत्कार्यमुद्दिश्य सत्वाधिष्टानमधिष्ठायैव कार्यकरणीयं भवति पुनः पूर्ववत्, अतएवोक्तं "यादृशेन-रूपेण कार्यं कर्तुमिच्छति तादृग्रूपं तं प्रकटीकृत्य तस्मिन् स्वयमाविर्भूयअयःपिंड वह्निवत्तत्कार्याणि करोति, यस्मिन्यस्मिनवतारे स सोंश"इत्युच्यते। तत्रहि विग्रह स्तत्राविर्भूतं ब्रह्मस्वरुपंच । यद्यपि रसात्मक भजनानंद स्वरुपानुभवादे रुपार्भकानां, भगवतो बाल्यपौगंडाद्यवयवादिषु न्यूनाधिकावयव भावसंपत्ति संदर्शनादिविचारास्पदत्वमायाति, तथापि रसात्मक ब्रह्मणो रसात्मक परमसौंदर्यात्मक व्यापकत्वास्यातिमात्रकत्वात् भगवदवयवादिषु न्यूनाधिकावस्था प्रज्ञापकेऽप्यपि तदेकरुप रुपकायतो तदेक साक्षात्स्वरुपानुभवायति नान्यथेति भावस्तेषां तद्व्यापकत्व रसात्मक ब्रह्मण एव नत्यक्षारब्रह्मण इतिमंतव्यं ॥ तत्रहेतुरत्रपरम-सौंदर्यमेव साकारप्रतिपादकं प्रवर्तकं च । तत्र प्रमेयरुपंप्रमाणं निबंधतत्त्वदीपे श्रीमदाचार्य चरणैरेव प्रपंचिमस्ति ॥ "कृष्ण शब्देन परंवस्तूच्यते तदेव कदाचित परमसौंदर्यं स्वगतं प्रकटं करिष्यामीतीच्छया साकारं प्रादुर्भूतं सत् श्रीकृष्ण'इत्याद्युक्त्यातत्प्रादुर्भूतं सत् श्रीकृष्णो यदा तत्परमसौंदर्ये साकारे प्रादुर्भूतेसति यः स्वयं कृष्णः प्रादुर्भूत सदात्वनूक्त सिद्धत्वेनापि परमसौंदर्यस्य साकारता आयात्येव । अत एव कृष्णकरपादादिषु बाह्याभ्यंतरयोरानंद मात्रकत्वस्यातिमात्रकत्वं तदखिलावयवत्वं च । तत्राप्यानंद मात्रकरपादादिविभूतेः पूर्ववृत्तितं नामानंदोजन्योभवति नतुजनकोऽनुभवात्तरदशायामेवानंदाविर्भावदर्शनात्तिरिति नियमात् ॥ यतः स्वगतंस्वात्मन उत्तरार्ध भागोत्तरदल स्थायिभावैकरुपं स्वस्वामिन्यनुभवानुरुपं परमसौंदर्य साकाराखिल सौष्टत्वं श्रेष्ट्यं शुद्धब्रह्मात्मकं स्त्रीपुंभावात्मकं पूर्णं निर्विशेषणं विशेषातिमात्रकं कोटिकंदर्पलावण्य निदानमनुभूयैव, स्वयं, स्वयात्मन पूर्वभागरुपेण संयोगदलेन तदानंद मात्रकर पादमुखोदरादिरुपमविभ्रदांतरे नित्यत्वादात्मत्वात्स्वभावतश्च तेन कृत्वानंदमात्रकर

पादमुखोदरादिरुपः पुरुषोतमः शुद्धब्रह्म कृष्ण इत्युच्यते ॥ अत एव तत्साकारमेव परमसौंदर्य साकाराखिलसमृद्धि साहित्येन लीला लोके व्रजवनयोश्चव्यापकमिति सर्वं सुस्थम् ॥ अतोब्रह्मसूत्रेपि च व्याप्तेश्चसमंजसमिति व्याप्तिधर्मत्वावच्छिन्नत्वेन परमसौंदर्य साकारदेदेंव-समंजसं निरवयवत्वेनावयववत्वेन सर्वत्र मूललीलायां स्वरुपभावनायां लीलाभावनायां भावभावनायां भावात्मकत्वं भावावयवत्वं भावभावनासाकारत्वं संपादकम् भवति, तत्परमसौंदर्य साकारादेर्व्यापकत्वस्यैवकरचरणादीनां व्यापकत्वाद्भगवतोपि करचरणादिषु न्युनाधिक्यावस्था प्रज्ञापकेषु तदेकस्थायि व्यापकाविर्भावप्रसंगात्तदेक स्थायिभावरुपत्वमुच्यते । तत्र न कश्चनविरोधो विमर्षणीयः । अतएवतदेवोक्तं ब्रह्मसूत्राणुभाष्ये सर्वतः पाणिपादान्तमित्यादि स्मृतेः साकारमेव-व्यापकमिति चकारात्, सर्वरस इतिश्रुत्यच रसात्मकत्वेन भक्तानां यादृग्रूपेणलीलारसानुभव स्तादृग्रूपंक्रमेण योगमायाऽप्रसारणेन प्रकटीकरोतीत्यादिनापि परमसौंदर्य साकारादे व्यापक-त्वस्यानूक्तसिद्धं साकारातिमात्रकत्वं व्यापकत्वंचावधेयं सोपपतिकं । तत्रहेतुः सर्वतः पाणिपादान्तमिति स्मृतिमुक्त्वाग्रे रसात्मकश्रुत्यभिमतं स्वनिगूढाशयाग्रे पुरस्कृत्यावयवादिषु साकारमेवव्यापकमिति चकारात् इत्यनेन व्यापकादेरपि रसरसात्मकत्वमेव सूचितं नत्वक्षर ब्रह्मणइतिबोध्यं भवति । तस्य परमसौंदर्य साकारादे व्याप्यव्यापकधर्मत्वावच्छिन्नत्वेन मूललीला मध्यपातिनां सर्वेषां पदार्थानां तद्रूपत्वात् तथात्वं ॥ किंच यस्यरसस्य या विभावानुभावाद्याः पटइव, अतस्तत्तादात्म्यं रसस्येति सर्वाभेदो निःप्रत्युह इति ॥ ननु विरोधदिक्स्थयोरेक जातीयभाववतो सामग्यऽयस्ताभिरेव समुदायेन रसः संपधते । आतान वितानात्मक तंतुभिः व्यापकत्वेनैवं प्रादुर्भावस्योपपन्नत्वेपि लीलापदार्थानाम व्यापकत्वाद् युगपदाविर्भावानुपपन्नः भक्तयोस्समान धर्मत्वाद्‌भक्तिमार्ग विरोधापाताद्विनिगमकाभावान्यैकत्र मायया प्रदर्शयतीतिनवक्तुं युक्तमितिशंकापि श्रीमदवल्लभाग्निभिर्दृभ्यां सूत्राभ्यां निरस्ता वेदितव्या, विविध रसात्मक ब्रह्मणो व्यापकत्वाल्लीलायाश्च, तेन परमसौंदर्य साकाराखिल सामऽयनुभवनिरोधादर्शेन सहाभेदात्तथात्वादेकस्मै भक्ताय यथाब्रह्म ब्रह्मणासह विविधलीलानुरुपा पदार्था आविर्भवंति तदेवान्यत्रापि तदधिकरण समवाय भक्तसमानदेशजा आविर्भवंतीति सर्वसामंजस्यात स्वनिखिल व्यापकसामग्रीसाहित्येनव प्रादुर्भवतीअपावत । अतएव परोक्षानुभवे पूर्वा-नुभवानुभूताये लीलादिपदार्था स्तएव भावनाध्यासोद्रेके आगत्य पूर्णानंदैश्वर्यादयः प्रधानस्य रसात्मकस्य ब्रह्मणोभगवतो धार्मिणोधर्माः अनुभवलीलापदार्थाः परोक्षानुभवाग्न्युद्भूता ब्रह्मधर्मत्वेन व्यापकाउच्यंते । भगवदैश्वर्यादिर्गुणादेस्तदेव रसात्मक परमसौदर्य साकाराति-मात्रकत्वात्तदाकृतिमत्वाच्च तेपि तथात्वेनैवव्यापका भवंति परन्तु धर्मांगांगितत्वेन, तर्हि तत्र को विशेषः स एव वदामो विशेषस्त्वयं, ते धर्मा व्यापकधर्म विशिष्टा यद्यपिस्वाधिष्टं पूर्णानंदादयः प्रधान प्रदर्शयन्तः प्रदर्शयंति परोक्षानुभवोद्रेकाग्न्यनुभव भक्तभावना रंगभूम्यंतरे विशेषतः प्रदर्शयंति परन्तु प्रदर्शयन्तः परोक्षानुभवोद्रेकादीन पुष्टयंतोधर्मी स्वाछंद्य चरितार्थत्वेन प्रदर्शयन्तोपि, परन्तु प्रतीक्षापिमात्रकं प्रमाणभूतं पूर्णानंदैश्वर्य प्रधानभूतं प्रदर्शयितुमशक्ताः एवावधेया, स्वाधिष्टाने एवागत्वा प्रदर्शयितुमशला एवावधेया स्वाधिष्टाने एव गत्वाप्रदर्शयंतीति नियमात्, नतु तदधिष्टानमनधिष्टायैव । अतएवतेषु रसात्मक ब्रह्मधर्मत्वेनैव व्यापकधर्मत्वमुच्यते । तस्माद् भगवदवयादिषु लीलागुणगानादिष्वपि तद् व्यापकत्वमधिष्टायैव तदधिष्टाने एव तदनुभवपराणां अव गंतव्यं परमफल रुपमित्यवगंतव्यं । अतएवाणुभाष्ये श्रीमदाचार्यचरणैः अथैवप्रपंचितमस्ति । अतएवात्र प्रधानपदमुपातं । गुणभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुं ते गुणभावादयः मूलपरमसौदर्य साकारादिभिर्भगवता सहाभिभूताः संति, तथैव तंसाकार सौंदर्यदिकंप्रदर्शयंतो व्यापकत्वावच्छिन्नत्वमेधयंति व्यापकाः संतो मूलयिष्टाने एवप्रयांति । इति कृत्वा भगवतः परमसौंदर्य साकारादेरेव लीलालोके स्वरुपलीलाभाव

भावनादिषुगुल्मलतौषध्यादिष्वपि रसात्मक लीलात्मक भावात्मकब्रह्म संपादकत्वनूक्तसिद्धमेवास्ति, एवं यत्र स्वयं रसात्मकब्रह्म परमसौंदर्य साकाराखिल विभूतिमत्प्रादुर्भवति तत्रैव पूर्णत्वं शुद्धत्वं पूर्णत्वब्रह्मत्वं चावगंतव्यम् । यथोलूखलबंधनादिषु चतुर्मूर्तिभगवान् रुपत्वेनापि स्वस्मिन् स्वमूलाधिष्टानाक्षरब्रह्मपर्यवसायिनीं पूर्णतामभिप्रदर्शयन्नेव रज्वादि सांधनबंधनादिष्वपूर्णतां प्रदर्शयामास, तस्मादत्र कैमुनिकन्यायेनात्र तु साक्षात्पूर्णानंद प्रधानस्यधर्मिणो रसात्मक ब्रह्मणः शुद्धसत्वधामविग्रहाधिष्टानं तु पूर्वोक्तप्रकारेण कार्यकरणावधि परत्वादेव । तदपि तावत्पर्यंतमेवायः पिंडदृष्टांत चरितार्थवत्वं तेनैव न तु स्थापित्वेन; ब्रह्मानंद भजनानंदयोर्भेदातिमात्रकत्वस्यनियमात् ॥ किंच स्वस्यसर्वांगैः स्वरुपलीला रसावयवादिभिः पूर्णत्वात्परमसौंदर्य साकारत्वावच्छिन्नत्वात् यत्र च स्वयमेव व्रजवरघोष रत्नसीमंतिनीषु शुद्धभावनाध्यासातिमात्रकवतीषुस्वस्वरुपानुभव वियोगाग्न्युद्रेकं यथा तासां निगूढभावरुपत्वेन कोटिकंदर्पलावण्यरुपत्वेन प्रकटंकरोति, तत्र पुन ! स्वस्य शुद्धसत्वधामाधिष्टानापेक्षाऽक्षरानंदानंदभिव्यक्तस्यकेनहेतुना निर्णयोभविष्यति, न भविष्यत्येवेतिवाच्यम् ॥ यत्र स्वकलायाः केशे अनंतकोटिब्रह्मांड विग्रहांतरितस्यैश्वर्यादेः साकारत्वमाकलयितुं ब्रह्माद्योपि न शुक्नुवंति, सदापूर्ण ब्रह्मणः परमसौंदर्याविर्भूत साकारादेर्निर्णेतुंकः क्षमो भविता, न कोपीत्यर्थः ॥ रोमरुपं अनंतकोटि ब्रह्मांडविग्रहाधिकरणभूतं विहाय केशपदमुक्तं, तस्यायमाशयः । कलयात्मकत्वेन सितकृष्णकेशौ ताभ्यां चतूर्मूर्ति भगवान्, तस्याशेषावतारेभ्यः श्रेष्टत्वद्योतनायैव केशस्य वरांग सुषमानुभाव सामग्रीमध्यपातित्वात्तथैव सामर्थ्यवत्वेन केशेत्युक्तम् । इत्यनेन तत्रापि निरवयवत्वेप्यक्षरानंद प्रपंचादेर्नित्यत्वं द्योतयन्साकारमेवोदाहृतं पुष्टिभक्तिमार्गपरत्वेन पुष्टिभक्ति ब्रह्मसूत्राणुभाष्यानुपूर्व्या स्पष्टमेव प्रदर्शितवान् । यत्राधिष्टानमनपेक्ष्यं, स्वयमेव शुद्धं साकार ब्रह्माविर्भवति भक्तार्थे स स्वयं पूर्णो भगवानुच्यते ॥ तस्मात्तत्तत्साकार विशिष्टं यादृग् यादृग् लीलाविशिष्टं यद्यद् बाल्यपौगंडाद्यवस्था विशिष्टं तत्तदपि तत्तदंग परत्वान्नित्यमेवस्ति, न तत्र संशयः कश्चित् ॥ किंचान्यदपि तत्रैवाणुभाष्ये ब्रह्मसूत्रभक्तिपर विवृतौ स्वयं समर्थयंति । नन्वेकस्यैवानस रुपत्वं भवतैवोक्तमतो मत्स्यादिरुपेष्वपि नाधिष्टानत्वेन सत्वं वक्तुं शक्यं । किंचैवं निराकार स्वभावत्वं ब्रह्मणः सिध्यतीति सन्वाण्यवहित प्राकटयोक्तिरप्यनुपपन्नेतिचेत । मैवम्, सत्वाद्यधिष्टानस्य प्रमाण सिद्धत्वेनानपनोदनत्वात् । तच्चोक्तं यदेकमव्यक्तमित्यादि प्राकटयं हि भक्तिनिमितकं, सातु बहुविधेति तदनुरुपं प्राकटयमपि तथा सर्गादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तीत्युपाध्यंतरित स्नेहवत्वात्तान्तरुपत्वेन मत्स्यादिरुपेपि तदर्थं तद् व्यवहित एव प्रकटी भवति । ये तु भगवत्स्वरुपमात्रासक्ता स्तदर्थं स्वयमेव तदव्यवधानेन प्रादुर्भवति । एतेनैव निराकात्व शंकापि निरस्ता । एतेन सोपाधिस्नेहवदर्थमेव मत्स्यादिरुपप्राकटयस्य प्रमाण सिद्धत्वान्निरुपधितद्वदर्थमेव व्रजनाथ प्रकटयस्यापि तदेकपरत्वात् रसोवैस इत्यादि श्रुति प्रतिपाद्यं निरुपधि स्नेहवतां विषय इदमेव च श्रेष्ठयं । मत्स्यादिरुपं तु सोपधि तद्वतामेव तथैत्यादि लेखादपि रसात्मकस्य विविधलीला गुण सामग्रीविशिष्टस्य रसात्मकब्रह्मणो भगवतः साकारत्वं शुद्धत्वं ब्रह्मत्वं सर्वेभ्योवतारेभ्योऽस्पर्शत्वं चतुर्भूति भगवतश्च भिन्नतरत्वमस्पर्शं, तदनुभव निजव्रजजनानामेवेति ज्ञानविज्ञान क्रियाखिल चरितार्थ बोधकत्वमनुक्त सिद्धमेवास्ति न च काचिदनुपपत्तिः ॥ अत एवानयानुपूर्व्या साकार निखिल रसात्मकब्रह्मधर्म संपादकत्वं निखिल शक्तिमत्वं ममाचार्यचरणानामेव नान्येषामिति निश्चित्योक्तम साकारब्रह्मवादैकस्थापको वेदपारग इति । एकत्वोक्त्या तद्विषय भावाखिल चरितार्थता तद्रूपता तत्संपादकता तद्धर्मावच्छिन्नत्वेनैश्वर्यादिभिरपि तदेकपरताबहुभाम्रावेवेत्यभिप्रेत्यैवैकपदं वेदपारग इति । यद्यपि साकारब्रह्मवादक स्थापको वेदपारग

यद्यपि साकारब्रह्मवादक स्थापको वेदपारग इति नामद्वयार्थनिरुपणेनैव मायावादो निराकृतः तथापि पुनर्यन्मायावाद निराकर्तेति निरुपितं तस्यायमाशयः॥ मायामाश्रित्य सर्वस्य मिथ्यात्वमसत्व चेत्येवं रुपोयोवादः स मायावादः (सर्वश्री) सर्वश्रुति इति हेतोस्तनिराकर्त्ता, तत्र विरुद्धश्रुतयः उच्यते। तत्सृष्ट्वा तदेवानुप्रविशत्, तदनु प्रविश्य सच्चात्यच्चाभवत्। निरुक्तं चानिरुक्तंच, निलयनंचानिलयनं च ज्ञानंचाज्ञानं च सत्यंचानृतंच सत्यमभवत् यदिदं किंच तत्सत्यमित्याचक्षते,तदप्येषः श्लोको भवति॥ सर्वंखल्विदं ब्रह्मेत्यादि श्रुतिविरुद्धत्वात्तन्मत निराकरण कृतवानित्येनज्ज्ञापनार्थं मुक्तं मायावाद निराकर्तेति॥

मायावादनिराकर्ता सर्ववादिनिरासकृत्।
भक्तिमार्गाब्जमार्तण्डः स्त्रीशूद्राद्युधृतिक्षमः॥९॥

एवं मायावादं निराकृत्य तदितरशास्त्राणामपि श्रुति विरुद्धत्वात्तत्तन्मतानुसारिणां वादिनामपि श्रुतिमतानुसारेणैव निराकर्तेति ज्ञापनायोक्तं सर्ववादि निरासकृदिति॥ यद्यपि मायावादिन्यायेन सर्वस्यापि जगतस्ते मिथ्यात्वं न मन्यंते तथापि नैयायिकाः इश्वरे ज्ञानेच्छा प्रयत्नातिरिक्तानानंद मयादीन् धर्मान् न मन्यंते। मिमांसकास्तु इश्वरमेव न मन्यंते, सांख्यादयोपि तथेत्येतत्सर्वं श्रुति विरुद्धमिति तन्निवारकत्वायोक्तं सर्ववादि निरासकृदिति॥ एतद्विवृत्यभिप्राययुक्तानि नामानि श्रीमद् वल्लभाग्रेः भुविप्राकटय संगांगितानि नतु मूल वास्तवार्थ द्योतकानि, तस्य निरुपाधिकत्वावछिन्नत्वात् तस्मात्तथैववेोपख्यानीति भावः॥ ननु लोके प्रसिद्धानां कर्मज्ञानशास्त्र प्रतिपादकानां वेद विरुद्धत्वेन निरासकत्वात्स्वस्य कस्मिन् शास्त्रे (च) कस्मिन्धर्मे च निष्ठेति शंका निरासायाहुः भक्तिमार्गाब्जमार्तन्ड इति॥ भक्तिमार्गरुपं यदब्जं नीलकुंतले वनरुहाननं बिभ्रदिति भावार्थाखिल विभूतिमत् व्रजवरघोप रत्नसीमन्तिनीनां भक्तिमार्गोपलक्षकं, प्रेमासक्ति व्यसनादे मूलाधिष्टानं, तापाग्नि ज्वालादि विहरणाक्रीडं, विविध संचित विचित्रभाव संतानादर्शरुपं, निजव्रजजनानामक्षण्वतीनां मुख्योपास्य साधनसाध्यादिकं, परमफलं, स्वदर्शनमात्रेणैव स्वदर्शनानुभवा तिरिक्त प्रपंचाखिल विस्मारकं, सर्वानुभाव संपत्युद्बोधकं, समुदायेन यदब्जरुपं, तस्य मार्तंडः प्रकाशक इत्यर्थः॥ निखिल रसरसात्मक भक्त्यंग रुपेण प्रकाशक इति भावः॥ "भक्तिमार्गरुपं यदब्जं तस्य मार्तन्डः प्रकाशकः इत्यर्थ" इत्यादिना स्फुटतरं विवृतावस्माभिरेव प्रपंचितमस्ति। सा पद्धति स्तद्भावानुभवपराणामेव भजनोपयोगित्वाद्युक्ततरास्ति। इयंतु केवलं ये मुखाविरन्द फल वियोगाद्यनुभव निखिल चरितार्थतामतीन्द्रिय मात्रकां, सर्वाज्ञातलीलामुपगम्य, देहेन्द्रियांतःकरण विषयार्थादिभि स्तदेवाविष्कार विरहानुभवाकृति मतो भवन् तेषामर्थमेव निरुप्यते। तस्मादिदं तु मे परम् स्वातंत्रिकं लिखनं तेषामेव भोगयोग्यं नतु तदितरेषामिति बोद्धव्यं॥ परंत्वस्याः पद्धत्याः मुखारविन्दफल विविध रसानुभव निभृतास्वादज निरोध संपत्यभावे तदितराः कातराएव भविष्यंति श्रोतुं पूर्वपरामर्श प्रयासे गतिंकर्तुमभिभावयितुमसक्ता एव भविता। अत उक्तं पितृचरणैः "कस्याग्रे कथयाम्यालिस्व मनोदुःख संततिं। व्रजाधीश वियोगाब्धौमग्नः कोपि न दृश्यते" "रसिका एव जानंति गोपीश प्रेमजं सुखं ! अन्ये विरहजं दुःखं श्रुत्वाकातरतां गता" इत्यादिना। तदितरा स्तु कातरतामेवोपगम्य, तदर्थानवबोधादति दुष्टमनोवृत्यासह, निर्दुष्टत्वे परमानंदानुभव वस्तुवास्तवार्थ सांद्रे, दोषभाजः संत स्वानिष्टमेव निजफलप्राप्तौ संपादयिष्यंति। नतु तत्फलपर्यवसायित्वं किमपीति बोद्धव्यं॥ सुखेनैव "ये यथां मां प्रपद्यंते तांस्तथैव भजाम्यह" मित्यादिना तांस्तथैव फलं भविता। तस्मात

स्वस्य भक्तिमार्ग प्रकाशकत्वोक्त्या भक्तिशास्त्रं यद् गीता भागवतादिकं तच्छास्त्रे निष्ठत्वं तदुक्तधर्माचरणत्वं ज्ञापितं । यद्यपिप्यत्र कर्मज्ञानादिकमपि प्रतिपाद्यते, तथापि तत्फलत्वेन मुख्यतया "नाहं वेदै"रिति "योगिनामपि" इति "ब्रह्मभूतःप्रसन्नात्मे"त्यादिभिर्गीतासु ब्रह्मभावानंतरमपि भक्ति लाभस्यैव निरुपणात्। श्रीभागवतेपि "अनिमिता भागवती भक्ति र्मुक्तेर्गरीयसी" "भजतां मुकुन्दो मुक्तिददाति कर्हिचित् स्म न भक्तियोग" "सामीप्य सार्ष्टिर्यसालोक्य सायुज्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जना" "स एव भक्तियोगाख्य आत्यंतिक उदाहृतः" तस्मान्मद्भक्तियुतस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे"त्यादिभि र्भक्तिरेव प्रतिपाद्यत इति गीता भागवतादीनां भक्तिशास्त्रत्वं ॥ अत्र भक्तिमार्गस्याब्जत्वोक्त्या मार्गांतरापेक्षया अस्य मार्गस्य सुखदत्वं ज्ञापितं । आचार्याणां मार्तंडत्वोक्त्या यथाब्जप्रकाशको मार्तंड एव तथा पुष्टिभक्तिमार्ग प्रकाशका आचार्या एव नान्ये। यथा प्रकाशिताब्जरस भोक्तार अलय एव तथैतत्प्रकाशित रसभोक्तारः एतदंगीकृता एव नान्ये इत्यपि ज्ञापितं । यथा मार्तंड अन्येषां ताप जनकोप्यब्जाना प्रकाशकत्वेन सुखजनक स्तद्वदाचार्याणामपि भक्ति मार्गातिरिक्तानां ताप जनकत्वं भक्तिमार्गीयाणां भक्तिप्रकाशकत्वेन सुखदत्वंमिति ज्ञापनायाप्युक्तं भक्तिमार्गाब्ज मार्तण्ड इति ॥ यद्यपि भक्तिमार्गः प्रमाण सिद्धत्वात्पूर्वं वर्तत एव तथापि सूर्योदयाप्राप्तै कमलवत् मुद्रित एव स्थितः । तथा विद्यमानोपि भक्तिमार्गः आचार्य प्राकट्याभावादविकसित एव स्थितः आचार्यप्राकट्यानंतरमेव विकसिसितोजात इति ज्ञापनायाप्युक्तं भक्तिमार्गाब्ज मार्तंड इति ॥ यद्यपि मर्यादा मार्गीय भक्तिमार्गानुवर्तिनामपि मार्गे फल सिध्या कृतार्थत्वमस्त्येव तथापि तत्र पुरुष शरीर प्राप्तानां ब्राह्मणानमेव मुक्त्यधिकारः नान्येषामिति । यथा मुचुकुंदस्य भगवद् दर्शनान्तरं भक्तिसिद्धावपि ब्राह्मणत्वाभावाद्भगवतापि न मुक्ति र्दत्ता, किंत्वग्रिम जन्मनि ब्राह्मणत्वं संपाद्यैव मुक्ति र्दत्तेति मर्यादामार्गो न सर्वेषां फल साधकः ॥ आचार्य प्रकटित पुष्टिभक्ति मार्गस्तु तदंगीकृत जीवमात्रस्यैव तन्मार्गोक्त फलसाधक इत्यादिना व्यक्त, विवृत्यनुपूर्व्या समं लेखाखिल चरितार्थता अवधेया, इदानीं तदंतर्गतं यन्निखिल वस्तु वास्तवरुप स्वतंत्रे निरुप्यते । भक्तिमार्गाब्जमार्तंड इति । साक्षाद्विधा श्रृंगार रसरुप मुखारविन्द फल भक्तिरुप एव भक्तिमार्गाब्जानां बहवोभेदाः संति तस्मिन्नेव प्रकाशत्वेन सुखदत्वेन सदानंद परमानंदाग्निरुपेण स्वाधिष्टातृत्वेन भक्तिमार्गाब्ज मार्तंड इति सर्वं सुस्थं । ततो भक्तिमार्गः मुखारविन्द फल वियोगाग्न्यनुभवाखिल विविधभावावयवाकृति मूर्तिमान्, स्त्रीभावाग्नि कृष्णभावाग्न्योः परमसौंदर्यसाकार मात्र चरित्रै र्विचित्रात्मादर्श, स्तथाविधत्वेनैव व्रजवर घोषरत्न सीमन्तिनीनां भावना मर्म मंडलांतरे आविवेश, तन्मुखावलोकनानंतरमेव । यतः स्व समवायित्वं, तासां भावानासु मर्म मंडलेषु संपाद्यैवाविवेश, नतु वैयधिकरणेषु मर्म मंडलेषु । मर्म मंडलत्वे किं, पूर्वोक्त विशेषणैं र्विशिष्टं, मुखारविन्द फल विविध रसघनीभूतं, तदवलोकन विधौ तद्रसमनुभूय तन्मार्गीयस्य मूर्छाप्रलापादेरवस्थां प्राप्य, बहिरानंद प्रपंच विस्मृतिपूर्वकं, बहिरनुभवानुभूतं मुखारविन्द फलानुभवमांतरे नयनं, तदेव मर्मत्वं, तद्विशिष्ट भावना मंडलत्वं, भावना मर्म मंडलत्वमुच्यते। मंडलत्वेनतासां भावना कोशेषु परमानंदरुपेषु सर्वाधारत्वेन सूक्ष्मत्वेन व्यापकत्वेन तदेव मुखारविन्द फलाकृतिमत्सु, भक्तिमार्गाब्ज मार्तंड मुखारविन्दफल वह्लभाग्रे प्रतिबिंब पातादेव मंडलत्वमिति यावत् ॥ किंच भगवतो मनसि रमण भ्रमणशीलेपि, मुखारविन्दफल भक्तिमार्गाब्जमार्तंडोदय प्रभावत्वेनैव मंडलाकारत्वेन् मर्म मंडलमित्युच्यते । भक्तिमार्गाब्जमार्तंडोदय मध्यपातित्वेनैव समूह रसरसात्मकं चक्र मंडलाकारं भगवन्मनो ज्ञेयं । भक्तिमार्गाब्जमार्तंडांशूनां प्रत्येकावयवादिषु तथैवानेक रासलीलात्मकत्वात्तदुदयानुभावस्यापि तथात्वाद्ध

गवन्मनस्यापि तथात्व साहित्येन नित्यत्वात्स्वभावत स्तथात्वं मर्म मंडलाकारत्वं भ्रमणत्वेन भ्रमणशीलत्वं रासायनेक लीलात्वेन लीलाभ्यामस्त्येवांतरीये रमण मनः च क्रमत उक्तं ता रात्रीः संवीक्ष्य रसात्मकैश्वर्यादि गुण संपन्नो भगवानपि रतुंमनश्चक्रे। तस्मान्मनस एवोद्भूतं समूह रसरसात्मकं रास मंडलं चक्राकारं भवति तत्सत्यं तत्तथैव हि यतो मंडलं व्यज्यते, तेन रास मंडले 'रन्तुं'मिति ज्ञापकं चक्र पदं ज्ञेयं मनश्चक्रे रास मंडल एवरंतुमिति ज्ञापकं चक्रपदंमिति यावत् ॥ अत एव मयोक्तं पूर्वं मर्म मंडलं, मर्म मंडलनाभिकोशांतर एवास्ति मर्मोद्रेकाधिक्याधिष्ठानत्वात्तस्य मर्म स्थलस्य। अतः पितृचरणैरपि स्वतंत्रे प्रपंचितमस्ति। "अत एव समूहवाचि पदान्त रसत्वेपि चक्रपदोपादानं यतश्चकं न समगतिः किंतु परिभ्रमणशीलं तेनात्रापि तथात्वं ज्ञायते" इत्यादिनांतरीयमेव मनश्चक्रं तदाशयाभिज्ञैर-पिबोद्धव्यं भवेति ॥ किंच व्रजवर घोषरत्न सीमन्तिनीनां भावना मंडलेषु, निगूढ कृष्ण पदार्थोत्पत्तिः समग्र समवाय सौष्टवाधिष्टानेषु, मर्मावस्था विशिष्टेषु, भक्तिमार्गाब्ज मार्तंडोदय प्रकाश प्रतिबिंबयोः प्रतिबिंबफलात्प्रकाशानुभावात् तदुद्भूतासु, भावना भावसंततिषु, भगवन्मुखाब्ज मार्तंड संधात संगत्याभावाब्जानां मार्तंडानां बाहुल्याद्भक्तिमार्गस्यापि च, भक्तिमार्गाब्ज मार्तंडैश्वर्यादेरचिंत्याखिल शक्तिमत्वं निर्णेतुं ता अपिनार्हा स्तदितरास्तु तन्निरणये-ऽशक्ता एवावधेयाः। अत उक्तं पितृचरणैः सप्त श्लोक्यां "श्रीमद्वल्लभ भानुरुल्लसति श्रीवल्लवीशांतर" इत्यादिना श्रीपदेन श्रीमत्स्वामिनी वदनेन्दुअमृतबीज रुपेण भक्तिमार्गाब्जमार्तंड नित्य संघा-तवता, स्वोदयस्य तथात्वं प्रदर्शयन्त स्तथात्वमेव संपादयंति कुर्वंति चापि, । "वल्लवी" पदेन व्रजवर घोषरत्न सीमन्तिनां भावना मर्ममंडलेषु कुर्वंति संपादयन्तीति पूर्वोक्ता तापि तदुद-यानुरोधरितिमनुसृत्यैव पूर्वोक्त प्रकारेण भक्तिमार्गानुवृत्तिं तद् बाहुल्येन साकं वितन्वंति। अत एतदनुरोध व्यासंग व्यावृतिमभिप्रेत्यैवोक्तवंतः पितृचरणाः "भक्तिमार्गाब्वमार्तंड" इति ॥ पुष्णामिचैषधीः सर्वाः सोमोभूत्वा रसात्मक"इत्यनेनामृतबीजत्वं, "नतद्भासयते सूर्यः" इत्यनेन ब्रह्मान्डातर वर्तिनः सूर्यस्योदयादिकं निरस्यन्स्व मुखारविंदाधिष्टातु भक्तिमार्गाब्ज मार्तंडस्या-खंडोदयादिकं पूर्वाखिल चरित्रवत् प्रज्ञापनैवोक्तं, न तद्भासयते सूर्यो न शशांको न पावकः । पावक इत्युक्त्या यस्मिन् रसात्मके ब्रह्मधामनि मुखारविन्दफल वल्लभाग्नेः परमसौंदर्य साकाराखिल चरित्रवतो रासायनेकलीलावयव धारिणो बाह्याभ्यंतर भेदेन व्याप्य व्यापक धर्मत्वावच्छिन्नत्वेन परम फलरुपत्वेन गुल्मलतौषध्यादिषु संव्यापकत्वं, तत्र तदितरस्य ब्रह्मानंद सत्ताविशिष्टस्य भाव्यं निरस्यंन् तदेव द्योतयन्नुक्तं न पावक इति ॥ साक्षात्मुखारविन्दफल वल्लभाग्निना स्वयं प्रद्युम्नांश विभाग परत्वेन लोकवेद प्रसिद्धरुपे तथात्वमभिष्टानधिष्टाय स्वेनैवोक्तमस्ति "न तद्भासयते सूर्यो न शशांको न पावक" इति। किं च मूलधामनि रसात्मक ब्रह्मणि रसात्मक ब्रह्म भजनानंद पुरुषोत्तम मुखारविन्द परम सौंदर्य लावण्य सांद्र सुषमान्तर एव नित्य रीत्यास्त्र स्थित्यादिकं प्रदर्शयंत एवानिर्वचनीयान दचनायने रहो रमण रस पूरजलदालि संन्निभ एव विहरंति, तथैव तदखिल चरितार्थ पद्धत्या समंबहि र्भगवन्नाभिकोशान्तरीयाकाशे सर्वलीलाधार रुपे, सुक्ष्मत्वावच्छिन्न कारण निदाने, विरहाग्न्यतिव्याप्ति लक्षणाखिल यंत्रितै विविध लीला रसात्म-कस्य ब्रह्मणो भगवतो विविध बहिरमणेच्छादिक संभवेपि विहरंति, अत एतदभिसंधायैवोक्तं "न तद्भासयते सूर्यो न शशांको न पावकः" । शशांक पावकयोरपि तथात्वेनैव विहरणादिकं व्यापयं स्तथैव सूचितं, इत्यादिलेखभावार्थ संगत्यैव व्यक्ति विवृतावपि तदीयाः श्रीमद्वल्ल-भाग्न्यंगीकृत जीवास्तथैवानुसरेयुः। अथ व्यक्ति विवृति प्रतीक प्रकृतमनुसरामः। स्वस्य भक्तिमार्ग प्रकाशकोक्त्या तदुक्तधर्माचरणत्वं ज्ञापितमित्यनेन स्वस्य भक्तमार्गाब्ज मार्तंडा-

खिल चरिता ग्रह निसर्गात्मकत्वात् तथैव प्रकाशकत्वे तथैव भक्तिशास्त्र गीता भगवतादिषु संनिविश्य स्वोपभोग्य यौगिकत्वं संपाद्य भावार्थानुरोधया पद्धत्या तान्यपि तथैव कुर्वान्निष्टत्वस्यापि च तदुक्ताखिल धर्माचरणादीनां व्यवस्था स्वीयेन तथैव संपादितवानित्यत्राद्य भावः । यद्यप्यत्र कर्मज्ञानादिकमपि प्रति पद्यते तथापि तत्फलत्वेन मुख्य फलतया नांह वेदैरिति येगीनामपि सर्वेषामिति ब्रह्मभूतः पसन्नात्मेत्यादिभि र्गीतासु ब्रह्मभावानन्तरमपि भक्तिलाभस्यैव निरुपणादित्यादिना वास्तवत्वं किं द्योतितं मया, नाहं बहुभिः शास्त्रैः संपादित ज्ञान विज्ञान क्रियासाधनादिभिः साध्य स्तत्फलत्वेन मुख्यतया न भवामि । येप्यन्य देवता भक्त्या यजंति श्रद्धयान्विता स्तेपि मामेव कौन्तेय यजंत्याऽविधि पूर्वकमित्यारभ्याहं हि सर्व यज्ञानां भोक्ता च प्रभुरीश्वरः नतुमामभिजानंति तत्वेनातश्चवंतिन इत्यंतेन यद्भगवति कर्मज्ञान क्रियानुसंधान साधनादिभिः फलपर्यवसायित्वं तत् कर्मज्ञान प्रतिपादितेष्वखिलचरितार्थेषु फलकत्वेनोच्यते न ततोधिकंमिति भावः । अनिमिता भगवति भक्ति मुक्तेर्गरीयसीति भजतां मुकुन्दो मुक्तिंददाति कहिंचित्स्म न भक्तियोगं सामीप्य सार्ष्टिसालोक्य सायुज्यैकत्वमप्युतदीयमानं न गृह्णंति विनामत्सेवनं जना इत्यंतेन मुखारविन्द फल रस धनीभुतान्तरित विविधरसानुभव निरोधाग्नि भक्तियोग प्रमेय पूर्ण सामर्थ्याग्रे ते सामीप्यादयः सर्वे कुत्सिता अप्रयोजिकाः परन्तु केषां, ये तद्रसानुभवानुभूतिं परात्परमा ब्रह्मानंदानुभवादिषु स्वस्वानंद मात्रकयैव विविधानंद जनिकामनुभूयादीनाः स्वतंत्राऽभवं स्तेषांमेव न त्वेन्येषां तदग्रे मया तथैव प्रपंचितमस्ति तत्र तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं नच वैराग्यं प्रायः श्रेयो भवेदिहेत्यादिनापि तद्भक्तियोग पूर्ण प्रमेयानिर्वचनीयमचिन्त्य सामर्थ्यमेव निगदितं प्रदर्शितं चानेनैव प्रकारेणाग्रेपि तथैवानुसंधेयं भवति तदीयैः ॥ अत्र भक्तिमार्गस्याब्जत्वोक्त्या मार्गान्तरापेक्षया अस्यमार्गस्य सुखदत्वंज्ञापितं । आचार्याणां मार्तंडत्वोक्त्या यथाब्ज प्रकाशको मार्तंड एव तथा पुष्टिभक्तिमार्ग प्रकाशका आचार्या एव नान्ये । यथा प्रकाशिताब्जरस भोक्तार अलय एव तथैतत्प्रकाशितमार्गः रस भोक्तार एतदंगीकृता एव नान्ये, इत्यादिभिः किं ज्ञापितं, भक्तिमार्गस्याब्जत्वकथनात् भक्तिमार्गाधिष्टात्रीणां व्रजवरघोषरत्न सीमन्तिनीनां वासरजनित विरहक्लेश प्राचुर्य दशायां नित्यत्वात्संध्यासमये तद्विरहानुभवैक साधन साध्य फलं वनरुहाननं भगवन्मुखाविन्द श्रीमद्वृंदावनेन्दु गोभि र्विविध रसोदीपकैः रस निभृतं रंजितं च तत्फलदानात् भगवन्मुखारविन्द फलांतरीय भक्तिमार्गस्तासां भावनासु संनिवेशादेतासां भक्तिमार्गस्याब्जावयवत्वं, श्रीमद् वृंदावनेन्दु पोष विषयालयाधिकरणकत्वं, भक्तिमार्गाब्ज मार्तंडयस्य भगवन्मुख मंडल मध्यगस्य तापादि प्राचुर्य विविध नर्मदत्वमनूक्तसिद्धमेवास्ति, तस्मादेव तद्भक्तिमार्गाब्जांतरीय तत्प्रकाशित रसभोक्तारो दामोदासाद्यलय एव नान्येत्यपि ज्ञापितं । यथा मार्तंडः अन्येषां तापजनकोप्यब्जानां प्रकाशकत्वेन सुखदत्वमिति ज्ञापनायाप्युक्तं भक्तिमार्गाब्जमार्तं इति अनेन किं ज्ञातव्यं, तन्मुखारविन्द वृंदावन रुहानुभवाब्ज निखिल भावसमृद्धिवतां प्रकाशकत्वेन सुखदत्वं तदितराणां तद्वनरुहपरिनिष्ठाखिलानुभवाभाववतांत्रिविधतापं प्रकृतिः प्राकृतं जनयतीतिभावः, न तु स्वनिष्ट तापं, स्वनिष्टतापादें बर्हापीडं नटवर वपुरखिलसमृद्धिमत्वाच्च । यत स्तमेव तापं जनयंति । ततापाविर्भावे तथात्वस्यासंभवात्तत्समवायत्वस्यवैयध्याधिकरणात्कथं प्रकृति प्राकृत प्रपंचमध्यग तत्फल प्रदेयोरैक्यवद्यो भाव्यो भवति नकदापीत्यर्थः । भक्तिमार्गीयाणांतु पूर्वोक्त प्रकारेण नर्मद इति भावः ॥ स्वस्य प्रकाशकाखिल धर्मादे स्तथात्वात् । यथा भक्तिमार्गः पुराणसिद्धत्वात्पूर्वं वर्तत एव तथापि सूर्योदयाप्राप्तौ कमलवतमुद्रित एवस्थितः तथा विद्यमानोपि भक्तिमार्गः आचार्यप्राकट्याभावादविकाशित एव स्थितः आचार्यप्राकट्या-

नंतरमेव विकाशोजात इति ज्ञापनायाप्युक्तं भक्तिमार्गाब्जमार्तंड इति । तेन किं सूचितं । यद्यप्याविर्भाव तिरोभावाभ्यां पुष्टिभक्तिमार्गस्य नित्यत्वान्नित्यत्वमेवास्ति कार्यकारण परत्वात तथापि, सो भक्तिमार्ग फल प्रकरणीयो मुखारविन्द फलांतरीयाब्जावयवधारी पृथक्कृत्वात्त-त्स्वरुपानुभव लीलानुभवादि मात्रकत्वेन तावत्तैवावधिरुप रुपकत्वान्मुद्रित एव स्थितः स्वस्य तदनुभवातिरिक्तेभ्यो ब्रह्मादिभ्योप्यलक्ष लीलीत्वात् स्वप्रकाशस्याविर्भाव एव स्वयं विकसितो भवातीति निमित्तात् प्राकट्ये एव प्रकाशोऽभवत् । ततस्तदीयानां तदंतरगतस्व-रुपानुभवादेः फल प्रकरणीयव्यवस्था पूर्वकत्वात्तदंतर रसाधिक्य प्राप्तौ कार्यकारण-योरेकभावजातीयत्वात्सर्वं सामंजस्यमेवजातमितिभावः । यद्यपि मर्यादामार्गीय भक्तिमार्गा-नुवर्तिनामपि मार्गोक्त फल सिद्धया कृतार्थत्वमस्त्येव, तथापि तत्र पुरुष शरीर प्राप्तानां ब्रह्मणानामेव मुक्त्यधिकारः नान्येषामिति यथा मुचुकुन्दस्य भगवद्-दर्शनांतरभक्ति सिद्धावपि ब्रह्मणत्वाभावाद्भगवतापि न मुक्तिदत्ता किन्त्वग्रिमजन्मनि ब्रह्मणत्वं संपाद्यैव मुक्तिदत्तेति मर्यादामार्गः न सर्वेषां फल साधक इत्यादिना किं सूचितं । मर्यादांगाखिल चरितार्थस्य वेद प्रमाणातिमात्रकत्वात्तदनुवर्तिनां तद्भक्तियोग ज्ञानयोगाभ्यां तन्मार्गोक्तफल सिद्धया कृतार्थत्वं मुक्ति पर्यवसायित्वमस्त्येव, परन्तु मर्यादयैव न तु पुष्ट्यंगत्वेन ॥ तत्किं, पुरुषशरीर प्राप्तानां ब्राह्मणानामेव मुक्त्यधिकारः नान्येषामित्यनेन तन्मुक्तिदातुः पुरुषोत्तमास्याग्नि पूर्ण प्रमेय चरितार्थता सन्निधिमात्रेणैव तापादि मार्गेण तदीयानां लीलोपयोगि देहादिकं संपाद्य मूललीला मध्यपातित्वं च भगवता सह संलाप दर्शनं मिलितस्य चाधरामृतपानं च भोगो रोमोद्गमस्तथा तत्कूजितानां श्रवणमाघ्राणं चापि सर्वतः तदंतिकगतिं नित्यमेवं तद्भावनं सदा इदमेवेन्द्रियवतां चक्षुष्मतां फल मोक्षो नचान्यथेत्यादि परमात्यंतालौकिक सामर्थ्यवती तस्याः अभावात् स्वमर्यादांग परत्वेनैव मुक्तिदान सामर्थ्यात्तथैव ब्रह्मादिषु स्वचरितार्थतां प्रदर्शयति सातु मुचुकुंदादिषु स्फुटतरास्ति, तत्रापि तत्स्वरुपस्य तदंग सामर्थ्यवत्वेन तद्रूपात्मकत्वेन तथैव तस्य मुक्तिदान प्रस्तावे प्रसन्नोपिसन स्वस्य तत्पुष्टि प्रमेयासामर्थ्या तथैव चकार इतिभावः । अतो भजनानंदनुभवपराणां ब्रह्मानंदात्मकेषु व्यूहावताराखिल चरित्रमत्सु यत्कर्तव्यं स्वभजन पुरुषार्थ साधकत्वे, तत्तु विचार्यैव । अतः स्वकीयानां तद्भजनानंद शुद्ध ब्रह्मरसात्मक भजनपराणामेव साधनतः फलतो भजन संशुद्ध्यर्थमेवाणुभाष्ये स्फुटतरमभिज्ञापयितुं तदखिल वृतांतत्वं प्रपंचितमस्ति, योवताराणां मध्य श्रेष्टोवतारः को भवितेत्यनेन रसात्मक भजनानंद रुपानुभावाचिंत्य शक्ति मूर्तिमां स्तस्य निखिल चरितार्थतां स्मृत्वैव तत्तुल्य कक्षत्वाभावे को भवितेत्युक्तं येन लोकास्तुष्टा देवास्तुष्टा भवंति । साक्षद्भजनानंद पुरुषोत्तम निर्दोषगुणाखिल सामग्री स्वभावातो विशिष्टः स्वयं व्रजेन्द्र सद्मन्येवाविर्भूतस्तदाविर्भावानुभव प्रसादाल्लोकाः साधारणाः ब्रह्मांडांतर वर्तिन स्ततोप्यधिका देवा अपि संतुष्टा अभवन्, किंच तं स्मृत्वाऽस्मात्संसारान्मुक्ता भवंति, लोकादीनामक्षरात्मकत्वात्स्मरण मात्राधिक्य पुरुषार्थे-नैवाक्षर ब्रह्मण्येव समध्यगमत्, नतु पुरुषोत्तमे रसात्मक ब्रह्मणीत्यपि विचिन्त्योक्तं इदृशः को भवितेत्युक्तं, तादृशी रसात्मका ब्रह्मतापि कथं भविता न्यस्यावतारस्येति द्योतयुन्नुक्तं, कथं चास्यावतारस्य ब्रह्मता भवतीति इति समाधानायश्रुति संमत्यर्थ प्रदर्शनाय च श्रुतिरपि लिखितास्ति, सहो वाच तं हि नारायणोदेव इत्युपक्रम्य मथुरास्वरुपं निरुपय्येत्युक्तत्वात् किं द्योतितं नारायणोदेव इत्युपक्रम्य इत्युपक्रमं प्रदर्शयन्निश्चयन्नेव चतुर्मूर्ति भगवान्नारायणांगभूतं साक्षाद्भजनानंद पुरुषोत्तमाविर्भावाधिष्टानं शुद्ध सत्व धामरुपं तदाविर्भावो नित्य निर्दोषाखिल गुण चरित्र मूर्तिमांस्तदपगमविर्भाव विशिष्टं तदाकृतिमत् तद्भूषणादि स्त ुल्यं मथुरास्थ

स्वरुप तन्निष्पन्ना हि स ति, तत्रापि स्वयमस्पर्श इति म तव्य । अत उक्त स्त्रीभिः शक्त्या समाहितः पुरुषोत्तमस्तु न द ग्रह एव मायया सहजात इत्युक्तत्वादपि स एव भावार्थोविधार्यो भवति । तेनास्यावताराणां मध्य श्रैष्ठय निरुप्यत इत्यनेनावतर तीत्यवताराः स्व स्व स्थानादव-तरणे अवतार इत्युच्यते, तथैव रसात्मकाद् ब्रह्मधामनो भगवतोपि स्त्रीगण परिवृत नृत्यशालि नोवतरणमित्यभिप्रायेणाप्यत्रावतार उच्यते । यत उक्तमवताराणां मध्येवतारस्य श्रैष्ठय निरुप्यते श्रीभागवतेपि चेत्यनेन श्रीभागवतेप्येतदनुरोधेनैवास्माकं विवृति र्बोधव्या । उक्तं च भागवते तथैव चैते चांशकलाः पुसः कृष्णस्तुभगवान् स्वयमिति गीयते, इत्यनेनान्येषामवताराणा-म शकलात्व तत्रापि गोविन्द कलयेत्युक्तत्वात्तस्याप्य शांशविभेदेनांशत्वाद श कलात्वमिति म तव्य लेखानुरोधेन पूर्वोक्ति रीत्या तु सर्व तुल्यता प्रतीयत इति नैकतर निर्धारः स भवति, किंच ब्रह्मणो निरवयवत्वेनैकस्यांशित्वमन्येषां तद शकलात्वमित्यपि वक्तुमशक्यमिति प्राप्तेऽभिधीयते, इत्यनेन पूर्व पक्षिणः समाधान क्रीयत इत्यर्थः ॥ यस्य प्रियामूर्तिः विशुद्धसत्व तवधाम शान्त-मित्यादि वाक्यैरप्राकृतो भगवत्स्थानभूतः सत्वनामा भगवद्धर्मरुप एव कश्चनास्ति इत्यनेन सत्वात्मक भगवदाविर्भावाधिकरणकत्व निष्पाद्य तस्मिन् कार्य परत्वेनैव शुद्धरसात्मक ब्रह्मणो निरवध्यान द रुपस्याविर्भाव प्रास गिकं समर्थय ति यादृशेन रुपेण भगवान् कार्य कर्तुमिच्छति तादृग्रूप त प्रकटीकृत्य तस्मिन् स्वयमाविर्भूयायः पिंड वह्नि वत्त कार्याणि करोति । इत्यनेन यादृशेन रुपेणाक्षर ब्रह्मणोग भूतेन कच्छ मत्स्यादि रुपेण भगवान्स्वय साक्षात्कार्य कर्तु मिच्छति तादृग्रूप वाराहादिक त प्रकटी कृत्येत्यनेन पूर्वतः न्निश्चित कार्य कर्तु मितीच्छया प्रकटीकृत्य तस्मिन्नेव शुद्ध सत्वस्थानरुपे आविर्भूय तत्तत्कार्य करोति यत उक्त तस्मिन्स्वयमाविर्भूय, तत्रावि ध्रुव व्यवस्थां निरुपय ति अयः पि डवह्निवत् । अयः पिंड स्थानीयाऽक्षरात्मकत्वेन शुद्ध सत्वधाम शांत ब्रह्मात्मक ध्वनित पिंडत्व कथानात् साकारत्वमक्षर ब्रह्मण्यपि निराकारत्व निरवयवत्व निरस्य द्योतितं, वह्निवत्वमुक्त्या स्वस्य स्वमुखारविन्दफल वह्न्यात्मकत्वादति व्याप्ति धर्मत्वावछिन्नत्वेन सार्द्धं यत्र यत्र स्वय स्वाविर्भावादिकमाविर्भावयित्वा प्रकटय भवति तत्र तत्र तद् व्याप्युग्र महिम्नैव स्वस शुद्धि स पाद्य स्व व्यापकत्व प्रदर्श यन् यावत्काल पर्य त मेव स्वाविर्भावस्यादभूताखिल चरितार्थतामभि व्य जयन् तिष्टन् कार्य करोति कृत्वा स्वराज-धानीमेव गच्छति । अत एवोक्तं सुबोधिन्यां स्वेनैव त्रि शतमाध्याये गोपीनां तत्पतीनां चेति श्लोके वस्तुतस्तु नाय पुमान् नच स्त्री नाप्यन्यः कश्चन "न स्त्री न ष ढो न पुमानिति श्रुतेः," अतः केनापि विचारेण नास्य दोष स भवः ॥ ननु तथाप्येव करणे कोऽभिप्राय इतिचेत् तत्राह अनुग्रहाय भक्तानामितिलेखाखिल भावार्थ क्रमेणापि भगवतः पुरुषोत्तमस्यान्य पुरुषाकृतिभ्य आकृते र्वै लक्षण्यत्व साक्षाद्भगवत आत्मनोर्द्ध भागोतरदलाख्य स्थायिभावरुप तत्स्त्रीत्वस्यापि वैलक्षण्यातिमात्रकत्व सूचय ती श्रुति र्वदति न स्त्री न ष ढो न पुमानिति । न ष ढत्वोक्त्या पूर्ण पुरुषोत्तमत्व च पूर्ण पुरुषोत्तम एवास्ति नान्यस्मिन्निति । अत एवाक्षरात्मकेभ्यः सर्व-पदार्थेभ्यः स्वय स्पष्टेवास्पर्शोस्ति तत्स्त्रीपुंभावविशिष्टस्य तद्रूपरसात्मक ब्रह्मणः स्थायित्वेना-विर्भाव स्थितेरनुचितत्वादुक्तमयः पिंड वन्हि वदाविर्भवति, तत्राप्याविर्भावस्य भगवतः स्थिति र्बोद्धव्या, न तत्कालातिरिक्ति, साक्षाद्भगवद् मुखारविन्द वह्निमाग्न्युक्तिभि र्निखिल रसात्मक श्रुतीनां मूलाधिष्टान रुपाभिरेव बोध्य भवति, तदर्थावबोधाखिल स गति बोधार्हैरेव नान्यैः ॥ अन्यत्र विंशत्रयाध्याये सुबोधिन्यां ते ते धामानीत्यदि श्रुतिभि र्वैकुण्ठादप्यस्याधिक सहज-स्थानमस्तीति तथाप्रसिद्धो वेद इति तत्रैवागमनमुचितमावश्यकमित्यर्थः । यथा राजान्यत्र कार्य कृत्वा स्वराजधानीमेवागच्छत इत्यादि लेखादपि तदेवावगम्यते, कार्य कारण मात्रैव भगवदाविर्भावादेः स्थायित्व न तत्कालातिरिक्ते स्वस्य कालातीतत्वादक्षरातीतत्वाद् ब्रह्मन्डा-

तीतत्वाद् व्रजे तु स्थायिभावैक रुपत्वाद्भगवत् प्रादुर्भावस्यापि स्थायित्वाद् व्रजाखिल सामग्र्यादे नित्यत्वं पितृ चरणोक्त विद्वन्मंडनाखिल तात्पर्यं विशिष्टंमंतव्यं न तत्रायः पिंड दृष्टान्तोनु-भावनीय इति व्रजेवैशिष्टयं ॥ अत उक्तं परिवृढाष्टके व्रजे "वैशिष्टय यो निज पदगताङ्जांकुश-यवै" रित्यादिना । तस्मादेतत्प्रणालिकयैव शुद्ध सत्व धामन्येवाक्षरात्मके अवताराणामंशकला प्रयुक्तानां व्यवस्था निरुप्य तस्मिन् स्तस्मिन् स्तत्तदश विभाग परत्वेन साक्षाद्भगवदाविर्भावं च । तदग्रे किमर्थयन्त्याचार्या स्तदेवाहं वच्मि, यस्मिन्स्वयमाविर्भूयायः पिंडद्विवत्तुसः तत् कार्याणि करोति यस्मिन् यस्मिन्नवतारे स सोऽश इत्युच्यते, कस्यांश ऊच्यते, रसात्मक भगवत एव, अतस्तदंशाविर्भावानुभावेनैव तत्र तत्र ब्रह्मत्वस्य प्रतिभानात् ब्रह्मत्वमेवेत्युच्यते न तु सर्वांशेन । अत उक्तं तत्र विग्रह स्तत्राविर्भूतं ब्रह्मरुपं च प्रतीयते चकारादाविर्भूतं रसात्म ब्रह्मत्वेन यत्तत्तु पृथगांगित्वेन प्रतीयते । यदक्षारात्मकं ब्रह्माधिष्टानरुपं तदपि पृथगांग रुपत्वेन प्रतीयते तत्कालीनैतद् ब्रह्मरसात्मकाविर्भाव संपर्कात एव तदधिष्ठानरुपेऽपि तावत्काल पर्यंतमस्पर्श भेदेन तद्ब्रह्मत्वमेवावधेयं । यत उक्तं तत्र विग्रह स्तत्राविर्भूतं ब्रह्मस्वरुपं च प्रतीयते, विग्रहस्य सत्वात्मकत्वेन धामरुपत्वात्तत्राविभूतस्यैव ब्रह्मत्वात्समुदितस्यावतारत्वेन गणना तत्रैक-स्यैवांशस्य तद्रूपत्वं यत्तदेवांशत्वमिति स्वकीयेभ्य स्तत्साक्षाद्व्रजनानंद पुरुसोत्तम शुद्ध सर्वांगभूत श्रीमत्स्वामिनीनां निगूढभाव नटवरवपुः साक्षात्स्वरुपानुभव फल संबंध करणायैव तदितरेष्ववतरादिषु पुरुषोत्तमत्वस्याभावप्रदर्शयंत तद्भजन संसिद्धय एव स्वविवेकाग्रातिमा-त्रकत्वं प्रदर्शितवंत आचार्याः यत्राधिष्टानमनपेक्ष्य स्वयमेव शुद्ध साकारं ब्रह्माविर्भवति भक्तार्थं स स्वयं पूर्णो भगवान्स्वयमेव । एवं निश्चितार्थ रुपस्य रसात्मक ब्रह्मणो यदि स्वरुपानुभवा-तिरिक्तेऽस्मिन्मार्गस्थानामन्यत्रासक्त्यादिभिः प्रवृत्तिःस्यात्तदातु ज्ञातव्यं ते जीवा अपि तत्तदंगभूताः संति, तदातु तेषां तत् संबंध गंधोपि न भविष्यति, तेषां तदंगत्वात्तन्मूलाधि-ष्टानत्वात्तत्फल प्राप्ति पर्यवसायित्वादस्मिन् शुद्ध भक्तिमार्गोन्मुखत्वात्तो तदितरेषां गौणत्वात्तेषां भजनादिकं यत्कर्तव्यं तन्नु निज फल प्राप्त्यंतर प्रतिबंधकादि रुपमेवावधेयं, तस्मात् श्री वल्लभाग्नि निश्चित स्वरुप निर्णयं श्रुत्वापि यद्यस्थायित्वमधिष्टानमवलंब्य स्वाग्रहेणैव व्रजेत्तदाग्रहोपि तेन सार्द्धं न कर्तव्यस्तस्य तदंगत्वात् । ये विप्रयोग रस स्थायिभावानुभव पर निष्ठाः संति तेषां पुर्व संस्कार पूर्ण प्रमेय बलाति प्राचुर्येण निसर्गत एव साक्षत्स्वरुपा-नुभवादेः स्थायित्वमनुक्त सिद्धमस्त्येव, न तत्र तेषामनुभव विज्ञान क्रिया विषये कश्चन प्रयासो भवति । स्थायित्वमनुक्तसिद्धमस्त्यैव तत्र तेषांमनुभव भावस्वाछंदाति मात्रकत्वात् क्षणिको न भवति, सदैकभावरुपत्वादस्मिन् शुद्ध पुष्टि भक्तिमार्गे क्षणिको निर्वोस्ति कुत्सितो विज्ञेयः, केनहेतुना, स्थायित्वस्याभावात् । स्थायित्वस्याभावं प्रतिकारणता कस्योतरदलाख्य श्रीम-त्स्वामिनीनां चरण कमल किंजल्कांतरीय मधुमकरंद सर्व पुरुषार्थान्त्यंतालौकिक फल साधक प्रसादाभावस्वैवातो मयोक्तमस्ति विज्ञप्तौ "यद्दैन्यं कृपा हेतु र्नतदस्ति ममाण्वपि तांकृपांकुरु राधेश यया तद्दैन्यमाप्नुयाम्" राधेश पदेन तस्य कृपापि तदधीना वर्तते, तस्माद्भगवत्कृपायाः पारतांत्रिकत्वात्राधेश पदेन स्वातंत्रिक्याः कृपाया एव प्रार्थनम् । तस्माद्व्रजनानंद रमण पुरुषोत्तम स्वरुपानुभवामृत रस प्रेप्सुभिरांतरभावात्मकया प्रणालिकया सर्वात्तमभावपादयो र्महान्तस्थायि भाव फलदेयोरेवाश्रयः कर्तव्य इति मूलबीजं । क्षणिकत्वेन किं, क्षणांतरे विरक्तो भवति क्षणांतरे ग्रहस्थो भवति क्षणांतरे सन्यस्त संकल्पो भवति क्षणांतरे संकल्प भंगो भवति क्षणांतरे क्षतव्रतो भवति क्षणांतरे राजसी क्षणातंरे तामसी क्षणातरे सात्विकी क्षणांतरे पूर्णार्थी भवति क्षणांतरे हीनार्थी क्षणातरे आनंदी क्षणांतरे निरानंदी इत्यादिना क्षणिकत्वेनोच्यते, तस्य हेतुः, स्वरुपानुभवादेः सेवाकथा कीर्तनादिभिरुद्भूतस्य स्थायित्वाभावात्,

शुद्ध पुष्टि भक्तिमार्गस्य स्थायिभाव विषयस्यातिमात्रकत्वात्तन्मार्गस्थानामपि स्वरुपानुभवादिषु तथात्वात्परममुपपन्नं परस्परयोः सामानाधिकरणत्वात् तदभावे या निरुपिता क्षणिकावस्था सैवावधेया ॥ क्षणांतरे भजनानंद स्वरुपानुभवादे भजनीयो भवति क्षणांतरे तत्स्वरुपांतरे तत्प्रति बीजं "जगत्तु त्रिविधं प्रोक्तं ब्रह्मविष्णु शिवात्मक"मिति सिद्धान्तमुक्तावल्यामित्यादि वाक्यै स्तन्मध्यपातीनां तदाग्रह विषये किं चित्रं स्वभजनेोपास्याधिष्ठामधिष्ठायैव तमेव समर्थयिष्यत्येव, तत्र तस्याग्रे एतत्सबंधिनी रह कथा करणे प्रत्युतो वैपरीत्य फल साधकं भवेत, तेन भाषणालापादिकं तेन सार्द्धं यत्कर्तव्यं तदेवफलयैव, तस्मात् यद्यपि मर्यादामार्गानुवर्तिनामपि मार्गोक्त फलसिद्धया कृतार्थत्वमस्त्येव तत्र पुरुष शरीर प्राप्तानां ब्रह्मणानां एव मुक्त्यधिकारः नान्येषामिति यथा मुचुकुंदस्य फल साधाकत्वमुदाहृतं तथेतिभाव इत्यादि रहस्यं मया विचार्य निर्णायि। आचार्याणां तु वस्तु विचारे क्रियमाणे परमात्यंतालौकिक निखिल निसर्ग सामर्थ्यवत्वेन स्वसान्निध्यमात्रेणैवोद्धारकत्वं साक्षात्स्वरुपानुभव फल संबंध दान कर्तृत्वं श्रमसरित् द्वारा लीलोपयिक संधात सर्वात्मभावोपादानं कारयित्वा तथैव मूललीला मध्य पातित्वं संपादकत्वमीक्षणमात्रस्यैवानूक्त सिद्धमेवास्ति॥ अत आचार्य प्रकटित पुष्टि भक्तिमार्गस्तु तदंगीकृत जीवमात्रस्यैव तन्मार्गोक्त फलसाधक इति ज्ञापनायोक्तं स्त्रीशुद्राद्युद्धृति क्षम इति॥ क्षम इति पदेन स्वयं मुखारविन्द फलरुपेण विराहन्नखिल चरित्रवता स्वसान्निध्यमात्रेणैव सेवा कथादिषु परम फल साधनेषु फलकत्वं संपाद्य तद्वतां स्वसामर्थ्येन स्वकीयानां फल साधन समर्थ इत्यर्थः ॥९॥

ननु पुष्टिभक्तिमार्गफलसिद्धावपि सर्वत्याग पूर्वकं सर्वात्मभावादिकं साधनत्वेन श्रूयते, तत्कथमाचार्यप्रकटित मार्गे केवलमाचार्यांगीकार मात्रेणैव तत्फल सिद्धिरितिचेत् तत्राहुः । अंगीकृत्यैवति ॥

अङ्गीकृत्यैव गोपीशवल्लभीकृतमानवः ॥
अङ्गीकृतौ समर्यादो महाकारुणिको विभुः ॥१०॥

अत्रायमाशयः सर्वात्मभावादिनापि फल सिद्धौ भक्तेषु भगवत्प्रियत्वमेव हेतु इत्यनेन किं द्योतितं, भगवत्प्रियत्वं भगवत्सृष्टावेव, प्रियवाच्यार्थे प्रियत्वस्य नित्यत्वात । किंचाचार्याणामंगीकार विषयोपि तस्यामेव, तस्माच्छुद्धपुष्टिमार्ग प्रवर्तकाचार्यांगीकारणैव चैतत्सिद्धं । किं साधनांतर कथनेनेत्यत उक्तं । अंगीकृत्यैव गोपीशवल्लभीकृत मानव इति ॥ अत्र भगवन्नामांतरमनुक्त्वा यद् गोपीश पदोपादानं, तत् प्रभोरेतद्भक्त संबंधिलीला परवशत्वात तदास्यरुपाणामाचार्याणामप्येतल्लीला परवशत्वेन तन्मध्यपातित्वेनातिप्रियत्वात्कृपया तदंगीकृतेषु स्वमार्गीय प्रभुप्रियत्व, किं वाच्यां, इत्यनेन किं, साक्षाद्भगवन्मुखारविन्दफल वल्लभाग्रेरंगीकार प्रकार विषय एवनिखिल साधनानां फलरुपानां समावेशात् तेषां गोपीशलीला मध्यपातिनां प्रभु प्रियत्वे किं वक्तव्यम् । तेन किं ज्ञापितं, लीलामध्यपातिष्वेव स्वांगीकार प्रकार विषय स्वप्रियत्वं च नान्येष्विति ज्ञापनायोक्तमंगीकृत्यैव गोपीश वल्लभी कृतमानव इति ॥ नन्वेवमलत्यंगीकृतौ कः प्रकार इत्याकांक्षायामंगीकार प्रकारमाहुः अंगीकृतौसमर्याद इति ॥ अंगीकृतौ अंगीकारे अंगीकार समवाय संबंधे स्वमर्यादः स्वमार्गीयमर्यादा सहितः । साकेत्याकांक्षायामुच्यते । स्वयम् साक्षाद्विधा श्रृंगार रसरुप रमणप्रिय पुरुषोत्तमास्यरुपेण, रसात्मक विविध रस निभृत फल प्रदेस्तापाग्नि ज्वालाविक्षेभोद्रेकै, रासाधनेक लीलानुभ साक्षात् संबंध फलप्रापकै, विविधलीलामध्यपातित्वविधायकै भावै, बाह्याभ्यंतरभेदेन भावात्र्यवान् भूत्रि

प्रादुर्भूतः, मूललीला मध्यपाति सृष्ट्युद्धारार्थं, सस्तु तथैव स्वमार्गीयतापादीनां पूर्व दानादिकं कृत्वा पुन स्तत्समवायत्वस्य सिद्धावेव श्रीमद्वल्लभाग्न्यंगीकार प्रकारः । न तु तापाग्निमार्गानुवृतिमपहाय । स्वास्थ्यादीनि व्रजंति तेषु तथा विधवत्वेनाचार्याणामंगीकार प्रकारोबोधव्यः । तेषु पुष्टि भक्तिमार्गीया कृतार्थता । तयाग्रिमजन्मनि पूर्वसंस्कारतस्तदेव भजनादिकं जनितत्वात् तत्परा एव भविष्यंतीति पुष्टिभक्तिमार्गाय कृतार्थतायाः रुपकत्त्वं । ननु लीलोपयिक देहादिकं प्राप्य तन्मुखारविन्द फलवियोगज दैन्यानुभवानुभावं जुषंत स्तत्फलं व्रजियिष्यंतीत्यपि बोधव्यम् ॥ अतः पितृचरणैरुक्तं अंगीकृतौ स्वमर्याद इति ॥ विविध लीलारस प्रबोधकया, प्रदर्शकया, तापाग्नि ज्वाला संप्रदाय प्रवर्तकया, निरवधि विविध रासाद्यनेक लीलानुभव साक्षात्फल संबंध विधायकया, स्वमर्यादयैवांगीकारमित्यगीकाराधिकार प्रकार प्रयुक्तानां तत्फलं नान्येषांमितिभावः ॥ यद्वा, अंगीकृतौ अंगीकारे स्वमर्यादा या पूर्वोक्ता तया सहितः । सा कथंभूतेत्याकांक्षायामुच्यते । यो मूललीला मध्यपातीजीव आदावेवं विचार्य श्रीमद्वल्लभाग्नेः शरणमायांति, अहंमुक्त्यधिक साक्षाद्रसात्मक रमण पुरुषोत्तम स्वरुपानुभवफल संबंधं प्राप्य कृतार्थो भवामीति बुद्ध्या, साक्षान्मुखाविन्द फलवियोगाग्नि भक्तिमार्ग प्रवर्तकत्वेनाचार्याणां स्वरुपं ज्ञात्वा, तदीयत्वेनैन स्वमनोरथादिकस्य सिद्धि तश्चरण कमल किंजल्कांतरीय सौगंध्य संस्पर्शेनैव भविष्यतीतिज्ञात्वा, मां स्वकीयं कुर्विति प्रार्थनया यः प्रसन्नोभवति, तं कृपया स्वमार्गीयमर्यादोक्त प्रकारेण स्व संनिधौ नीत्वा, स्वमार्गीयोपदेश प्रकारेण ब्रह्माब्रन्याय उक्त "स्तदिह न विहतो धर्माज्ञादि सिद्धः" इत्यभिप्राय प्रयुक्तेनोपदिश्य भगवति निवेद्याग्रे मम स्वरुपानुभवाग्निना भस्म साद्भूत्वा तल्लीलोपयिक देहादिकं प्राप्य, भगवतः तव रमणाधिकरणकत्वं च, रमण योग्यो भविष्यतीत्यभिप्रेत्य भगवति निवेदयति । स्वस्य गुणातीतत्वात्तदनंतरं स्वकीयत्वेनांगीकरोति । सोऽस्मिन्पुष्टिभक्तिमार्गेंगीकार प्रकार; इति ज्ञापनायोक्तं अगीकृतौ समर्याद इति ॥ ननु तज्जीवस्तु स्वयं स्वकृतार्थता सिद्ध्यर्थं यत्नादिकं यद्यपि करोति, तथाप्याचार्याणां मुक्त्यधिकातुल्यातिशयानुभव प्रयुक्त स्वमार्गीय साक्षादलक्ष कुटीरस्थ भजनंनंद रमणपुरुषोत्तम स्वरुपानुभव फलसंबंध संपादने के हेतुरितिचेत तत्राहुः महाकारुणिक इति ॥ स्वयं साक्षात भगवन्मुखारविन्द रुपेणादौ तु स्वस्यास्मिन्ब्रह्माडांतरे अक्षरानंदमये आगमनमेवानुचिततरं, तदाशेवादिकमपहाय स्वयं स्व सृष्ट्युद्धारार्थं प्रादुर्भूतोत उक्तं महाकारुणिक इति ॥ यद्यपि मर्यादामार्गीयाचार्या मुक्तिदातृत्वेन स्व स्वमार्गानुसारेण कारुणिका भवंति तथाप्याचार्याणां ब्रह्मांडातीतत्वाच्छब्दातीतत्वात्साक्षात् पुरुषोत्तम स्वरुप त्वात् क्वते ? क्व वल्लभाग्न्याचार्याः ? यैरार्चचरणैः मूलदेवसृष्टौ निरवध्यानंद समूहालंबनरुपं रासाद्यनेक लीलानुभव विशिष्ट फलदानं व्रजवरघोषरत्नरुपायामभूत्तत्तथैव स्वप्रकटित शुद्ध भक्तिमार्गे आगतायां सृष्टावपि तथैव चकार मर्यादीया स्तु स्व स्व मतानुसारेणैव मुक्तिदातृत्वेन कारुणिका संति, आचार्याणांतु पूर्वोक्त प्रकारेण निरवाध्यानंदानुभव संपादाकत्वान्महा कारुणिकत्वं, तेषां तु न तत्संबंध गंधोप्यस्ति ॥ ननु मर्यादा मार्गीय फलाधिक स्वप्रकटित भक्तिमार्गीय फलसाधकत्वेन महाकारुणिकत्वमुक्तं, तथापीयदवधि एतत्फलसाधकत्वं कस्यापि कुत्रापि न दृष्टं न श्रुतंमिति कथं महाकारुणिकत्वेप्येतत्फल संपादकत्वेमेतेषामेव घटतेत्याशंका परिहारार्थमाहुः विभुरिति ॥ विभुः सर्वकरणसमर्थः । एतेन इयदवधीति त्वदुक्तानुपपत्तिरपि न । तत्रैव प्रयेयरुपोपपत्तिरवधेया । स्वयं मुखारविन्द रुपेण स्वतापाग्नि श्चरित्रैः स्व परम सौंदर्य परमसाकारादि संनिधि क्षणमात्रेणैव व्रजवरघोषरत्न सीमन्तिनीनां भावना मर्म मंडलान्तरे अग्निबीजं व्यापयति, पुनः क्रमेणैव स्वमाधुर्यानुभवामृतरसादिभिः प्रत्यहं नूतनतर तरुणानंद रुपेण सिंचयति, तेनकृष्ण शृंगार कल्पद्रुम रासाद्यनेलीला फलतारतम्य विभेदै फलितोद्भूतो-

भवति, पुन स्ता आंतर महानंद फलानुभवपरा सन्तो बहिरानंद प्रपंचेभ्यो विमुक्ता भवंति, आंतरत्वमेव बहिर्विपश्यंति तेन ताः परम स्वतंत्रावधेयाः तस्मादत्र दृष्टव्यं स्व संनिधि मात्रणैव स्वविरहाऽग्न्यखिल चरित्रतां वितन्वितां कुर्वंति स्वरुपभावनायां लीलाभावनायां भावभावनायां तथैव मूललीलादिषु, यतो विभूरिति । यद्यपि पुर्वं भक्तिमार्गीयाः बहव एव आचार्याजातास्तथापि ''भक्तियोगो बहुविध'' इति श्रीभागवतात् तत्तन्मार्गीय साधन फल विचार विभेदेन तत्तन्मार्गीय साधन फल परत्वमेव तेषां, न तु व्रजवररत्न सीमंतिनीभि र्यथागीतं 'अक्षण्वतां फलमिदं न परं विदाम' स्तद्वत्तेषां तत्स्वरुपानुभवज विरहाग्न्यास्वादनाभावाद्भावनया (भावयोत्पाद) भावोत्पादकत्वस्यांतरीयाध्यासादेरप्यभावात्तत्साधनादेरप्यभावात्तत्फल पर्यवसायित्वस्याप्यभावो निसर्गत एवास्ति, तेषां सुतरां मर्यादांगाधिक्यात्पर्यवसानमक्षर ब्रह्मणि ब्रह्मानंमय एव इति नियमात् । तस्मात्तेषां शुद्धपुष्टि भक्तिमार्गीय साधन फल विचार गंधोपि न संभवति नास्त्येवेति क्व तद्दान सामर्थ्यं संभवति, आचार्याणांतु पूर्वोक्त प्रकारेण यद्विभुत्वं वेणुद्वारादभूत कर्मानुष्टान प्रवर्तक तापाग्नि ज्वालां संप्रदाय प्रवर्तकं प्रवर्द्धकं विविध रसानुभव फल प्रदं लीलालोकेऽतिसिद्धं । तत्सामर्थ्यं ज्ञापनायोक्तं पितृचरणै र्विभूरिति ॥१०॥

ननु शुद्धपुष्टि भक्तिमार्गीय परम फल दान सामर्थ्यवत्वेपि तन्मार्गीय फलस्यापि ''यत्पाद रजः श्रुति मृग्यमेवेति वचनात् श्रुत्याद्यनेक भक्तदुःष्प्राप्यत्वेनातिदुलर्भत्वात्कथं ददातीति चेत्तत्राहुः अदेयदानदक्षश्चेति ॥

अदेयदानदक्षश्च महोदारचरित्रवान् ॥
प्राकृतानुकृतिव्याजमोहितासुरमानुषः ॥११॥

अदेयत्वे फलाधिष्टातृत्वं स्वस्यैव साक्षान्मुखारविन्द फलरुपेण । तत्तु तेषां निकटे क्वास्ति । किंच यदि साक्षाद्व्रजनानंद पुष्टिमक्तिमार्गातिरिक्त मर्यादामार्गीय श्रवणादि सिद्धि मुक्ति स्वयमपि दद्या-तर्हि इतर साधारणात्वात् भगवदाज्ञया स्वप्राकटयेन शुद्धमुखारविन्द फलातंरीय भक्तिमार्ग प्रवर्तकत्वेन, यदि पूर्वोक्त प्रकारेण मुखावलोकनार्ति मेधयन्न निरवध्यानंदानुभवानुरुपफलं न दद्यात्तर्हि स्वस्य प्रकटित शुद्धभक्तिमार्गस्य च प्राकटयमसाधारण प्रयोजनाभावद् व्यर्थमेव भवेदत उक्तं अदेयदानदक्षश्चेति ॥ अदेयत्वेन यत्फलं स्वयं षडगुणैश्वर्य संपन्नः स्वयं भगवानपि न दातुं शकन्तेति तत् ददातीति । स्वस्य मुखारविन्दफलवियोगाग्नि रुपत्वात्फल रुपत्वात् स्वकीयेषु तद्वियोगाग्नि साधनाभावात् तत्साधनमेव संपाद्य स्वयमेव फलरुपेण तेभ्यः फलं प्रयच्छति । किंच, लीलाजगति साक्षद्व्रजनानंद स्वरुपानुभवादिकं, परमसौंदर्य निखिल रासद्यनेकलीला विशिष्टं, स्वातिरिक्त देहाद्यास प्रपंच विस्मारकं, पंचपर्वाविद्या प्रध्वंसकं, तापाग्नि ज्वाला दर्शनमात्रेणैव प्रवर्द्धकं च, तनैव चरितार्थेनेव परमांतरंग भक्त गोष्टयां तापादिनादेयदान दक्षश्च भवत्येव, तर्हि पृथक्त्वेनाचार्याणां अदेयदानोक्त्या को विशेष इति चेत्सत्यं ॥ यद्यपि स्वयं कोटिकंदर्प रुपेण स्व सौंदर्य साकारखिल चरित्रमत्वात् तथैव लीलालोके विरहाग्नि मेधयन फलं प्रयच्छत्येव, तथापि तत्र विचारणीयं त्रतयात्मकं स्वरुपं वल्लभाग्नेः, स्वस्मिन्संन्निधाने सत्येव, मुखारविन्द फल विरहाग्निरुपेण स्व व्यापकत्वावछिन्न प्रवृति साहित्येन, भगवत इंद्रियादि रुपेषु तद्व्यापकत्वे सत्येव बाह्याभ्यंतर भेदेन विरहाग्नि परिपाकेन, मनोहर भूषणाभरणादिभिः स्वंयं स्त्रीभावात्मक स्थायिविप्रयोग रसात्मक, स्तत्तापाग्निमाश्रित्यैव भवितुमर्हति, यतो वल्लभाग्नेरेव मूललीलादिषु कारणमस्ति । तस्माददेयदान दक्षत्वमाचार्याणामेवेति ज्ञापकायोक्तं अदेयदान दक्षश्चेति ॥ अदेयं भगवदतिरिक्तेन यद्दातुमशक्यं ।

तस्यापि दानेदक्ष इति वा तद्दानेपि स्वयमति समर्थ इत्यर्थः। यद्येवं तर्हीतर मार्गीय साधने प्राप्य मुक्त्यादिक फलदाने सामर्थ्यं न भविष्यतीति शंका निरासायात्र चकारः समुच्चयार्थ तन्मुक्तिदानं त्वाचार्याणां ये सेवका कृपापात्र रुपास्तेषां वाग्विनोदलीला मात्रे एव तिष्ठति तत्तु गोरसमादायाभिरिकायै स्वयं प्रभुदास मुक्तिमदादिति प्रस्तावे इयं वार्ता स्फुटतरास्ति। अनेनैव क्रमेण स्व सेवक द्वारैव तन्मुक्ति दातृत्व सामर्थ्यात्तस्यापिदान दक्ष अति समर्थ इत्यर्थः॥ यद्यपि मुखारविन्दफल वल्लभाचार्याणां पूर्वोक्त प्रकारेणादेयदान सामर्थ्यं नैसर्गिकयमस्त्येव, तथापि दाता पात्रापात्र विवेकेनैव ददातीत्याशंका निरासायाहुः <u>महोदार चरित्रवानिति</u>॥ यदि केवलं दातृत्वमेव भवेत्तदा पात्रापात्र विवेकनैव दानमुचितं भवेत्। आचार्याणाम् तु दानं न केवलं च किंत्वौदार्य सहितं, यथा स्वयं मुखारविन्द रुपेण वेणुद्वारा विविधरसांचितं परम सौंदेर्य साकारातिमात्रं बर्हापीडं नटवरवपुः कृत्स्नरमण विशिष्टं तत्स्वरुपामृतं वृष्टिकृतवांस्तथा श्रीमद् वृंदावने श्रीमद् गोवर्धनाचल हरिदासवर्ये द्रुमलता प्रसूनादिषु सरित्सर पक्षीगणेषु गवादिष्वप्यधिकाराधिष्टानपरत्वैनैवाग्नि बीजामृतबीजयोः संप्रदाय नियमाग्रह जुषंत्या सर्वत्रैव तच्छोभन समयेऽदेय दानं कृष्णाधरामृतास्वाद निरोधाकृतिमभूत् पुनरीदृशे औदार्य विषये किं वक्तव्यम्। एककालावछिन्नत्वे एवांकुरादीनां प्ररोहाधिक्यात्फल पर्यवसायित्वमभूदिति भाव स्तद्भवनं प्रतिकारणता षडषु, धर्मेषु, धर्मरुपेषु, वेणुरंध्रेषु, अंकुरारभ्य प्रसूनाभिप्राय न्यूनाधिक साधन फलात्मकत्वादीनां दर्शन संकेतावस्था विशिष्टेषु, स्थितयोरग्निबीजामृतबीजयोः स्थितेरेव तयोरेक कालावछिन्नत्वे एवांकुरादीनेधयतोः लीलालोके फल पर्यवसायिकत्व करणसामर्थ्यमनूक्त सिद्धमेवास्ति। तत्तु हरिण्यादिषु प्रकटतर श्रीव्रजवरघोषरत्न सीमन्तिनीभिरेव गीतमस्ति॥ किंच तत्रैव श्रीमदाचार्य चरणैरपि तथैव प्रपंचितमस्त्यग्निबीजामृत बीजात्मकं स्वपदमिति॥ किंचैतदनुक्रमापेक्षया व्रजघोषरत्न सीमन्तिनीभ्यो यद्दानमभूत्तन्निरवध्यानंद घनीभूतं सर्वाधिक्यातुल्यातिशयं तद्भवने श्रीमदाचार्य चरणानां महोदार्यत्वस्य नानाचरित्र विशिष्टस्य यत्किंचिन्निर्णेतुं कः पटुरिति ज्ञापनायोक्तं महोदार चरित्रवानिति॥ चरित्र पदेन यद्यप्योदार्य साहित्येन निरवधित्वेनैव दानं करोति तथापि स्वचरित्रता साहित्येन शक्र शर्व परमेष्ट्याद्य स्तानिश्चित तत्वान् एवाकुर्वन्॥ किंच श्रीमद् वृंदावनेपि च स्वचरित्रत्वं परमौदार्य विशिष्टमग्निबीजामृत बीजयोः प्रवृति प्राचुर्यंगांगितं कुंजिताधर संसिक्त वेणु द्वारैव प्रदर्शितवंत आचार्याः। वेणुरपि स्वयमधररस संसिक्तः। किंच सप्त रंध्रेष्वपि अग्नि बीजामृतबीजयोः संप्रवृते स्तदेवैककालत्वावछिन्नेंकुरारभ्य फलपर्यवसायित्वमेव संपादान धर्मत्वात्तयो स्तेषु स्थिते नित्यत्वाद्वेणुरपि कूजनादिभि विविध मूर्छनादिभिस्तद्वदित्यर्थः, यत स्त द्वारैव श्रीवल्लभाग्रे महोदार चरित्रवतो निरवधित्वेनाखिल चरित्र दर्शनादिस्तदीयानां स्फुटतरो भवति। तद्वेणुवादन प्रकार विशेषणं कासांचिदनंगवर्द्धनं, कासांचिन्मोहनं, कासांचित् जडता कासांचित् चैतन्यं निशभ्यगीतं तदनंग वर्द्धनमिति, कुजगतिं गमितानि वदामः, अस्पंदनं गतिमतां पुलकस्तरुणामित्यादिना च एवं जडत्व चैतन्यादि समुदाये सत्यपि सर्वेषामेव तत्कालीन स्वरुपानुभवादे दानमभूत् अत उक्तं पितृ चरणै र्महोदार चरित्रवानिति॥ तस्मादाचार्याणां निरवद्योदार्य धर्मत्वान्निरवधि दान करणत्वान्नकेवलं दातृत्वं, केवल दातातु देशकाल विचार पूर्वकं ददाति। उदारस्तु देशकालादिकमविचार्यैव स्वस्य सहजौदार्य धर्मेणव ददाति॥ अंगीकृतो स्वमर्याद इति नामाभिप्रायस्तु स्व संप्रदायानुरोधेनैव न तु स्व मर्यादामपहाय, रसदान योग्य मूलसृष्टि स्तद्भिन्नेषु स्वौदर्यत्वं वितनोति न कदपीत्यर्थः यतः स्व प्रकटित भक्ति मुखारविन्द फल वियोगाग्न्यनुभवैक निष्टजीवेषु दामोदरदासादिषु विरहानुभवामृत रस निभृतेषु अविचारेणैतत्फल दानं। किंचविचारवत्तत्फल दानं न विरुद्धयत इति सर्वमनवद्यं॥

औदार्ये अलौकिके निरवद्यनिरवचनीये असाधारण्यमुक्तवा यन्महत्वमुक्तं तस्यायमाशयः । स्वामिन्निति हे श्रीवल्लभाग्ने भवतः क्षण मात्रं संन्निधानेऽपि कृपातः प्राणादपि प्रेष्टोयो व्रजाधीश्वर स्तस्य वदनस्य या दिदृक्षा दर्शनेच्छा तदंतरायेण या आर्ति स्तज्जनितो य स्तापः जनेषु त्वदीयेषु प्रादुर्भवति तदिदमुचिततरं, यत्र सान्निधि मात्रेणैव साक्षात् द्विधाश्रुंगार रस निभृत विविध संचित विचित्र भाव प्रकाराख्यं व्रजाधिश्वर वदनं शश्वत्नटवरवपुरांतरीय वेशाभिप्रायाविर्भावांचितं व्रजरवघोषेंदु वंदनानामुपास्य फलरुपं, तस्य दिदृक्षा, तदप्राप्तौ तत्क्लेशोदूभूतात्ति स्तदात्युदूभूतो यस्ताप, स्तदीयेषु तदाविर्भावाधिकरण भूतेषु, तत्तापादर्शे स्वच्छतमे, तदात्युद्रेक शुद्धाध्यासाविष्कर हेतु भूते, तन्मुखारविन्द फल पूर्वोक्त विशेषणाखिल चरित्रमत स्वयं मुदाविर्भवति, यत एतदभिप्रेत्यैवोक्त महत्वं । क्षणांतरे एव तत्फलं स्व संनिधिं संपाधैव दान संपादन सामर्थ्यादेव महत्वमनुभवीनामनुभवैक वेद्यमनूक्त सिद्धमस्त्येव । यथा लौकिकाग्नि तापे इधंनस्यैव हेतुत्वं, तथात्र हविषो हेतुत्वं । तदपि भगवन्मुखारविन्द फल परम सौंदर्य साकाराखिल दिदृक्षार्ति तापोद्गारिणि, तत्तत्क्षणे, एव तदनुभव करणार्ति रुपाणि हविष्युद्भावने उद्भाव्य, तेन हविषा ततापाखिल चरित्राशयं वितन्वं तस्तत्क्षणैव तदंतरभूतं मुखारविन्द फलं व्रजवर विरह घोषेंदु वदनानां सर्व स्वरुपं प्रयच्छंति । महत्वस्य च वल्लभाग्नेरौदार्य चरित्रयोः कियदवधि पर्यंतं स्तुतिं संस्था वच्मि । महत्वस्य च वल्लभाग्नेः कृष्णास्य रुपत्वा विरहाग्नेर्नानात्वैन नाना चरित्रमत्वात्सर्वत्रैव लीला-लोके रसात्मक ब्रह्मकृष्ण करः पादादिभिः साकार ब्रह्मत्वमेव संपादकत्वात्सर्वालौकिक दुर्विभाव्य शक्तिमत्वात्सर्व भवन सामर्थ्याद्रासाद्यनेक लीलांतरीय बहिरंगाच्च तद्विग्रहात्मकत्वा-त्तान्निखिलाचिंत्यैश्वर्यं विचिंत्योक्तमुचिततरमिति, एवं श्रीवल्लभाग्नि संनिधिमात्रोग्रमहिम्न प्रजातं यद्भवति, तन्निरुप्य तद्गत चरित्राद्भूत चित्रत्वमाहुः । यत्विति ॥ वल्लाभाग्नि धर्मेभ्यो-ऽचित्यानंद परमानंद रुपेभ्यो, ये लौकिकाग्ने धर्मा, स्तेषां निराकरणार्थमेव तु शब्दः । पश्चात् असनिधानेपि पुर्व संनिधानानुभवादित्यं पूर्ववदेव ताप उदेत्येव । असंनिधाने संनिधाना-नुभवस्य पूर्वकृतस्य विप्रयोगात्मकत्वात्तापोदय स्वरुपादेरपि तथात्वात्तसोत्र स्वयं मुखारविन्द-माविर्भूय तत्ताप विवृधौ स्व स्वरुपानुभवादिभि विवृधि संप्रदायमेव तनोति । तेनासंनिधौ ता-पोदयस्य प्राचुर्य फलं मुखारविन्द सौंदर्य साकारातिमात्रकं मंतव्यम्, न तु पूर्वं संनिधा-नानुभवत् । ततोपि अत्यंत अनिर्वचनीयमाह दृष्टेपीति । तत्पूर्व चरित्राद्भूत विशिष्ट सांनिधि व्यतिरेकेणापि, दर्शनमात्रादपि प्रचुरतरं यथा पूर्वोक्तं तद्विशिष्टं यथा स्यात्तथा तापोदयस्या-श्चर्यत्वाच्चित्रमित्युक्तं ॥ भुतलागमनविधौ पूर्वोक्त प्रकारेण दर्शनमात्राद्भूत कर्मणोनिर्वचनी-याश्चर्यवत्वं, चित्रत्वं च, भुविस्थितानां भगवदीयानां स्वकीयानां, नतु मूललीलामध्यपातिनां । तेषां तु तथा विधवत्वेनैव निसर्गत स्तदनुभवाध्यासाति मात्राकत्वान्नाश्चर्यत्वं, न वा चित्रत्वं, । एतेषांतु भूम्यवतरणयोगात् प्रकृतिः प्राकृत प्रपंच मध्यपातित्वाद्देहाध्यासादेरति प्राचुर्यात्तत्स्व रुपानुभव विस्मृतौ चित्रत्वमाश्चर्यंत्वं च भवति ॥ अत उक्तं पितृ चरणै दृष्टे प्यस्मिन्मुखेन्दौ प्रचुरतर मुदेत्येव तच्चित्रमेतदिति ॥ ततः पूर्वोक्तमसंनिधानेऽपि, ताप प्राकट्यं एतद्दर्शनेनापि ताप प्राचुर्यं चित्रं । कृपात इति सर्वत्रानुषज्जते । यद्यपि मुखेन्दुत्वोक्त्या तद्दर्शनस्य तापाहारक-त्वमायाति, तथापीदावस्मिन्निति पदोपादानाद्भक्तिमार्गाब्ज मार्तंडाचार्य मुखस्येतरेदो वैलक्षण्य ज्ञापनात्तस्य जल प्रकृतिकत्वात्तापहारकत्वमेवोचितं, शुद्ध पुष्टिभक्तिमार्गाचार्याणां तु भगवन्मु-खारविन्दाधिष्टातृत्वेन द्विधाश्रृंगार रसात्मक परमसौंदर्य साकाराखिल सामग्री सहित ब्रह्मसंपादन सामर्थ्यादत्यंतालौकिकानंद परमानंदमयाग्निरुपत्वात्तन्मुखाग्नि बिजरुपत्वा दंकुरादि भाव प्रेमादीनां संप्रदायस्य मनन निदध्यास प्रवृत्त्यभिभूतस्य रुगादिभिः संपृक्तस्यांतरीय मार्ग प्रवर्तक-

त्वादमृत बीजरुपेणेन्दु रुपात्मकत्वेनामृत बीजरुपं इंदुरिति भाव,ः इत्यनेन साक्षात् द्विधा श्रृंगार रसालय विविधान दानुभव परम सौंदर्यादर्श भक्तिमार्गाब्जरुप मुखारविन्द एव भक्तिमार्गाब्जमार्तंड चंद्रमसो भ्रमण रमणादिभिरैक्य संधाताग्रहेणैक्यरुपयोः चंद्र रुपेण विप्रयोग श्रृंगार रसरुप मुखारविन्दे विहरणं, भक्तिमार्गाब्ज मार्तंड रुपेण संयोग श्रृंगार रसात्मके भक्तिरुपे भगवन् मुखारविन्दे विहरणमिति स्तयोः स्थितिं प्रदर्शयतोरैक्यत्वान्मुखारविन्द फल वल्लभाग्ने स्तापादीनां धर्मेष्वपि तापात्मकत्वेन शिशिरत्वं, शिशिरत्वेन तापात्मकत्वं, शिशिरत्वेन सार्द्धं चंद्रोदयो विप्रयोगोत्तरदल स्थायि भावात्मक मुखारविन्दे । तेनकृत्वा तस्य चंद्रमसो विप्रयोगात्मकं स्थायि विप्रयोगाश्रयात्मकत्वं, तेनकृत्वा शिशिरत्वेन विप्रयोगाग्न्यात्मकत्वमेव स श्चंद्रः स्वयम् संपादयति ॥ भक्तिमार्गाब्जमार्तंड रुपेण संयोग श्रृंगार रसरसात्मके विहरत्यु-देत्यतः स्त्रीभावात्मकत्वेन तस्य चंद्रमसः संपर्कात्तापात्मकत्वेन शिशिरत्वमेव तद्दर्शनाक्रांत विरहिजनेषु संपादयति, यत उक्तं पितृ चरणैं र्दृष्टेप्यस्मिन्मुखेन्दौ प्रचुरतरमुदेत्येवतच्चित्रमिति प्रचुरत्वेनेंदावेव पूर्वोक्त प्रकारेण विप्रयोगोत्तर श्रृंगार मुखमंडलाकृतिमत्वात् । सो जल प्रकृति कश्चन्द्र स तापहारकोऽत्रोक्तप्रकारेण वर्द्धक स्तथैव तापरुपेण शिशिरत्वं संपाद्य पुन स्तापमेव तनोतीति कृत्वा मूललीलादिषु तापस्यैव मुख्यत्वादुत्तर श्रृंगारस्यैव सर्वोत्कर्षत्वं सिद्ध्यति । तत विमर्शाधिक्यान्मूल मुखारविन्द विरहाग्नावेव तापादे मुख्यत्व स्व पर्यवसानं पर्यवस्यति । तस्माद् द्वाभ्यामग्नि बीजामृतबीजाभ्यां श्रीमद्वल्लभाग्नेः साक्षाद्भगवतो मुखारविन्दाधिष्ठातु र्बाह्या-भ्यांतरयो र्मूल लीलादिषु विरह विहरणं द्वयो र्मुखमंडलयोरेव हि । एतन्निरोधेनैव महोदार्यत्वं चरित्रात्वं चावगतव्यं वल्लभाग्नेः ॥ तस्माद्भगवन्मुखस्यापि तादृशत्वातद्दर्शन मात्रादपि तादृगा-नंद रसात्मक तापजननस्याप्याश्चर्यत्वाचित्रमुक्तं । एव कारेण तापोदयस्यावश्यकत्वं सूचितं । महोदार चरित्रत्व कथनेनाचार्येष्वेते धर्माः स्वाभाविका न त्वागंतुका इत्यपि ज्ञापितंत भवति ॥ ननु पूर्वोक्त नाम निरुपित सामर्थ्यवत्वं केवल पुरुषोत्तम एव संभाव्येत न तदतिरिक्ते । आचार्याणां तु प्राकृत प्रपंच एव प्रादुर्भावात्तद्धर्मवत्वेन च प्रतीयमानत्वात्कथं पूर्वोक्त सर्व सामर्थ्यवत्वं संभवतीत्येतच्छंका निरासाय लौकिक प्रपंच प्राकट्येपि तद्धर्मवत्व प्रतीतावपि यथा पुरुषोत्तमत्वं सिद्धयति तत्सिद्धि प्रकार ज्ञापनायाहुः ॥ प्राकृतानुकृति व्याज मोहितासुर मानुष इति ॥ प्रकृतिः प्राकृताः साधारणा स्तेषां अनुकृतिरनुकरणं तद्वदाचरणं सैव व्याज स्तेन मोहिताः आसुराः असुरसृष्टावुत्पन्नाः मानुषा मनुष्याः येन सः । कलिकाल तमच्छन्ना-नामपि तत्स्वरुपाज्ञानादासुर धर्मावेशिनां आसुरत्वमुच्यते । यथा तद्धर्मावेशिनां कंस पुतनादीनां । यथा, 'तां वीक्ष्येति'श्लोके अलौकिक धर्मवत्वेन गर्भे पुरुषोत्तमं स्थितं ज्ञात्वापि पश्चान्निग्र-हादिकं यत्कृतवा स्तत्प्राकृत वज्जन्मादि ज्ञान निमितकमेव । अग्रेपि श्रीगोकुले प्रभु प्राकट्य अनंतरं अपि पूतनादि प्रेषणं । पूतनादिनामपि या निःशंकं भगवद् ग्रहणे प्रवृतिः सापि "बालं प्रांतच्छन्न निजोरु तेजस"मित्येनेनालोकिकधर्माच्छादन पुर्वकं प्राकृत बालक तुल्य धर्मानुकरण दर्शन निमित्तकैन । शुद्ध दैवी जीवानां लौकिकानुकरण तुल्य गर्भ स्थिति ज्ञानवत्वेऽपि पुरुषोत्तमत्वेनपि स्व पक्षपातित्वेन तुल्य एव जातः ।तस्माद्भगवदद्भूतकर्मणोद्भूत चरितेषु विमृग्यं भवति वा, न, मूलमृष्ट्यातिरिक्ते स्वरुप संबंध, स्तत्स्वरुपानुभवज्ञ ज्ञान क्रिया विषयो, भगवतः श्रीअंगस्पर्शोपि, न भवत्येव । केन हेतुना, प्रभोः प्राकट्य विद्यमानेपि अंगसंगस्पर्शादिनापि तदितराणां कदापि किंचिदपि तत्संबंधो न भवेत् । तत्र तथासुरावेशिनां दर्शन स्पर्शादिकं विद्यमानेपि तेषां तत्स्वरुपाज्ञानात् प्रकृतिः प्रकृतत्वस्यैव स्फूर्त्या तत्स्पर्श गंधोपि नाभूत, तदा संबंधः कुत इति ॥ किंच वयस्यैं सह वने मल्ल विडम्बनेन श्रीअंगस्य केवल स्त्रीभावाखिल सामग्री विशिष्टस्य विहरणसमये तेषां स्पर्शादिकं भवति खलु, परन्तु तत्स्पर्शादि जनिता-

निर्वचनीयानंदघनरुपा सुखावाप्ति यथा व्रजवर घोषेंदु वदनासु न तथा तेषु,। यतः हेतुरित्याशक्य तत्प्रतीतौ पुरुषोत्तम मुखावयवरुपत्वमत्राप्यस्ति इति ज्ञापनाय तद् हेतु भूतं नामाहुः ॥ वैश्वानर इति ॥

वैश्वानरो वल्लभाख्यः सद्रूपो हितकृत्सताम् ॥
जनशिक्षाकृते कृष्णभक्तिकृन्निखिलेष्टदः ॥१२॥

वैश्वानर पदाद्"अग्निर्मुख" मिति श्रुत्या पुरुषोत्तम मुख रुपत्वमग्नेरुक्तं। तेन तन्मुखरुपाग्नेर्मूलस्त्वेकरुपेणानंद परमानंद रुपत्वं, मुखे वागप्यस्ति इति वाग्रूपत्वं च। श्रीमद्वल्लभाग्नीनां वाग्रूपत्वेन शुद्धपुष्टि भक्तिमार्ग प्रवर्तकत्वे या अनुपपत्तयः आशंकिता स्ताः सर्वाः परिहृता वेदितव्याः। अत्र परामर्श विषयोऽपेक्षणीयोस्ति। तत्र हेतुः वैश्वानरः प्रोक्तः। तत्र वैश्वानर पदोपादानात्पुरुषोत्तम मुखारविन्द फल वियोग संबंधि अत्यंतालौकिकाग्नित्व निरुपणादग्नि शब्दवाच्यार्थस्य परामर्श मध्य पातादग्नितुल्यत्वस्यैव विचारणादलौकिकाग्नेरेवाभिभावनात्केवल लौकिकत्वेऽग्नौ पूर्वोक्त पुष्टिभक्तिमार्ग प्रवर्तकत्वाद्यखिल सामर्थ्यस्यासंभवाद्वैश्वानर पदोपादानार्थे कश्चनानिर्वचनीयानंदानुभवानुरुपो विशेषो वक्तव्यो भवति। "स एषोऽग्नि वैश्वानरो यतः पुरुषः यो हेनं पुरुवविधं पुरुषांतरे प्रतिष्ठितं वेद" इति श्रुत्युक्त्या यत्राग्नेः सकाशादेव पुरुष प्राकट्यमुक्तमित्यनेन श्रीमत्स्वामिनीनां विरहाग्नेः सकाशादेव कृष्ण पदार्थस्य प्राकट्यं पुष्टिमार्गे तत्वं "स्त्रीभावेगूढः कृष्णपदार्थः क्वचिद्विवृत"इति वाक्यै स्तत्र तदग्नेः स्वरुपादिकं लौकिकाग्निवद्वाच्यं तद्विषयस्तु तत्स्वरुपाज्ञानवतामेव, न तु व्रजवरघोषरत्न सीमन्तिनीनां, अक्षण्वतांफलमिदमिति स्वविरहाग्नि साधनफल निश्चयंतीनां ॥ पितृचरणैरपि वल्लभाष्टके एवमेवोक्तमस्ति"यः सन्मनुष्याकृतिरति करुण स्तं प्रपद्ये हुताश"मिति हुताशस्य सन्मुष्याकृतित्वोक्त्या श्रुत्यर्थ मेव दृढयंति पितृ चरणः। "स एषोग्नि वैश्वानरो यतः पुरुषः" यतः यस्मात् पुरुष शब्देन रसात्मक पूर्णानंदघन रुपेण स्वयं पुरुषोतमोत आह पुरुष विधं, पुरुषोतमाकृत्यधिकरण भूत इत्यर्थः। इत्यनेनाकृतिमत्वमग्नावेव। साक्षाद्व्रजनानंद स्वरुपे रासाद्यनेक लीलादेः सावयवत्वं मुखाग्नावेव निश्चयंती उक्तवती पुरुषविधं, स पुरुष यथा लीला विविध भावात्मक स्तथैव तदग्न्यवयवादेरपि नानात्वं तथाविधत्वेनैवावगंतव्यं ॥ किंचाग्नेः सकाशाद् यदि बहि प्रादुर्भवति तत्रापि तद् स्मराग्नि साहित्येनैव। लीला लोके स्वमुखाकृति नील पीतारुण श्वेत तापाग्नि विक्षोभ प्रदर्शकां, स्व हृद्गतांनभिव्यक्तानंद परमानंद मात्र सावयवत्वेन स्वरुपं, द्विधा श्रृंगार रसात्मकं, लीला रमण भावात्मकं बाह्याभ्यंतरयोः स्वाति व्याप्तित्वावछिन्नत्वेन परमस्वातंत्रिकं, पुरस्कृत्य, व्रजवरघोष रत्नसीमन्तिनीनां नाभिरस रसात्मक शुद्ध ब्रह्मांडे विभिध स्व समवायित्वं निखिलं विपश्य, शुद्ध ब्रह्म साकारत्वं विविध लीलानुकरण विशिष्टं नटवरवपु स्वरुपं निगूढ भाव रुपं, कृष्ण पदार्थं एव संपादयति, तस्य स्मराग्नेरेवाति व्याश्यवछिन्नातिमात्रकत्वात्। स्मर शब्देन स्मरणं तस्मिन्नेव मुखारविन्द फल वियोगाग्न्यति व्याप्तिनां समुदायाक्रीडंतेन स्मर शब्द स्मरण वाच्यो भवति। तत्रहेतुः साक्षाद्विधा श्रृंगार रसात्मक भजनानांनंद रमण प्रिय मुखारविन्द फल रसालय रसास्वादज निरोधाध्यासाभिभूते स्मरणे मुखारविन्द फल वियोगाग्न्यतिव्याप्त्य कोटि कंदर्प लावण्यरुपस्य नटवर वपुषः एव प्रादुर्भावो भवति, तेन कृत्वा स्मर पदोपादाने स्मर पदादति मुख्य भावार्थ गौरवाल्लोकवत्स्मरस्यानुपयोग लीला लोके इत्यपि व्यापकात्तद्रस भावुकानां परम नर्मदो भवत्ययमाशयः। किंचान्यदपि इदं दृष्टव्यं यमुनाष्टके "स्मरपितु श्रियम् बिभ्रतीमि"

त्यनेन पूर्वोक्त प्रकारेण स्मरणस्य मुखारविन्द फल वियोगाग्नेयोरत्यंत (रसताति) व्याप्तत्वावच्छिन्नधर्म, मुख्यत्वादग्न्यात्मकत्वात्तेन स्वरुपात्मकत्वात्स्मराग्न्यात्मकत्वमापद्यते। मुख्य श्रीमत् स्वामिनीनां कंदर्प कामरुपानभिव्यक्ति करणानुकरणत्वात् स्मरस्य स्मरणवाचकत्वं सर्वजनीनं परमफलदमेव हि, यतो यस्माज्जायते मुखाग्नि संधूक्षणादेः प्रवृतिः स एव स्मरः। स्मरस्य पिता स स्तु वस्तु विचारे क्रियमाणे मुखाकृतिमतो वल्लभाग्नेरेव स्वरुपं निश्चितं भवति, यतः स्मरपितुः श्रियं शोभां विविध भावाकार विधायिकां निरोध रस निभृतां स्वयं श्रम सरिद्बिभर्ति, स्वस्य स्मरण स्मराग्नेः सकाशादेव प्राकट्यान्मिथः परस्परयो र्बाह्याभ्यंर भेदेन स्वरुपतो लीलारस भावाखिल चरितार्थतः स्वभावतः सजातीयत्वस्यातिमात्रकत्वात् श्रियमेव बिभर्तीत्यत्रायं भावः, न तु प्रद्युम्न स्वरुपस्य, द्वारकाधीशस्येति, न मंतव्यं पुष्टिभक्तिमार्गीयैः फलप्रकरणीय लीलामध्यपातिभिः श्रीमत्स्वामिनीकंदर्पोपासकैः॥ किंच सुबोधिन्यामपि श्रीमदाचार्य चरणै श्रुतिसंमत्या स्मर शब्दस्य स्मरण इति व्युत्पत्तेः स्मरणमेव प्रपंचितमस्ति॥ सोमोपनिषत्सु स्मरो वाकाशात् भूयं तस्मादपि बहव आसीरन्न स्मरंतो नैव कश्चन श्रुणुयु र्न मन्वीरन्नाविजानीरन् यदा वा ते स्मरेयुरथ श्रुणुयरित्यादिना स्मरणस्यैव स्मर शब्द वाचयत्वं मुच्यते, स्मरण इति व्युत्पतेरित्यादि लेखादपि स्मर शब्दस्य स्मरणमेवावधेयं। तस्माद्वैश्वानरपद भावार्थोऽत्यंत स्वीय स्वभाव संपतिभि र्गहन गतिरुपाभिरत्यंत सांद्रोऽस्ति, शुद्ध साकार ब्रह्माखिल राजधानी साहित्येन रराज। यतः एवं सति यद्यपि लौकिकानुकृतित्वे लौकिकानुकरणत्वं तथापि पूर्वोक्त प्रकार विशिष्ट स्वरुपानुभवीनां तज्जनित संसर्ग संभावनापि नास्ति। तत्प्राकृतानुकृति व्याजमात्रादेरासुराणामेव विमोहनात्मकत्वात् संभावन संस्पर्शस्य, तदीयानां भावनास्वविनियोगाद्वैश्वानर इत्युक्तं॥ वैश्वानर पदादग्नि र्मुखमिति श्रुत्या द्विधाश्रृंगार रसरुप पुरुषोतम मुखत्वग्नेरुक्तं, तेन तन्मुखाग्न्याचार्याणां स्वरुपानुभवादिभि स्तेदेवाकृतित्वे विद्यमाने सत्यपि तदीयानां बाह्याभ्यंतरयो र्भावनाखिल तात्पर्यार्थेषु स पदार्थः साक्षन्मुखारविंद फल वियोगाग्न्युद्भूतो नटवर वपुः स्वरुपानुभवादेरांतरीयपरम सौंदर्य साकाराखिल वस्तुवास्तवः तद्भावसंपत्याविष्कार हेतुभूतनामाधयं प्राकृतानुकृति व्याज मोहितासुरमानुषो वैश्वानर इति॥ ननु वैश्वानरत्वेन पुरुषोत्तम मुखारविन्द संबंधि अलौकिकाग्नि रुपत्वेनासह्य तेजोरुपत्वाद्भक्तानां सेवांतिके स्थित्या च बाधकत्वात्सेवादिकं न सिद्धयेदित्याशंक्य तेजो रुपत्वेपि सेवा सिद्धौ बाधकत्वाभावायाहुः वल्लभाख्य इति॥ वल्लभ इत्याख्या नाम यस्य सः वल्लभाख्यः। पूर्व नाम्नि वैश्वानरत्वमुक्त्वाग्रिम नाम्नि यद्वल्लभाख्यत्वमुक्तं तस्यायमाशयः॥ ये शास्त्र शब्दार्थ विषयपराः पंडिता दैवीजीवा अपि वैश्वानर शब्दार्थमवलंब्य, लौकिकाग्न्यनुचरितमभिभावयंते। लौकिकाग्नित्वमेवालौकिकाग्नौ परमानंदघन स्वरुपे कृष्ण फलरुपे करचरणादि युक्ताखिल परम सौंदर्य व्रजभक्त हृद्गत साकार रसात्मक ब्रह्म तद् गत निखिल लीला रस भावादेरपि साकार प्रकटनाखिल सामर्थ्यवत्यभिभावनं करिष्यंति। तत्स्वरुपाज्ञान विशाषतोऽनुमान प्रमाणादिकमाश्रित्य यत्तत्स्वरुपानुभवादिकं ज्ञातुं परामर्शादिकं क्रियते तस्य तत्प्रत्यक्षाभावे वैयर्थ्यापत्ति सुष्ठुत्वाद्वैयर्थ्यमेव बोद्धव्यं, यथा चंद्र वन्मुखं तत्सादृशे इतियोगाश्चंद्रत्वं स्वीक्रियते, ततः। साक्षान्मुख दर्शने च द्रवत्सादृशत्वस्य विलीनत्वात्तत्संभावनापि तदवलोकन विधौ वस्तु विचारे क्रियमाणे प्रतिबन्धकैव भवति, न तु तत्फल साधिका, इत्यनेनोपमान प्रमाणांतराशयादिकं निरस्तं परिहृतं बोधव्यं। तथैव ते पंडिता जीवा अनुमान प्रमाणमाश्रित्यानुभावनादिकं कुर्वंति। नील कुंतलैरावृतं मुखारविन्दं श्रुत्वाभिभावनं करिष्यंति वा कुर्वंति। तन्न स्वानुभूतां नीलिमां स्वभावन विषये आदाय तत्सं निभत्वं पुरस्कृत्य नील भवनोदरे प्रविशंति। तस्मिं स्तेषां तद्भावन विषये विशिष्टानां प्रवेशाधिकाराभावात्ते पुनः स्वभावना-

धिष्ठानमेवास्थाय तामेव नीलिमां विनिश्चयंतोऽनुभवंत स्तन्नीलिमादर्शनात्स्वच्छादर्श सदृशात् विविध भाव संचित विचित्रांतरित सुषमा संदोह प्रदर्शकात् केवल श्रीमत्स्वामिनीनां दुःखानुभव विप्रयोग नीलज्वालागाधबोध स्पष्टका नील शिखा संन्निभत्वानभिव्यक्तया परमानंदत्वमेव प्रख्यापकात्, निसर्गत एव सुस्निग्धात्, निसर्गत एव सितत्वात् सन्मुख स्थिताखिल भगवत्परिकर प्रतिबिंब सुषमा सांद्र संभ्रमात्; स्वलोल लीलया ते नील कुंतला व्रजभाभिनीनां सौंदर्य माधुर्य गर्वादिकं प्रशिथिलतंर कुर्वंति तद्दर्शनाभिप्रायात्, त एव नीलकुंतलाः सजल जलदालि निभतनौ मुख्य श्रीमत्स्वामिनीनां भावनात्मादर्शे प्रत्येकांग सुषमा समृद्धिषु प्रतिबिंबिता भवंति । तान्यंगानि पुनरेषु कुंतलेषु प्रतिबिंबितानि भवंति । तदवलोकन शोभा संदोह समया हिमुखत्वमेवाप्नुवंति । तथैव तद्वैश्वानर स्वरुप ज्ञानाभावे स्व कल्पना विषया भवंति भविष्यंत्यपि च ॥ किंच प्राकृताः कवयो भगवद्यशादिकं वर्णयंति । तस्मिन् विरहाग्नेश्च परंतु लौकिकाग्निमेवास्थाय तेषां विवक्षायामेवावगम्यते । तद्विरहाग्निः सकाशाद् देहेंद्रियादिषु दाहत्वं निरुपयंति । लोकवत्वेनैकागरु विरचितासनोपरि विरहाग्निः संतप्ता स्थिता सति, तदासनस्य द्रवं तत्स्पर्श निसर्गतो निरुपयंतीत्यादिना तेषां भावन विषये तन्मूलाग्नि स्वरुपानुभवज विज्ञानाभावे लौकिकाग्नावेवोत्यभिनिवेशादगरु विरिचितासनादे र्द्राव्वं भस्मसातत्वं प्रदर्शयंत्यभिभावयंति च । मुखारविन्द फलानुभवानुकृतिमन्मुखारविंद वल्लभाग्निज विरहाग्न्यवयवैक संपर्कतो, यद्द्रावादिकं, तस्मिन्पूर्वस्मादपि सौंदर्य माधुर्य साकार रसात्मक ब्रह्मावयवत्वापेक्षया स्वरुपतो लीलातोऽधिक रसात्मक साकारत्वस्यैव प्रतीति भंवति न तु लौकिकाग्निना दाहानंतरं रक्षावत्वं, तथात्वं, यतो यस्मिन् वैश्वानरे पूर्वोक्त प्रकारेण द्रावाद्युद्रेकाधिक्ये सत्यपि रसात्मक ब्रह्मणः स्वरुप लीलादीनां सावयवत्वमनूक्त सिद्धमेवास्ति, स्व प्रभा विशिष्टं सोपपत्तिकं, तद्दर्शनाप्तौ यत प्रियत्वस्य सांप्रतत्वं, तस्मिन् यद्वल्लभत्वं तस्य निरवधेरवधिं कर्तुं कः शक्तो न कोपीत्यर्थे अत उक्तं वैश्वानरो वल्लभाख्य इति ॥ तदितराग्ने स्तदत्यंतालौकिकाग्न्यप्रतिम प्रभावद्वैलक्षण्याति मात्रकत्वात्तदनुभावकानामपि तथात्वान्नमुखारविन्द फल वियोगाग्न्यनुभव विषयत्वं तेषां मूललीला मध्यपतित्वाभावात् । लौकिकाग्निः प्राकृत इति तत्तेजसि तारतम्यादल्पत्वं बहुत्वाभ्यां कदाचित् प्रियः कदाचिन्नेती या व्यवस्था तस्मिन्नग्नौ पूर्वोक्त प्रकारेण तदखिल परम सौंदर्य साकारता साहित्येन सार्वदिकी वेदितव्याः ॥ यथा शीत काले स्वभावतोप्यग्निः सर्वस्यापि शीत निवारकत्वेन प्रियो भवति न तु तदतिरिक्त कालेष्वपि तद्वदाचार्य सेवकानामप्याचार्येषु सदालौकिक तेज प्राकट्येन लौकिकाग्नि सेवनमिव कदाचित्सुखदत्वं कदाचिन्नेति शंका भवेदिति तच्छंका निराकरणायाप्युक्तं "वल्लभाख्य" इति। तस्यायमाशयः । लौकिकाग्निः प्राकृत इति तत्तेजसि तारतम्यदल्पत्व बहुत्वाभ्यां कदाचित्प्रियः कदाचिन्नेती यं व्यवस्था तत्र सार्वदिकी । आचार्याणान्तु पुरुषोत्तमास्यत्वेन तत्तेजसोप्यानंद रुपत्वेन सर्वदातिप्रियत्वमेव। न तु कदाचित्प्रियत्वे तारतम्यमपीति ज्ञापनायाप्युक्तं "वल्लभाख्य" इति॥ आचार्याणांतु पुरुषोत्तमास्यत्वेनानंद परमानंद रुपत्वात् स्वभावत स्तस्यैव प्रियत्वान्नलौकिक पदार्थवत्प्रिय हेतुत्व संभवतीत्याशंका निरासायोक्तं सद्रूप इति ॥ सद्रूपत्वेन केवल रस सत्ता मात्रं विवक्षितं, किन्तूउपलक्षणत्वेन सच्चिदानंद रुपत्वमप्युक्तं भवति न तु चिदानंद रुपत्वेन तद्गत सत्ता मात्रं । साक्षाद्रसात्मकपुरुषोतम शब्दार्थात्, सच्चिदानंदत्वे इतरांगत्वेन न तदांतरंगत सत्ता मात्रं विवक्षितं, किंतु स्थायिविप्रयोगरस सत्तातिमात्रकत्वात्सद्रूपमिति अस्यायमाशयः ॥ ननु लोके सदा प्रियेपि पदार्थे केनचिन्निमित्तेन कदाचिदप्रियत्वमपि भासते, तथा प्रकृतेपि कदाचिन्निमित्त वशात्तथात्वं भविष्यतीत्याशंका निरासायाहुः सद्रूप इति। वस्तु विचारे क्रियमाणे स्वतः सुखमेव प्रियंनत्वन्यत्। अन्येषां यत्प्रियत्वं तत्सुखहेतुत्वेन न तु स्वतः सुखत्वरुप-

त्वेन । लौकिक पदार्थानां प्रकृति प्राकृत संबंधात् स्वतः सुख रुपत्वाभावात् समय विशेषे सुखहेतुत्वमेवैतेषांतु सुखात्मकत्वेन सर्वदा प्रियत्व तु तस्मिन्नेवाग्नौ भगवन्मुखाकृतिमिति नान्यत्र॥ ननु पूर्व नाम्नि सद्रूपत्वोक्त्या सच्चिदानंद रुपत्वेन निरवध्यानंद रुपत्वेन स्थायि विप्रयोगेतर श्रृंगार रस स्वरुप सत्तातिमात्रकत्वात्सदानंदत्वं परमानंदत्वं च सर्वदाप्रियत्वं प्रतिपादितं भक्तानां । तथापि तत्प्रियत्वे स्व स्व भावनानुसारेण मनोरथोतपत्तेरावश्यकत्वात्तत्पूर्त्य भावजनित खेदेन तदंशे प्रियत्वांशस्यापि तिरोभावः संभवेदित्याशंकानिरासायाहुः हितकृत सतामिति ॥ सतां तद्विप्रयोग स्थायि रस सत्तामात्रैकानुभविनां तत्तद्भाव तारतम्येन तत्तन्मनोरथ पूर्त्या अभीष्टमेव संपादयति, न तु तत्संपादने विलंबमपि सहते इति ज्ञापनायोक्तं हितकृत्सतामिति । एतेन सर्वदा प्रियत्वानुपपत्ति पूर्वपक्षो निरस्तः। यथा वैश्वानर वल्लभाख्ययो नाम्नोः पूर्वोक्त प्रकारेण परमसौंदर्य साकारादेरतिमात्रत्वेन नानात्वात्परम सौंदर्यादीनां नित्यत्वात्तत्प्रियत्वस्यापि अनवछिन्नत्वात्सर्वदा प्रियत्वानुपपत्ति पूर्वपक्षो निरस्त इति भावः ॥ यद्यपि स्वांगीकृतेषु मूललीला मध्य पातिषु पूर्वोक्तैः स्व नामभिः स्व स्वरुपं ज्ञापितं, स्व मार्गीय फलं च, मुखारविंद भक्तिमार्गीय भगवद्भजन प्रकार स्तेषु न ज्ञापितः । स तु न वचन मात्रैक गम्य इति तेषां भजन प्रकार शिक्षार्थं स्वयं भजनं करोत्येत- ज्ज्ञापनायाहुः जन शिक्षाकृते कृष्णभक्तिकृत् इति ॥ जनाः सेवका स्तेषां शिक्षा शिक्षणं तत्कृते तन्निमितं कृष्णस्य सदानंदस्य फल रुपस्य भक्ति भंजनं तत्कर्तेत्यर्थः ॥ अनुपूर्वशः क्रमेण वैश्वानरो वल्लभाख्य सद्रूप इति त्रिभिः स्वरुपैः जनान् शिक्षयितुं तन्मुखारविंद फलांतरीय भक्त्या चरणं स्वयमाचारयंत, स्तदनुकूलाः सामग्री स्तेभ्यः प्रदर्शयंतः कृष्ण भक्तिकृतः स्व पुष्टिमार्गरीतिं प्रदर्शितवंत, आचार्य चरणा, स्तद्भावानुभावकं नाम जन शिक्षाकृते कृष्ण भक्ति कृदिति ॥ त्रिभिः स्वरुपैरिति किं, साक्षाद्भगवन्मुखारविंद रुपेण स्वयं वल्लभाग्नि स्वरुपं । वस्तुतः स्वत एव तत्त्रितयात्मकं तथापि भिन्नतया वक्ष्यते । वल्लभाख्य रुपेण साक्षाद्विधा श्रृंगार रसात्मक पुरुषोत्तमः परम सौंदर्य माधूर्य परब्रह्माविष्कार हेतुभूत, स्तत्स्वरुप विशिष्टं यद्व- ल्लभाग्नि स्वरुपं ता ि_तय सद्रूप इत्यनेनासदव्यावृत्यर्थं सदित्युक्तं । सदित्यनेन परम वस्तु परम सौदर्यं भगवतो रसात्मक ब्रह्मणो निखिल साकारात्वं विधायक सन्मनुष्याकृतिरित्यादि व्युत्पत्या सच्छब्देन परम सौंदर्य भगवतो निखिल साकाराकृतिमदितीहायमर्थः । स्वयं श्रीवल्लभाग्नि स्तद्रूप इत्यस्यापि गु तरं किं ? तत्परमसौंदर्यावयवाखिल स्वरुपाकृति रुपा श्रीमत्स्वामिनी तस्मात्स्वामिनीभाव संयुक्तेन रुपेण स्वयं सद्रूपः । स्वामिनीभावसंयुक्त इत्यर्थः । अनयानुपूर्व्या समं स्वयं त्रितयात्मकः । अत एवोक्तं सौंदर्यं निजहृद्गतं प्रकटितं स्त्री गूढ- भावत्मकं पुरुपं च पुन स्तदंतरगतं प्रावीविशत् स्वप्रिये संश्लिष्टावुभयो र्बभौ रसमयः कृष्णो हि तत्साक्षिकं रुपं तत्त्रितयात्मकं परम फलमभिधेयं सदा वल्लभमित्यादिनापि चास्मत्प्र- भुचरणानां स्वरुपमनूक्त सिद्धं त्रितयात्मकं अस्ति । तेनैव रुपेण जनान् मूल लीलामध्यपातीन् शिक्षयितुं स्वयं कृष्णस्य श्रीमत्स्वामिनीनां निगूढ भावस्य परम फल रुपस्य भक्ति कृदित्य- नुषंगः । भक्तिरित्यनेन स्वयं त्रिभिः स्वरुपैः स्वकीयानां शिक्षार्थं यो मुखारविन्द फल भक्तिरुपो मार्गः प्रकटितः । तस्मिन् सेव्यस्वरुपादिषु मंदिर वस्त्रादिषु स्वत त्रतापात्मकस्य स्वरुपस्य परमानं- दानुभव प्रद विरहाग्नेः प्रतिक्षणेष्वभिनव नव भाव संपत्या संममति व्याप्तिमेधयंत स्तेष्वेव व्रजेन्द्र सद्मनोखिलां स्वकीय भक्त्याचरणानुकूलांसामग्री प्रदर्शयंतः स्वकीयानामग्रिम फलोपरिलक्षकुर्वंतः, स्वकीयान् भूय्याविर्भूयान् या रीत्या शिक्षयंत्युपदिशंति च इति प्रभूणामाशयमाश्रित्यैव पितृ चरणैरपि तन्नामाष्टोतरशत एतददेयानंद प्रद तत्कृत्यखिलाविष्कार हेतु भूतं नाम निरुपितं । जन

शिक्षाकृते कृष्ण भक्तिकृदिति । भजन प्रकाराः पुराणागम प्रसिद्धाः सं त्येव तद्वारा स्वीयेषु शिक्षण सिद्धावपि यत्तच्छिक्षार्थं स्वस्य भजन कर्तृत्वमुक्तं तत्रायमाशयः । यद्यपि पुराणागमादिषु भजन प्रकाराः संत्येव, तथापि ते न मुखारविंद फल भक्तिमार्गीयाः, पूजामार्गीयत्वेन न रसात्मक भजनानंदे पुरुषोत्तम स्वरुपानुभव फल पर्यवसायिनः किंतु तद्विभूति पर्यवसायिनः तत्प्रतिपाद्य गोपालादि मंत्र देवतायाः मंत्राधीनत्वात् पुरुषोत्तमस्य न रोधयतिमामित्यादि वचनैः सर्वानधीनत्वोक्ति पूर्वकं केवल भक्त्याधीनत्व निरुपणेन स्पष्टमेव वैलक्षण्यमिति । नतदुक्त प्रकारस्य मुखारविन्द फल भक्ति मार्गीयत्वमित्येतज्ज्ञापनार्थ "कृष्ण भक्तिकृदिति" कृष्णः पुष्टिमार्गे तत्वं स्वीभावेगूढ स्तद् भक्ति कृदित्यनिर्वचनीयो भावोऽस्माभिः प्रपंचित एतद्बोधार्हैरपि तथैवावधेयः। यदि पूर्वोक्त विविध भाव संदर्भ विशिष्ट भजन सेवाप्रकारं स्वमार्ग मर्यादया स्वयं कृत्वा स्वकीयान्नाशिक्षयेत्तदा स्वमार्गीय भजन प्रकाराज्ञानात्तदीयानामपि प्रकारांतर भजनाभिनिवेशात्तन्कृन्मुखारविन्द फल वियोगाग्नि भजनस्य मुखारविन्द फल भक्तिमार्गीयत्वमेव न स्यादित्यत उक्तं जनशिक्षाकृते कृष्णभक्तिकृदिति ।। स्व करणोत्तयातद्भक्त्याचरणानुकूल क्रियादेः स्वातिरिक्तै स्त त्करणक्रियाकृतौऽव दानत्वेऽसामर्थ्यमेव निश्चित्य स्वयमेव कृष्ण भक्तिं कृता स्वकीयान् शिक्षितवान् ।। किंच स्वकरणोक्त्या स्वमार्गे भगवद्भ जनस्यैव परमपुरुषार्थत्वं नान्यस्येति ज्ञापनायाप्युक्तं जनशिक्षाकृते कृष्णभक्तिकृदिति ।। एतेन पूजामार्गे पूज्यदेवतायाः पुरुषोत्तम विभूतित्वेन पुष्टिभक्तिमार्ग भजनीयस्य पूर्णरसात्मक ब्रह्म पुरुषोत्तमत्वेन पूजा भक्तिमार्गीययोरपि फल तारत्तम्यंमुक्तं भवतीति नातः परमधिकं वाच्यमिति सर्वमवदातं । कृष्ण पदस्य फल वाचकत्वं नित्यानुक्त सिद्धमस्ति । श्रीमत्स्वामिनीनां शुद्ध वियोगाग्नि र्महान् यज्ञफलमित्यनेन फल वाचकत्व मवधेयं । तत्फलं तन्मार्गीय भजन पराणामेव न तु मार्गांतरीयं । मार्गान्तरीयं फलं तत्तु मार्गांतर भजन पराणामेव । अथवा पुष्टिभक्तिमार्गीया मार्गान्तर भजनादावासक्ता कदाचिद् भवेयुः तदा तेषामपि मार्गांतरीय भजन फलावाप्तिं भक्तिमार्गाधीशः स्वयं कारयति । "आसक्तौ भगवानेव शापं दापयति क्वचिदि" त्यादिनापि च । वस्तुतो यथा वृत्रस्य स्व बुद्ध्यासक्ति विषयत्यजने तदितरे आसक्ति भवने तथात्वमभूदित्यतोऽस्मिन्मार्गे श्रीमद् व्रजेन्द्रकुमार निखिल शिखाग्नि सुषमा सांद्रत्वेन वसति श्रीमद् वल्लभाग्नि स्तत्स्वरुपानुभव विषयासक्त्यतिरिक्ते आसक्ति करणऽत्यनुचिततरमिति कृत्वा न कार्येति भावः ।। किंच यद्यपिभक्ति पदस्य स्नेह वाचकत्वेपि यद्भजन परत्वमुक्तं तत्स्नेहस्य कृति साध्यत्वाभावादत्र च भक्तेः कृति साध्यत्वोक्त्या भक्ति पदं भजन परत्वमेव न स्नेहपरमिति ज्ञापनायोक्तं कृष्ण भक्ति कृदिति, तत्रापि हेतु भक्ते मुखारविंद फल वियोगाग्न्यात्मकत्वाद्धदरपांडु सुषमा सांद्र सुख समूहात्मकत्वाद्विविध संचित विचित्र भावात्मादर्श रुपात्मकत्वादत्र तत्स्नेहस्य कृति साध्यत्वाभावात् तद्भक्ति भजनं सेवा साधनाधिक्यादेव तद्भक्तियोग साध्य साधन नैकट्यात्तद्भक्ति भजनं परमफल रुपमिति यावत् तदेव ज्ञापना योक्तं भक्ति कृदिति ।।

ननु स्वीयानां पूर्वोक्त प्रकारेण स्वमार्गीय भजन सेवा प्रकार शिक्षार्थं स्वस्यैवैतावत्करणस्य किं प्रयोजनमित्याशंका निरासायाहुः निखिलेष्टद इति निखिलं यत्स्वभक्ति मार्गीयमिष्ट द्विधाश्रृंगार रसात्मक भगवत्स्वपं, तदनुभव साक्षात् फलसंबंध वांछितं तद्ददातीति निखिलेष्टदः । यद्वा, भक्तिमार्गीय भजन शिक्षणेन यन्निखिलेष्टदत्वमुक्तं तस्यायमाशयः, मुखारविन्द फल भक्तियोगादे र्यथा विरहाग्ने र्नानात्वाद्भक्तियोगांतरेपि बहु विधत्वात्तत्तन्मार्गेऽत्यभिनिवेशात्सति तन् निरोधांनुभव भावसंपति सौकर्ये, तत्तन्मार्गानुरोधेन परम फल रुपेणेष्टं भवति तेनेष्ट संदर्भेणांचितं भगवत्स्वरुपं तद्दान विषयेपि निखिलेष्टद इति भावार्थानुसंगतेः फल पर्यवसानं मुखारविन्द फल वल्लभाग्नावेव पर्यवसति, तस्मिन्नु स्वरुप लीला रस रासाद्यनेक

लीलावयवत्वं, परमसौंदर्य साकाराग्नि विक्षोभोद्भूतत्वं मूल धामनोऽखिलावयवत्वं, प्रतिक्षणेष्वभिनव तरुणानंदरुपत्वेन परमानंदानुभववत्वावछिन्नत्वं, (भक्ति) विप्रयोगाग्नि समुदायित्वं, तत्साधन संपति तत्साध्यफल समुदायित्वं, तेन मुखारविन्द फल भक्तियोगाग्नि रुपेण प्रकटीभूय स्वयं तद्भक्तियोगाचरणं कृत्वा स्वकीयान् तथैव शिक्षयंत उपदिशंत स्तथा विधवत्वेनैव निखिलेष्टदो भवतीत्यभीप्रेत्यैव पितृ चरणा उक्तवंतो निखिलेष्टद इति ॥ अत एतदनुरोधेनैवाग्रिम नाम्नि प्रपंचितं सर्वलक्षण संपन्न इति पूर्वोक्त प्रकार विशिष्ट रुपेणैवस्वयं स्तेनैव रुपेण निखिलानुभव विशिष्ट रुपेणैव स्वयं सर्वलक्षण संपन्न स्तेनैव रुपेण निखिलानुभव विशिष्टमदेयदान विषये निखिलेष्टद इत्यनुपूर्व्या समं पूर्वापर नाम्नां भावार्थ संगति र्ग्रहणीया भवति तदीयै स्तद्विरहाग्न्युपासकैः । अयं मदीय आग्रह स्तेषामनुभव निखिल सौकर्य संपतौ विविध भाव संपत्युत्पादको भवति, यदि स्वयमेतावत्कृत्वा स्वीयानां पूर्वोक्त प्रकारेण स्वमार्गीय भजन न शिक्षयेतर्हि स्वमार्गे तापाग्निज्वालात्मके भजनमेव मुख्यमिति स्वीयानां तदज्ञानां निखिलेष्टदत्वमेव नस्यादत उक्तं निखिलेष्टद इति ॥१२॥

सर्वलक्षणसम्पन्नः श्रीकृष्णज्ञानदो गुरुः ॥
स्वानन्दतुन्दिलः पद्मदलायतविलोचनः ॥१३॥

एवं पूर्व नाम्नि निखिलेष्टदत्वमुक्त्वापि यत् सर्वलक्षणसंपन्न इत्युक्तं तस्यामाशयः । भक्तिमार्गीय भजन शिक्षणेन पूर्वोक्त निखिलानंदानुभव विशिष्टं यन्निखिलेष्टदत्वमुक्तं एतावतैव भक्तिमार्गीय सर्वेष्टदातृत्वं न सिद्धं, किंतु यथा मुखारविन्द फल परम भक्ति रुपस्य विरहाग्निना श्रृंगारोत्तरदल स्थायि निखिलांगाकृतिमतो विरहाग्ने नानात्वमस्ति भक्तिरुपेण सार्द्धं, तथैव मुखारविन्द फल भक्तिमार्गस्यानेक विधान्येव लक्षणानि संति भावाग्नि भेदैरन्युदभुतानि तद्दातृत्व व्यतिरेकेण सर्वार्थ दातृत्वं न संभवतीति तादृतृत्वं तल्लक्षण संपति व्यतिरेकेण न संभवतीति तद्दातृत्वं सामर्थ्यं ज्ञापनार्थमुक्तं सर्वलक्षण संपन्न इति ॥ आचार्या साक्षाद्भगवन्मुखारविंद फल भक्तिमार्गाविष्टात्वाद्विरहाग्न्यात्मकत्वात्परम सौंदर्य साकार निखिल भाव संपत्यात्मकत्वादनेक रासाद्यनुकरण लीलात्मकत्वादधरं मधुरमित्यारभ्य फलितं मधुर पर्यंतं या अनिवचनीय केवल विरहाग्निरन्युदभुताः भावसंपतय स्तन्निखिल भावाग्नि मूर्तिमत्वात्स्वरुप भावना भावाग्न्यात्मकत्वाल्लीला भावना भावाग्न्यात्मकत्वात् भाव भावना भावाग्न्यात्मकत्वात् समुदायित्वेन मुखारविंद फल वियोग वह्निभाग्नित्वमुच्यते तत्तन्निरोध संप्रदायेन तस्मिन्नेव वह्निभाग्नौ सर्व लक्षण संपन्नत्वं निखिलेष्टदत्व विशिष्टमेवेष्ट, यत एतद्दातृत्व व्यतिरेकेण न सर्वदातृत्व सिद्धयति न संभवति च । यतस्तद्दातृत्व सामर्थ्यं जनकं तल्लक्षण भाव संपति विशिष्टं लक्षणं ज्ञापनार्थमुक्तं सर्वलक्षण संपन्न इति । तत्र प्रथम स्वरुप भावना भावाग्न्यखिल चरित्र विशिष्टं निखिलेष्ट दातृत्वेन यल्लक्षणं तन्निरुप्यते । अस्मिन्प्रकटित साक्षात् भगवन्मुखारविंद फल वियोगानल भक्तिमार्गे आदिमे स्वरुप भावनाया एव प्रधान्यमस्ति तस्मादादौ स्वरुप भावनैव सेव्य स्वरुपादिभिः फलरुप साधनैः किंबहुना मंदिर वस्त्रादिभिश्चकार्या । तत्रहेतुः रसोवैस इति श्रुत्या सो रस इत्यादिनापि च तत्स्वरुपस्य द्विधा श्रृंगार रसरुपत्वात् "द्रव द्रव्येति" भावाव्यक्त ज्ञापकादर्शात्मकत्वात् स एषोग्नि र्वैश्वानरो यतः पुरुषः योहैन पुरुष विध पुरुषांतरे प्रतिष्टितं तं वेद इति श्रुत्यापि तत्स्वरुपांतरगत त्रिदलात्मकाग्ने र्नित्यस्थिति सौष्टवत्वात्तत्स्वरुपस्य तथात्वात्तद्दर्शनात्स्पर्शनात ध्यानात कीर्तनाच्च गानात्तदग्नेरति व्याप्त्या प्रेमासक्ति व्यसनादिषु स्वरुपात्मकत्वमेव प्रेमासक्ति र्व्यसन तारतम्येन संभवति, तत स्ते प्रेमासक्ति

र्व्यसनादय स्तत्स्वरुपात्मका विरहाग्न्युद्रेक संप्रदाय प्रवर्तका विरहाग्न्युद्रेकातिमात्रकत्वस्य प्रदर्शका स्तत्स्वरुपानुभवातिरिक्तामनुवृतिं विनिवारयंत स्तदनुभव प्रवृद्धि मेधयंत स्तत्स्वरुपानुभव भाव संकीर्ण वन एव निरोधयितुं शेकुः । वस्तुत स्तदैव ते तद्वल्लभाग्नि स्थिति पूर्वकत्वात्स्वरुप भावनाग्नि विक्षोभ संप्रदायेन समं स्वरुपानुभव गव्हरे दरे नेतव्यार्थे परम शूरा अभवन् भवंति च । स्वरुप भावना भावाग्नि सर्वलक्षण संपन्न स्तत्संधात सौष्ठवत्वात्तद् व्यतिरेकेण ते प्रेमादयः केवल ब्रह्मानंदानुभव जन्य भावांन् प्रकृति प्राकृति जन्य स्वरुपानंदं प्रयच्छंति । अतः स्वकीयेभ्यः प्रथम साधनदशायां श्रीमद्वल्लभाग्निः सर्वलक्षण संपन्नत्वेन स्वरुप भावना भावाग्नि परमफल रुपं सर्वेभ्यो ब्रह्मानंदात्मकेभ्यः स्वरुपेभ्यः प्रथक्त्व प्रज्ञापकं प्रयच्छति । तदीयैरपि प्रथमदशायां साक्षाद्विधा श्रृंगार रसात्मकस्य भजनानंद पुरुषोत्तमस्य श्रीमत्स्वमिनी निगूढ भावस्य भावनैव कार्या ॥ सेवाफल साधनादेरनुकरणादे मूलाधिष्टानत्वात्तदधिष्ठातुरभावात्प्रेमादिषु सेवाफल साधन संपत्यादिष्वपि कृतार्थहेतुरव शिष्यते, तज्ज्ञानाभावे पाप नाशकत्वं न तु भक्तिमार्ग इति श्रीमद्वल्लभाग्निनां सूक्त्यापि तदेवावगंतव्यम् । तस्मादादिमे स्वरुप भावनैव मुख्या । स्वरुप भावनेत्यनेन ध्यानाध्यासातिमात्रकाग्रयववती तद्भावनात्वेनोच्यते ध्यानाध्यासस्य परोक्षाग्न्यतिमात्रकत्वाच्छ्रुतानुरागाग्नित्वमनूक्त सिद्धमस्ति ।

तस्मिन्नेवाग्नौ दृष्ट श्रुतानुरागेभ्योऽतरंतालौकिकाग्नित्वं तदुद्रेकाधिक्यत्वं च । केन हेतुना श्रुतानुरागाग्नौ परोक्षाग्नेः संगमात सः श्रुतानुरागाग्निः स्वयं स्व प्रतियोगीमेव प्रकटयतीति भावः । यथा श्रीरुक्मिण्याः श्रुतानुरागाग्निा सकाशादेव साक्षाद्द्वारिकाधीश स्वरुप प्राकटयं संदर्शनानुभव मनोरथांतरुप फल संबंधोऽभूत, तथैव तन्मार्गापेक्षयात्र साक्षाद्भगवन्मुखारविन्द फल वियोगाग्नि प्रकटित मार्गे स्वरुप भावनादेरत्यंतातुल्यातिशयादेतन्मार्गस्थानां अभिभावनादिकं स्वरुप संबंधि कर्तव्यमतिशयात् । अनेन क्रमेण स्वरुप भावना लक्षणैकदेशेनानेकानुभावाग्नि स्तारतम्येन साकं स्वयं सर्वलक्षण संपन्नाः, तेन कृत्वा स्वरुप भावना विषयैक परत्वात्सर्व लक्षण संपन्नात्मकेन स्वरुपेग सर्वेषां स्वकीयानामनुभवैक गम्येन निखिलेष्टद इति भावः । यतोऽस्मिन्मुखारविन्द फल वियोगानल मार्गे प्रथम दशायां स्वरुप भावनैव सर्व प्रकारैरनेक साधन फलरुपै र्बाह्याभ्यंतरयोः संयोग विप्रयोगानुभवाग्नि संज्ञिकयोः परम फल हेतु भूता । शुद्ध रसात्मक श्रुतीनां वरदानानंतरं सहजानुरागाग्न्यनुभवोद्रेकोऽभविष्यमे, श्रीमद् व्रजेन्द्र व्रजवरघोषरत्न सीमन्तिनीनां निकुंज वन्यंतरे, प्रादुभूतः । सहजानुरागाग्नेरपि स्वरुपानुभव प्रत्यक्ष विषयत्वस्याभावात् सहजानुरागाग्नावेव मुखारविन्द फल वल्लभ वियोगाग्न्यद्भूत कर्मणो दृष्टानुरागाग्नेः संनिधेरतिमात्रकत्वादप्रत्येक्षेपि गोचगतिमात्रकत्वात् साक्षात्स्वरुपानुभव फलसंबंधोभूत्तासां, तत्रापि सहजरागाग्नि जनितं सहजानुरागाग्नावेकदेश लक्षणैक भूतं सर्वं लक्षण संपन्नत्वं श्रीमद् वल्लभाग्ने र्निश्चित्यतत्सर्वलक्षणत्वेन सार्द्धं निखिलेष्टद इत्याख्यार्थं हृदि संनिविश्य स्वानुभवपर्यवसानं सफलय । किंच स्वरुप भावनयैव मूल लीलादिषु कंदर्परुपेण निगूढ भाव रुपेण कृष्णपदार्थ स्वरुपेण श्रीनाभिकोशात् तद्भोग्यत्वेन प्रकटो भवति. पुनः स्थायित्वेन तस्मिन्नेव स्थितो भवति । अत एव स एवोक्तः श्रीशुकेनैव कृत्वा तावंतमात्मानं यावत्योगोपयोषित इत्यादिनापि च गोपिकानामेव भावरुप स्तद्भोग्यत्वेन प्रकटः कृष्ण शब्दार्थं इति श्रीमदाचार्य चरणानां सूक्तिभिरपि तासां स्वरुप भावना भावाग्नि यज्ञफल रुपत्वेन प्रकट परमानंद इत्यत्रायंभावः, कथंभूतः प्रकट परमानंद, कृष्ण निगूढभावो विविध लीला विशिष्टो । अऽतोग्ने स्वरुपाभावनानंतरं 'अन्तर्हितेन भगवति सहसैव व्रजांगनाः अतप्यंस्तम चक्षाणाः करिण्य इव युथपम्' एवं भवन प्रस्तावे गत्यानुराग स्मित विभ्रमे क्षितै र्मनोरमालाप विहार विभ्रमैः अक्षिप्तचित्ताः प्रमदारमापते स्तात्ता विचेष्टा जगृहुस्तदात्मिकाः इत्युन्मत वचोगोप्यः कृष्णान्वेषण कातराः लीला

भगवत स्तास्ताह्यनुचक्रुः तदात्मिकाः'' इत्यादिभिः पूर्व स्वरुप भावना भाव भावाग्न्यनुभवजांतर महा फलस्याचिरस्थायित्वाद्बहिः संवेदनाधिक्याद्भगवतो लीला भावाग्न्यखिल चरितार्थेषु संनिवेश लीला भावना भावाग्निः स्वरुप भावना भावाग्न्यनुभावांतर महा फलांतरे स्व प्रतिबंधकत्वं प्रदर्शयन् फल स्थायित्व भवन्नमरुंधत । अत आदिमे यदि स्वरुप भावना भावाग्न्यनुभव जांतर महा फलानुभव भाव संपतिः स्वयं स्थायि विप्रयोग रस जनितां स्थितिं व्रजेत् ॥ तत एव लीला भावना भावाग्निः ''सर्व लक्षण स म्पन्न''त्वेन लीला परत्वेनापि स्वान्तरावकाशात्तदांतरीय स्थायित्वमेव प्रकटयेदेवेति तत्र किं वाच्यं स्वरुप भावना भावाग्न्यनुभव स्थायित्वे स एव लीला भावना भावाग्निः स्वरुप भावाग्न्यनुभवजांतर महा फलानुभवांतरे तिरोधायक एव भवति ॥ अत एवांतरे महा फलानुभवेऽस्थायित्वेन सत्येव यो लीला भावना भावाग्निः प्रादुरासीत्स तदांतरीयत्व सहकारी न भवति किंतु तत्फलासाधक एव विज्ञेयः । अत एवोक्तं श्रीमदाचार्य चरणैः ''अंतः प्रविष्टो भगवान्मुखादुद्धृत्य कर्णयोः पुनर्निविश्यते सम्यक् तदा भवति सुस्थिरः'' इत्यादिना । आंतरीय सुस्थिराभावे बाह्यापि लीलाद्यनु करेणे साक्षात्प्रभु प्राकट्याभावेऽस्थायित्वमेवावेहि । वस्तुतोऽस्त्यंतरेव तासां परंतु बहिः संवेदनाधिक्य संसर्गत एवांतरेप्यवांतर्भूतः स्वयं सर्वाज्ञात लीलाः सोंतर्संबंधी शुद्धांतरत्वं सर्वात्म भावाधिकरणभूतं विनिश्चयन्नेवांतरे महा फल रुपेणोत्तर श्रृंगार स्थायि भाव रस रुपेण स्थिरो भवति नोचेद्विपर्ययः स एवोक्तं प्रभुभिः यस्मात् यावदात्मा प्रपन्नो भृत्तावद्वै रमते हरिः सोंतर्संबंधी तिरोधत्ते हि हरिश्च सदित्यादिभिरांतरत्वं परम फलरुपत्वेनैव स्वयमाचार्याः स्पष्टयंति पुनरग्रे निखिल साधनाधिष्टान मनपेक्षैव पुनः स्वरुप भावना भावाग्न्यनुभव समूहालंबनं ययुः । पुनः तत्स्वरुप भावना भावाग्निः प्राचुर्यात्तदेनांतरीयं विविध संचित विचित्र स्थायी भावा नल्पाकस्य विभूषितम् परम फल रुपं परम सौन्दर्य निखिल साकारादेः परम रस रसात्मकस्य मूलाधिष्टानं भजनानंद स्वरुपमेव तासां मध्ये प्रादुर्भूतम् । अत एवानयानुपूर्व्यापि प्रथम दशायां चोत्तर दशायां स्वरुप भावना भावाग्निरेव सर्व भवन समर्थः परम फल प्रदः प्रथम दशाप्यामुत्तर रसानुभव पर्यवसायित्वे फल साधकः उत्तर दशायामंतरानु भव पर्यवसायि फल साधक इति द्वाभ्यां बाह्यांतराभ्यामेव स्वरुप भावना भावाग्निः बाह्याभ्यंतर विभेदेन साधन स्तारतम्यताभिः फलानुभव तारतम्यताभिः विविध फलानुभव नर्मदो भवति खलु परंतु एतन्निरुपण भावामृत रसं श्रीमद्वल्लभाग्नि संनिध्युग्र महिम्ना पद्मनाभदास प्रभृतय एव पपुः । कथं तेषां साक्षाद्भगवन्मुखारविंद फल वल्लभाग्न्यनुभवाति मात्रकत्वस्य सांप्रतत्वात् तदुपास्य शुद्धानन्य धर्मत्वावच्छिन्नत्वात्तथैव तद्रसानुभव प्राचुर्याधिकयात्तदर्थावगमातिशयात्तद्रस पान कर्तुं त एव शेकुः समर्था भवन्नित्यर्थः ॥ किंच स्वरुप भावना भावाग्न्युनुभव प्राचुर्यं निसर्गत एव तदंतरभूतस्तासां परमांतरीय स्थायी फल रुपस्तासां मध्ये एव प्रादुरासीत्तेन कृतवात्तासा मांतरीय स्थायि विप्रयोग रसानुभवं बहिः प्राकट्ये सत्फल साधकत्वमभूत् । तत्र हेतु रांतर संबंधिनो बहिः प्रादुर्भवने पुनर्बहिरानंद प्रपंचानुभव संसर्गतः । पुन र्बहिः स्वरुप भावना भावाग्नौ संयोगानुभवाग्नि संमेलनेने पुनरान्तर स्थायित्वेन साकं भवनं दुस्तरं भवति । अतस्तत्प्राकट्ये सति तासां आंतर फलानुभवापेक्षया क्षतिरेवाभूत् ॥ न तु फल साधकत्वम् ॥ अत एवोक्तं श्रीमदाचार्य चरणै निरोध लक्षणे ''क्लिश्य मानान् जनान् दृष्ट्वा कृपायुक्तो यदा भवेत् ॥ तदासर्वं सदानंदं हृदिस्थं निर्गतं बहिः'' इत्यनेन प्रभुभिरपि स एवार्थो मूर्तिमान्प्रदर्शितोऽस्ति । सर्वदानंदो नित्य रुपो स्थायि विप्रयोग रसात्मक पूर्णानंदो यदि बहि रजनि तदा क्लेशस्यापि फल साधकत्वे सत्येवाफल साधकत्वमभुदिति भगवतः कृपाया अपि परम फल साधकत्वे सत्येवाफल साधकत्वमभूदिति फल वियोगाग्नि मार्ग मर्यादया बुद्ध्यस्व । ननु ताः सर्वाः गत गर्वासाधना आसन् कैवल मुखारविंद फल वियोगज दैन्यमेवापुः पुनर्वस्तु

विचारे क्रियमाणे तासां निरावरण विरहानुभवानुरुपाग्न्युद्भूतः परम भजनानंद पुरुषोत्तमः शुद्धब्रह्म तद्भोग्यत्वेन तत्फल रुपत्वेन तत्र भवद्भिरेवं निरुपणं क्रियते, यद्यप्यासां मध्ये एवासां फल रुपेण बहिः प्रकटस्तथाप्यांतरानुभवांतरे स्थायि विप्रयोग स्वरुपानुभवामृत पानेन तथात्वेनैव फलसाधको न भवत्यांतरीये प्राकट्ये फल रुपे फलस्याफलात्तेः प्रकटित वह्लभाग्निवर्त्मन्येव प्रत्युत विरोधापत्तावनुचिततरमिति चेत् सत्यं। यद्यप्यांतरीय स्वरुपानुभवानुरुपस्य बहिः प्राकट्ये सति परम फल रुपत्वं परंतु विमर्षणीयं, पुनरांतर भवनस्य पुनस्तथात्वेनैषांतरत्व प्रापिकानां विरहोद्रेक सामग्रीणां समुदायत्वमपेक्षते वा न तदेवमपि स्यात् परन्तु बहिः प्राकट्ये बहिः संयोगानुभवानुरुपः स्वरुप भावना भावाग्नि द्वितीय भगवांल्लोक वेद प्रसिद्धे पुरुषोत्तमावर्णं संमेलनेनांतर भवने विलंबोऽभूत्। यद्यपि तदावरणस्यास्पर्शान्न स्पर्श विरोध बाध। स्तथापि तमनपहाय कथमांतरर्भवितु मर्हति कैवल्यावरणयो र्भेद दर्शनात् तन्समये लोक वेद प्रसिद्ध पुरुषोत्तमस्य व्यापि वैकुण्ठादाविर्भावोऽभूत्। सो व्यूहरहित पुरुषोत्तमः केवल रसात्मकाश्रयातिरिक्ते स्थातुमशक्यत्वाद्योगमायाभिप्रायेण सममस्पर्श योगेनापि स्थातुं पुरुषोत्तम संनिधावेव क्षमो भवति नान्यत्र तासां निगूढ भावो बहिः प्राकट्ये सत्येवाक्षर ब्रह्मणो भावनाकार रुपेण चिरकाल दर्शनार्तिवता लोक वेद प्रसिद्ध पुरुषोत्तमेन प्रादुर्भूतस्तत्पूर्वं व्रजवर घोष सीमंतिनीनां निगूढ भाव रुपत्वेन तास्वेव तासां भावना मर्म मंडलेषु तत्संनिवेशात्ततो लोक वेद प्रसिद्धः पुरुषोत्तमः स्व व्यापिवैकुण्ठे धामन्येव ययु। तद्धामनोऽक्षरात्मकत्वादेकादश वर्ष संबंधिनीं लीलां रसात्मकस्य शुद्धब्रह्मणोऽनुभूयाक्षर ब्रह्मणे एव निवेदितवान्॥ पुनः पूर्ववत् स्व धाम्नि लक्ष्म्या सह रेमे। यदैव क्लिश्य मानान् जनान् दृष्ट्वा कृपायुक्तो भूत्वा तासां भावना मर्म मंडलेभ्यो बहिः प्रादुरासीत्तदैव तथैव तस्याविर्भाव स्तत्रापिहेतुः। स्वयं भारते क्षेत्रे माथुर मंडलेऽखिल ब्रह्माण्डे च तद् ब्रह्मणः सत्तातिमात्रकत्वस्याति व्यापकत्वात् यद्यपि स्वयं योगमाया तत्प्रसिद्धयितुं तत्परास्ति तथापि तत्सत्ता प्रति पालिका स्वयमेव पुनः स्वप्न द्वारा ब्रह्मणो भगवदर्शनमपि कारयितुं भगवदीक्षावर्तते तथैव योगमायापि स्वयं दर्शनावकाश रुपामधिकार विचारान्वितां तिरष्करणीयमुद्घाट्य तावन्मात्रैव प्रदर्श्य पुनस्तथैव तां प्रक्षेपितवती। यतस्तत्समये पुन र्लोक वेद प्रसिद्ध पुरुषोत्तमस्याविर्भावो मंतव्यो भवति साक्षात द्विधा श्रृंगार रस रुपामृत पानं प्रमत्तै रुपासकैरनन्यैः परमांतरंग भक्तैः तथैव श्रीमदाचार्य चरणैः सुबोधिन्यां प्रपंचितमस्ति परंतु दृष्टार परि शोधकाः कुतः विनाग्नि कुमारात्। किंच मूल लीलास्थ शुद्ध ब्रह्म रसात्मक पुरुषोत्तमः स्व रसात्मके ब्रह्म धामन्येव स्वात्मना सहस्त्र शक्तिभिश्च रमति। एतासां हृद्गतस्य स्थायि विप्रयोगाग्न्यद्भुतस्य पुरुषोत्तमस्य स्थितिः स्थायित्वादान्तरं तु महाफल रुपत्वादेतासां भाव रुपत्वेनैव विजानीयात् न तु मूल लीलां स्वयमक्षरातीत शब्दातीत ब्रह्मांडातीत वेदातीतो विविध रासाद्यनेक लीला विशिष्टोन्सृज्यै तासांदित्सु तत्समया या नित्यधाम्नेति मात्रकेष्वासीन इति न मन्तव्यं तस्य धाम्नोऽग्नि नित्यत्वस्य प्रमानात। तस्मात्तत्र स्थितेनैव स्वयं परम सौंदर्य रासाद्यनेक लीलावयवान् निरवध्यानंद परमानन्द घनीभूत स्तत्स्वरुपेण व्याप्तेश्च समंजसमिति। ब्रह्मसूत्राणु भाष्य भावाभरणाखिल सुषमा संवृतेन स्व मुखारविंद फल वियोगाग्ने र्नानात्वस्य सम्प्रदायवता स्व समया याधिकरण परि शोधयता व्रजवर घोष रत्न सीमन्तिनीनां भावना मंडलेषु भक्ति मार्गाब्ज मार्तंडोदय प्रकाशाशय प्रभाव संप्रयुक्तेषु सर्वेषु संस्थितो विज्ञेयो भवति। यस्याः यो भावः स स्तस्या भाव रुपेण तथैव धामनोऽखिल लीला विशेष्टन तस्या भावनायां स्थायित्वेनांतर स्थिरो भवति। पुनः सा स्वांतर स्थितं स्थायि विप्रयोगरस रसात्मकं धामनोखिल लीला विशिष्टं तस्य निखिलत्वमांतरे एवानु भवति बहि

रपि तं तथात्वेनैव साकं पश्यत्यनेन क्रमेण बाह्याभ्यंतर भेदेण तासां सदैकानुभवादीनां व्यवस्था मुखारविंद फल वियोगाग्नि मार्ग मर्यादया विज्ञेया तेन कृत्वा प्रत्येक भक्त हृदयस्थ स्वरुपस्य सर्वं सदानंस्य बहि रमणांतर रमणाभ्यां समुदायित्वेन व्रजवनयोश्च तत्प्रभोर्विहरणं तथात्वेनैव नित्यत्वमेवावगंतव्यम् ॥ यत्रै तैः स्वरुपैः रासाद्यनेक लीला विशिष्टैः स्थायि विप्रयोग रस रसात्मकैं व्रजवनयोश्च विहरणं तै भक्तैः सह । तत्र नित्यताया धाम्नः तथात्वस्य निखिलेऽभेद दर्शनाप्ता तल्लीला तत्स्वरुप तन्मुखाग्नि स्तद्धामोपासकानां तथात्वेन सम नित्यत्वं मन्यमानानां सर्वैः प्रकारैः सौष्टवत्वमेवास्ति न तु किमप्यसामंजस्यम् । "कृत्वा तावंतमात्मानं यावत्यो गोपयोषितः" इत्यादिना या मयांतर भावरुपांतर रसाधिकयांतरीया पद्धति निरुपिता सैवावधेया केन हेतुना यन्मया तासां हृद्गत भावनां किंच मूल धामनि रसात्मक ब्रह्मणि स्वरुपादि स्थिते रैक्यानुस्यूतत्वं प्रदर्शितं तस्य "रेमे रमेशो व्रज सुन्दरीभि र्यथार्भकः स्व प्रतिबिंब विभ्रमे" । "कृत्वा तावंतमात्मानम्" इत्याद्यनेक प्रमेय रुप प्रमाणत्वान्नात्र सांशयिकानां बहु शास्त्र शब्द विषयार्थ प्रसक्तानां नावसरः किंतु तदीयानां तद्भजन परणां साक्षादक्षरातीत पुरुषोत्तम स्वरुपादेरनन्याग्नौ श्रीमद्वल्लभाग्नि फल मुखारविंद विविध रस निभृतोपासकानामेव या मया निरुपिता मूल भावार्थ भाव संपत्ति सामग्री तेषामेवास्य भोग्यत्वेनात्रावसरो नान्येषामिति मंतव्यम् ॥ अत एव तासां रास मंडल मंडनानां तत्स्वामिनी कंदर्प निगूढ प्रयुक्तानां भगवत्प्रियानां प्रतिकृत्यधिकरण भूता योगमायाभिप्रायरवन्युद्भूतायास्ता गोपानां गृहेषु तैर्मन्यमाना वेदितव्या न तु रास मंडल मंडना,ः अनावृत्ति शब्दादनावृति शब्दादिति ब्रह्मसूत्राणु भाष्य परामर्श जातुमित्यास्माभिरप्ययमेवार्थो निर्णितो वेदितव्य,ः न तु स्वातंत्रिकत्वेन। स्वातंत्रिकत्वे न स्वातंत्रिकत्वे मार्ग विरोधात् । अत स्तासु फल प्रकरणीय लीलानुभवादेरपि प्रतिकृतित्वादपि तथात्वमेवाभूत् । स्वरुपानुभवादे र्निरोधादेरपि च अतो योगमायाद्भुत करणौ गहन गतित्वमाकलयितुं कः शक्तो निरवधित्वादचिंत्य सामर्थ्य निखिल विभुत्वात् ॥ तासां मध्ये एवोद्धवागमनं वस्तु विचारे क्रियमाणे रास मंडल मंडनानां प्रतिकृतित्वं यद्यतासु तदा श्रीमदुद्धवेन सार्द्धं स्व प्रिय रमण प्रेष्ठ विरह परिक्लिष्टाभि र्या विरहानुभव प्रासंगिका स्व पूर्वानुभवानुभूताकथा विविध भावाब्धि दृष्टानंदानुभवाब्धि सार समुच्चयानु रुपा कथिता तस्यां तथात्वेन साकं यत् दृष्टं तत् युक्ततरमेवास्ति नत्वसामंजस्यम् । तत्रत्या या सुबोधिन्यां टिप्पण्यां च तद्भावार्थानुरोधेनैव भवार्थो नेयो भवति वेदितव्यश्च । किंच यत्र यत्र श्रीभागवतेऽपि कलांशात्मकावतार संबंधिनीषु लीलाषु तत्तदंगत्वेन रसाविर्भाव विशिष्टा विरह कथा प्रसंगाद्यायाति तत्र तत्र स्वयं साक्षाद्भजनानंद पुरुषोत्तमास्य रुपेण स्व विरहानुभवावेशेनैव तं तथैव वर्णयति स्पष्टयति । तदनुभवापेक्षयात्र तु साक्षाद्भगवत्प्रियाणां प्रतिनिधि स्वरुपाणां विरह प्रसंगातरितायां सुबोधिन्यां टिप्पण्यां च पूर्ववत्तथात्वे कः संदेहो न कोऽपीत्यर्थः ॥ एतासां प्रतिनिधि स्वरुपाणां तत्सामयिके प्रसंगेहत्सु तत्स्थायि विप्रयोगाग्न्युत्थ निगूढ कृष्ण पदार्थ स्थितेरभावान्मथुरास्थ स्वरुपेऽत्यभि निवेशादत्यंत तथा अनिरुद्धत्व प्रतीतौ याथा तथ्यमेवास्ति ॥ अत एव श्रीमदाचार्य चरणैरपि सुबोधिन्यां तथैव प्रपंचित मस्ति "याते कृष्णे लोक रीत्या नैकट्याभावातः स्फुटं । न निरुद्धा इति प्रायः सर्वेषां च भवेन्मतिः । सेवके नोपदेशेन प्रीत्याचैव निरोधतः । ज्ञानेनापि निरुद्धास्ता आत्मत्वेनैव सर्वथा । वस्तुनो निश्चयः पूर्वमुपालंभस्तथैव च ॥ व्याजोक्त्या दोष गणना निर्दोषो वर्ण्यते पुरा ॥" इत्यादि प्रभु लेखादत्र तदीयानां विचारस्तु संवर्तते एव तत्र हेतुः रस समूहात्मके रासाब्धौ फल प्रकरणीये बाह्याभ्यंतर भेदेन "आंतरं तु महाफलम्" इत्यादिना पुनः सर्वात्मभाववतीनामेव तद्रसानुभव फल प्राप्ति निरुपणात्तद्रहितानामन्तर्गृहे रुद्धानां तत्फल प्रश्नयदर्शने श्रीमद्वल्लभाग्नि

भियोगमायाखिल शक्ति संसेवितैं स्तत्समये यदुचिततरं कर्तव्यं स्थितं तत्तथैव कृतं पुनः रासमंडल मंडनानां शारीरी लीलायां केवलानंद परमानन्दाग्नि अवयवत्यां यावद्धहि स्थितो वन्हि प्रकटो वा विरोन्नहि तावदंतः स्थितोप्येषो न दारु दहन क्षम इत्यारभ्य पुनः फल प्रकरणीये उक्तम्। "गायन्त्य उच्चैः" इतिश्लोके "शब्दो हि धूमवल्लोके बाह्याभ्यंतर योगतः।" "विराजते विनिर्गच्छंस्तारतम्यं च गच्छति" इत्यादिना पूर्वं यो भक्तानां हृदयाकाशादधिमथ्यमानात्प्रादुर्भूतोग्नि स्तत्संबंधोत्रैव फल प्रकरणे द्वितीयाध्याये "अंतर्हिते भगवति" इति प्रस्तावेभूत्ततः कृष्णोयं सदानंदो हृद्गतोऽग्निः सर्वदाग्नि लीनं जनयितुं शक्नोतीत्यंतेन बाह्याभ्यन्तर भेदेन भगवता मुखारविंद फल वियोगाग्निनापि च निर्धूमन्वमग्नित्वं स्वरुपानुभव लीला रस रसायनेकावयवत्वं सम्पाद्य ताभ्यो रास मंडल मंडनाभ्यः परमांतरीयं फलमांतरे एव स्थायित्वेन तथा विधिवत्वेन स्थापितं पुन स्तत्स्थापन विषये किं मुखरितं यदुद्धवेनागत्य ज्ञानादिना स्थापितमिति विचारणात्पूर्वं सुबोधिन्यादि लेखार्थं समुदाये विरोध मात्रकत्वस्य संदर्शनादसामजस्यमेव भवति भविता च। तस्मान्मदुक्त भावार्थानुरुपा भाव सम्पत्ति पद्धतिमेव तद्रस प्रेप्सुवोगच्छन्तु। किंचास्त्वेवमेवोद्धवे आगत्य तासांहृत्सु पूर्वानुभूतं रासघनेकानुभव फलत्वेनोपदेशेन स्थायित्वेन संपादितं पुनस्तासां कुरुक्षेत्र गमन प्रस्तावे तत्स्थायित्वस्य तिरोभवने पुनः क आगत्या स्थायित्वं संपादयिष्यतीति कृत्वायमपि मुख्य भक्तिमार्गीय समाधान विरोधी भावार्थोज्ञेयो न तद्भाव पोषक इत्यर्थः। इत्यत आहुः "याते कृष्णे लोकरीत्यानैकट्याभावतः स्फुटं। न निरुद्ध इतिप्रायः सर्वेषां च भवेन्मतिः" इति यदैव "क्लिश्यमानान् जनान् दृष्ट्वा कृपायुक्तो यदा भवेत्तदा सर्वं सदानंद हृदिस्थं निर्गतं बहिः" तदव एतद्भवितव्यताया बीजं बहिः संवेदन रुपायां भूमिकायां वापितं विज्ञेयं। तत्रापि रास मंडल मंडनानां तु पुनस्तथैवांतर भवितुं यथोचिततरं स्यात्तथैव फल प्रकरणीयेषु स्थल स्थलेषु विरहाग्निना ता स्नापयित्वा तथैव कृतं श्रीमद्वल्लभाग्निभि र्मुखारविंद फल भक्तिमार्गाचार्यैरेतासु तत्तत्प्रतिनिधि स्वरुपात्मकत्वात्तथात्व भवनस्यासंभवात योग माया प्रभृतिभिरपि तथात्वं कर्तुमशक्यत्वात्तासां बहिरनुभवज क्लेश प्राचुर्य विषये लोक वेद प्रसिद्ध पुरुषोत्तम भावना संसर्गत एव परस्परयोरैक्य भाव सजातीयत्वमभूत्। फल प्रकरणेऽपि यदि हृत्स्थं निर्गतं सर्वं सदानंदं तदैव तमवसरं प्राप्य लोकवेद प्रसिद्ध पुरुषोत्तमः स्वयमागत्य स्वाधिष्ठानमस्पर्श योगं आश्रितवान्॥ ननु श्रीमद्व्रजेन्द्र सद्मनि व्रजेवनेचर रसात्मकस्य ब्रह्मणो भगवतः स्वरुपानंद परमानद मात्र कर पाद मुखोदरादि रुपाकृतिः तस्या संदर्श विधौ दृश्यते त्वेकाभुयो भवद्भि निर्णीयते। चतुर्मूर्तें भगवतोप्यस्यामेवास्पर्श योगेनाधिष्ठानमस्ति यावत्पर्यन्तं कार्यं तावत्पर्यंतं। तथैव लोक वेद प्रसिद्ध पुरुषोत्तमस्याप्यधिष्ठानमस्मिन्स्वरुपे एवास्पर्श योगेनोच्यते वस्तुतः प्रति भात्येकैव, तेषां प्रथक्त्वेन दर्शनाभावात्। कथं ते भिन्नतया भावनीया स्तन्निश्चयाभावे तद्व्रजन पगणां मात्र निस्तुष एव कर्तव्यत्वात्समाधान विधानमप्यावश्यक्यमिति चेत्तत्र वदामः॥ श्रीमद्व्रजेन्द्र सद्मनि व्रजवनयोश्च शुद्ध रसात्मक ब्रह्मणो भगवत एकाया आकृतेः संदर्शन विधौ प्रथक्त्वेन चतुर्मूर्ति भगवतोऽदर्शनात् किंच लोके वेद प्रसिद्ध पुरुषोत्तमस्यापि चादर्शनादेवास्पर्श योग दर्शनास्तित्वदीयानां भवति सुखेनैव ते रसात्मक शुद्ध ब्रह्मसन्निधौ भिन्नतया स्वाभिव्यक्तिं स्पष्टयितुमर्हा न भवंति किंतु योगमायाद्भुत कर्मणा गहन गति रुपायां भूमिकायां सर्वाज्ञात लीलायां स्थित्वैव भगवदभि प्रायं विविध कार्यान्वितं जुषंतो भगवता सह विहरंति विचरंति च। अतोऽस्पर्श योग पदोपादानाद्योग मायाया एवाद्भुत कर्मत्वं निरुप्यते। श्रीमदाचार्य चरणैरपि तथैव सुबोधिन्यां प्रपंचितमस्ति, योग माया हि यथा स्थितमेवान्यत्र स्थापयति। तत्राप्यंतरंग योगमाया अन्यत्र स्थितं प्रमाणमन्यत्रापि

योजयति । अन्यत्र स्थितं चानंदमन्यत्र । अतः प्रमाणातिरिक्तो भक्तिमार्ग इत्यादि लेखादपि योगमायांतरंग भक्तस्याद्भुत कर्मणो गहन गति रुपत्वं यथा मया निरुपितं तथैवावधेयं । पितृचरणैरपि "भगवानपि ता रात्री" रितिश्लोकस्य स्वतंत्र विवृतौ योगमायायाद्भुत कर्मत्वं परमांतरंग भक्तत्वं निरवधि परमालौकिक निखिल सामर्थ्यं सम्यक् प्रकारेण प्रपंचितमस्ति तदीयै र्बोधव्यं च तथैवास्या धामनो निखिल रासाद्यनेक लीला संपादकत्वात् दुर्विभाव्यानामनंत कोटिशोऽचिन्त्य शक्तीनामधिष्टात्रीत्वात्तदीयानां तद्भजनानंद भक्ति मार्गीया मुक्ति सुखानुभव प्राप्तिवतां लीलौपयिक देहादि सामग्र्युत्पादिकानां धामनो मार्गदायिनीत्वात् धामनि । रसात्मक ब्रह्मणि भगवद्वल्लभाग्न्यभि मतादेव सा परिवृढास्ति ॥ अत एव ते वासुदेवांश प्रभृतयो भगवत् संनिधौ स्थिताः संतोप्यस्पर्श योगांतरे न दृश्यंते, इत्यनेन तु रसात्मक शुद्ध ब्रह्माकृते संदर्शन विधौ अस्यां विशिष्टापत्तिरेव तदीयानां शुद्ध रसात्मक ब्रह्म श्रीमद्यशोदोत्संगलालितोपासकानां भवति तेषामदर्शन विधौ सौष्टवत्वात् । अत एव भगवति रसात्मक ब्रह्मणि तेषां स्पर्शयोगादर्शनेऽस्पर्शयोग एवास्माभि र्निश्चीयते । अपिच पितृचरणैः श्रीमदाचार्य प्रभुभिश्च तथैव वस्तु विचारे क्रियमाणैः प्रपंचितमस्ति । सुबोधिन्यां टिप्पण्यांच । "वृंदावनं सखि" इत्यस्याभासेः "चरणानां स्वरुपमाहेति" ॥ अत्रेदमाकूतमिति मे भाति । भगवच्चरण माहात्म्यंय सर्व श्रुति प्रतिपादितं । तदेव "देवानां पादा" इत्युपक्रम्य "तस्या भाग्याभिनन्दन"मित्यंते नोक्तं । तथा चैतादृक् पद संबंधाद्वृन्दावन स्वरुपमुत्तमत्वेन निरुपितं भवति तत्कथमुक्तमत्र विहार निरुपणेन चरणानां तथेति । अत्रेदमाकूतं । लोक वेदातीत शुद्ध पुष्टिमार्गीय लीला सामग्री हि नान्यत्र प्रसिद्धा । एवं सति तत्कर्ताऽपि तथेति सिद्धयति । अतो वृन्दावनाद्गतो दूरमिति अग्रेवक्ष्यति यतस्तत्र पुष्टि लीलानंगीकारो वक्ष्यते ॥ एवं सत्यन्वय व्यतिरेकाभ्यामियं लीलात्रैवेति फलिष्यति ॥ एवं सति यत्रैव शुद्ध पुष्ट्यंगीकार स्तत्रै तच्चरण लीलेति ज्ञेयम् । अत एव वृहद्वनेऽपि प्रेक्षत्य उज्झित गृहा जगृहुः ॥ सह रामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् । कृष्णस्य गोप्य इत्यादिनेयमेवोक्ता । कालीय शिरो नृत्यत्वेनैतच्चरण प्राकट्यं तत्र पुष्टि लीलायामनंगीकारादत एव तत्स्तुतिरपि तादृशी ॥ अतो यत्र शुद्ध पुष्टिमार्गीय भक्तिमार्ग प्रकटनं लीलायां तत्रैतच्चरणारविंदाविर्भाव इति ज्ञेयम् ॥ अतः सुष्ठूक्तं चरणानां स्वरुप माहेति असाधारण धर्म निरुपणे धर्मिनिरुपण सम्पत्तिवत् । यतो लीलैव तत्परिचारिका । एवं सति देवानां पादा इत्यारभ्याधिदैविकावानंद रुपादित्यन्तेन यावंति चरण रुपाण्युक्तानि तदतीतत्वमेतच्चरणयो र्ज्ञापितं भवति ॥ उक्तेषु पुरुषोत्तम लोक वेद प्रथितो ज्ञेयः । अयं तदतीत इति ज्ञेयः । अत्र सम्यक्प्रकारेण हृदि संनिवेश्य विचारणीयं ॥ भगवच्चरण माहात्म्यं सर्वश्रुति प्रति पादितं परंतु तच्चरण माहात्म्यस्य तच्छ्रुतीनामनुभवैक वेद्यरुपत्वात्प्रति पादितं यच्चरणारविंदानिर्वचनीय माहात्म्यात्तासामवेद्यं तत्कथं प्रतिपादितु ताः शक्ता भवेयुः । अत एव तदेव "देवानां पादा" इति उपक्रम्य "तस्या भाग्याभिनंदनम्" इत्यंतेनोक्तम् ॥ अतः श्रीशुकेनापि श्रीभागवते तथैवोक्तं । "वृन्दावनं सखि भुवो वितनोति कीर्ति यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि" इत्यादिना देवकीसुत पदाम्बुजत्वोक्त्या तत्पर्यवसायित्वेन भावार्थोपलब्धेः संगति साक्षाद्रसात्मक शुद्ध ब्रह्म चरणारविंदयो र्धम्मिल फणि मणि प्रभाभिभृतयोः कुंकुम पंकालिप्त रुचि च यांचित भर भावितयो र्न वियुज्यते । तयोस्तदतीतत्वात् । अत एवाभिज्ञापितं तदेव देवानांपादा इति ॥ तस्मात्तद्रसात्मकस्य शुद्ध ब्रह्मणो भगवतश्चरण स्पर्शज विविध रस निभृतत्वेन मूल वृन्दावन स्वरुपमुत्तमत्वेन नित्य रुपत्वेनानुक्त सिद्धमस्त्येवात्रापि पृथिव्यां भारत क्षेत्रे वृंदावनत्वे तथैव च । न तु तदुत्तमतयोत्तमत्वमस्मिन् यत उक्तं । तथा चैतादृक पद संबंधाद्वृंदावन स्वरुपमुत्तमत्वेन निरुपितं भवति तत्कथं युक्तमत्र विहार निरुपणे न चरणानां तथेति ।

तत्र पितृ चरणास्तथैव स्पष्टयंति । अत्रेदमाकूतं, लोक वेदातीत शुद्ध पुष्टिमार्गीय लीला सामग्री हि नान्यत्र प्रसिद्धा । एवं सति तत्कर्तापि तथेति सिद्ध्यति । इत्यादिनाग्नि कुमाराः पितृचरणाः कृपया किं ध्वनयंति । सर्वाज्ञात लीलो लोक वेदातीतोऽक्षरातीतो ब्रह्मांडातीतः स्तस्य या विविध रस रुपाः लीला साधनेकावयव धारिण्योः मूल धामनि रसात्मक ब्रह्मण्येव विहार व्यसनं नियम नियत प्रसंग तास्ता नान्यत्र प्रसिद्धाः । किन्त्वनयो र्व्रजवनयो स्तु प्रसिद्धा एव सातीतेति ज्ञपितं ॥ एवं सति तत्कर्तापि तथेति सिद्ध्यति इत्यनेन किं तद्योतयंति । तासां लीलानां यः कर्ता शुद्ध रसात्मक ब्रह्म रमण पुरुषोत्तमो विविध लीलात्मक स्त्रीतयात्मक वल्लभ विरहाग्नि संपृक्तः सोप्यलक्ष लीलोऽक्षर ब्रह्मादिभ्योप्यज्ञातलील इत्यर्थः ॥ तस्यानभिव्यक्ति र्विविधानंद परमानंद रुपा सा त्वनयोर्व्रजवनयोरेव जाता नान्यत्रैति निस्तुष एव कृत इत्यत उक्तं एवं सति तत्कर्तापि तथेति सिद्ध्यति ॥ अतो वृंदावनाद्गुतेदूरमित्ययमेव वक्ष्यति यतस्तत्र पुष्टि लीलानंगीकारो वक्ष्यतितेे । एवं सत्यन्वय व्यतिरेकाभ्यामियं लीलात्रैवेति फलिष्यतीत्यादिना किं ज्ञापयंति । यथा यथा स्वरुपांतरेण विहरणं तथा तथात्वेनैव तत्तल्लीला तत्तत्पर्यवसायित्वेनैव पर्यवसति । साधन फल रुपेण तदनु भवंतीनां फलितार्थ रुपापि तथैव भवतीति भावः । यथा स्वरुप भेदस्तथैव लीला भेदोऽन्वय व्यतिरेकोत्तयेति द्योतितं ॥ यत्रैवं शुद्ध पुष्टयंगीकारस्तत्रै तच्चरण लीलेति ज्ञेयमित्याद्युक्ति विलास भावार्थ समुच्चय सांद्रवने विमृग्यं भवति । तत्किं । शुद्ध पुष्टयनंगीकारे तु देवानां पादा इत्युक्तं । यत्रैवं शुद्ध पुष्टयंगीकारस्तत्रैव तच्चरण लीलेति ज्ञेयमित्युक्तमत्र द्रष्टव्यं । पुरुषोत्तमस्तु स्वयमेकः रसात्मकः। शुद्ध ब्रह्म रसात्मकावयवादिभि र्धर्मित्वानिर्वचनीय शृंगारादिभिश्च केवल श्रीमत्स्वामिनीनां कोटि कंदर्प रुपस्तच्चरणयोरपि द्वित्वमेव न तु बहुत्वं । अस्मिन्स्वरुपेन स्वरुपांतरत्वस्य समवायि संबंधाधिकरणत्वं न तत्कृत लीलादीनां च किंच पितृ चरणानां श्रीमदाचार्य प्रभूणां विवृति विव्यक्तौ स्वरुपांतरत्वं लीलांतरत्वं तच्चरणाभिव्यत्तयांतरत्वं स्फुट तां दृश्यत एव । तदा तत्स्वरुपांतरादेः स्थित्यधिष्टानादिकं । कुत्रापि तु निश्चयं कर्तव्यं भवति वा न रसात्मक ब्रह्मणि भगवति निश्चयान्न भवति शुद्ध पुष्टि रसात्मक ब्रह्मणि तदूत निश्चितंम् । तस्या क्षरातीत त्वाद्वेदातीतत्वाच्छदातीतत्वादित्यनेनापि तदाकलयितुमशक्यं वेदेनापि शब्देनापि च । एवं सत्यस्मिन्स्वरुपे तु तत्स्वरुपांतरत्वादे रसमयापि संबंधात् । कुत्र स्थितिं र्मंतव्या । अत एवास्पर्श योगांतर एव नान्यत्रेति बुध्यस्व । नन्वस्पर्श योग इति किं तत्स्वरुप भावार्थानवगमान्मनसि नायातीति चेत् तत्र वदामः । रसात्मकस्य ब्रह्मणो भगवत एकस्मिन्ननिर्वचनीय आत्मयोगो वर्तत एव । तस्मिन्नेव स्पर्शास्पर्श भेदयोः स्वरुपं नित्यत्वेनास्ति तदपि किं, यथा विविध लीला रसात्मक ब्रह्मणो भगवत आत्मनोऽर्द्ध भागोत्तर दलारव्योत्तर शृंगार रसरुपा सदैक स्थायि भाव संज्ञिका कृष्ण भावाग्र्यवयव धारिणी श्रीमत्स्वामिनी तथा तच्छक्ति निखिल साभर्थ्याधिकरण भूता योग माया अतः सुबोधिन्यामंतरंग भक्तत्व सर्व भवन सामर्थ्य तस्याः संपादितमस्ति पितृ चरणैरपि । किंच यस्या उत्पत्ति स्थानं साक्षाद्भगवन्मुखारविंद फल वियोगाग्नि रसात्मक रौद्रादूभुत कर्मणि गहना गति रुपायामेव पुनः स्परुपमपि तस्यास्तथात्वेनैवास्ति । अत एव योग मायया साकमेव भगवत आत्मयोग इत्युच्यते । भगवत आत्म संधातत्वेनैवेति व्युत्पत्यात्म योग एव सिद्ध्यति यतः रसात्मक शुद्ध ब्रह्मः पुरुषोत्तमः स्वयं श्रीमत्स्वामिनी च यत किमपि किंचिदपि कुरुतस्तद्योग मायाभिप्रायाभिप्रेत्यैव । न स्वच्छंद रीत्या। अत उक्तं गीतायां च "प्रकृतिं स्वामधिष्टाय संभवम्यात्म मायया" इति । किंच सुबोधिन्यामपि । अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति । किंच पुरुषोत्तमस्तु नंदगृहे एव मायया सह जातः इत्यादिना भगवत आत्म मायया यो योगः । स एवात्म योग स्तस्यापि

द्वैविध्यमस्ति ॥ एकेन योगेन रसात्मक ब्रह्मण्येव रसात्मकानां सामग्रीणां तदनुभवाय्नवयव धारिणां योगं कारयति । एकेन योगेन रसात्मक ब्रह्मण्येव स्वयं स्थित्वा यावत्कार्यं परिमितः कालस्तावत् परिमितत्वेनैव तान् चतुर्मूर्ति भगवान् लोक वेद प्रसिद्ध पुरुषोत्तमादेन् स्वास्पर्श योगांतरे नीत्वा भगवदंश कला विभूत्यंतरेव बलात् विनियुज्य तज्जनित निखिल विरुद्ध धर्माश्रयत्वं च प्रदर्शयन्ती स्वयं योग मायाप्यस्पर्शास्ति। रसात्मक ब्रह्मणि अपि तेषां स्पर्शादिकं न कारयतीति ॥ तस्या एवाद्भुत कर्मणो या गहना गति बोधव्या । अत एव रसात्मक ब्रह्मणि भगवति मुख व्यादान प्रस्तावे विश्वदर्शनं यद्विरुद्ध धर्माश्रयत्वं तत्तु तदंशत्वेन रसात्मक ब्रह्मणि योग मायाया अस्पर्श योगान्तरे यः स्थितश्चतुर्मूर्ति भगवांस्तस्यैवायं धर्मो न तु पुरुषोत्तस्य यत एतन्निरोधेनैव श्रीमदाचार्य चरणैरपि सुबोधिन्यां तथैव प्रपंचितमस्ति । परंतु तदर्थाव बोधज्ञाः कुतः विनाग्निकुमारात् वा तत्कृपया भविता भवन्नपि । यशोदास्तनंधयस्य भगवतो मुखारविंदे विश्वमेव दृष्ट्वा स्वप्न मायाविद्या निराकरणाय सिद्धांतमाह । अथो अमुष्यैवममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति उलूख बंधने चायमर्थो निर्णीतः । तस्मादानंदांशस्यैवायं धर्मो यत्र स्वाभिव्यक्ति स्तत्र विरुद्ध धर्माश्रयत्वं इति चकारार्थः यशोदादयश्च बहिः स्थितमपि जगदंतः पश्यंतीत्यादिना प्रभु चरणानां लेखाखिल भावार्थ समुच्चयमाकलय्यैव यदापि विचार्यते तदैव सुबोधिनी परम दुर्बोधिनी परम फल प्रदा भवति । तदभावे तदंशत्वेन तत्स्वरुपांतरेणेति भावः । यतो भगवति रसात्मक ब्रह्मणि यद्विरुद्ध धर्माश्रयत्वं दृष्टं वा दृश्यते तत्तु तदेशोऽस्पर्श योगांतरे योग मायया संन्निहित स्तस्मिन्नेव । न तु रसात्मक पुरुषोत्तमे । अत उक्तं तस्मादानंदांशस्यैवायं धर्मो यत्र स्वाभिव्यक्ति स्तत्र विरुद्ध धर्माश्रयत्वमिति । यस्मिन् भगवति रसरुपे द्विधा श्रृंगार रसावयवा-तिमात्रकत्वं विविध लीला परिकरादिभि स्तदाकारस्त्तदाकृतित्वं तस्मिन् । पुनर्विश्व दर्शना-दिना यद्विरुद्ध धर्माश्रयत्वं तत्तत्र स्थातुं कथं शक्यते वा स्थास्यति ॥ अत एवैतदभिसं-धायैवोक्तं । तस्मादानंदांशस्यैवायं धर्मो यत्र स्वाभिव्यक्तिस्तत्र विरुद्ध धर्माश्रयत्मभित्यनेन तद्रसात्मक स्वरुपानु भवातिरिक्तं यत्किंचित्तदेव विरुद्ध धर्माश्रयत्वमवेहि तस्मान्मुखारविंद फल वियोगाग्नि प्रकटित मार्गस्था भगवदीयास्तमुत्सृज्य केवल द्विधा श्रृंगार रस रुपमेव भजेयुरिति परम युक्तमत शुद्ध सर्वांगोपासनानन्य भजनानुमतेः ॥ अत एव वृंदावनेऽपि चरण माहात्म्य निरुपण प्रस्तावे "देवानां पादा" इति चरणानांस्वरुपमाहेत्यादिना चरणानां बहु-त्वं द्योतयंतः स्वरुपांतरत्वस्यापि बहुत्वं द्योतितवंत आचार्य चरणा स्तत्रापि रसात्मके भगवति ब्रह्मण्यस्पर्श योगांतरे यत्स्वरुपांतरत्वं चतुर्मूर्ति भगवांल्लोक वेद प्रसिद्ध पुरुषोत्तमादि रुपास्तेषां चरणानां स्वरुपानि यानि सन्निहितानि संति तान्येव प्रदर्शितानि । "चरणानां स्वरुपमाह" इत्युक्तत्वात् । अत उक्तं तत्र पुष्टि लीलानंगीकारोवक्ष्यत इति यत्र शुद्ध पुष्टयं-गीकार स्तत्रै तच्चरण लीलेति । इत्यनेन रसात्मकयो श्चरणयोरनुभाव संप्रदायः भिन्न तयैव सूचितः "सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुद" । "कृष्णस्य गोप्य" इत्यादिनेय मेवोक्ता । कालीय शिरोनृत्यत्वेनैतच्चरण प्राकट्यं तत्र पुष्टि लीलाया अनंगीकारादत एव तत्कृतिरपि तादृशी, इत्यादिनापि दृष्टव्यास्पर्श योग विचित्रता । नैतच्चरण प्राकट्यमित्युक्त-त्वाच्चरणाप्राकट्ये इतर चरणानु संधाने कालीय शिरो नृत्यानुकरण सपृक्ते तच्चरण संभावना निरस्ता श्रीमदग्निकुमारै रसो वेदितव्यापि तदीयै स्तथैव च ॥ ननु तत्र सुबोधिन्यादिषु तदंशत्वेन साधारण धर्मत्व निरुपणे किं प्रयोजनमाचार्याणामिति चेत् । सत्यं धर्माणामंश कलात्मकानां साधारणत्व निरुपणान्मूल धर्मिण एवासाधारणत्वं निरवधित्वेन निरुपणं भवति, यस्य कलया सित कृष्ण केशादीनां लीलया स्वरुपेणे दृशोऽप्रतिम प्रभावोऽसाधारण रुपस्तदा मूल

धर्मिण स्वरुपेण लीलया रसात्मकैश्वर्यादि धर्मैश्च कीदृशोऽप्रतिम प्रभावो साधारण धर्म रुपो भविष्यतीति अभिज्ञापयितुं प्रभूणामसाधारणधर्मत्वेन निरुपणं भवति तन्निरुपेणऽन्यो हेतुः। वस्तुतस्तद्ध धर्मिण एव निरुपणं भवति। माहात्म्यज्ञान दाढर्यार्थं तदनंतरमेव प्रेमासक्ति व्यसनपर्यंतांत रुपजाते रसात्मके भगवति प्रवेशो स्थायि विप्रयोग रसानुभवेन महात्म्यज्ञानादीनामुपयोगस्तावन्मात्रैव तेषां प्रवृत्तिः। अतएवप्रभुभिः। पितृचरणैरपि तथैव प्रपंचितमस्ति। अतः सुष्ठूक्तं "चरणानां रुपमाहे" इति असाधारण धर्म निरुपणे धर्मि निरुपण संपत्तिवदिति। यतो लीला एव तत्परिचारिका भवति तादृशाणां साक्षाद्व्रजनानंद स्वरुपांतराभिज्ञापकानां तेषां तथात्वं तेषां लीलयैवाभिव्यक्तं भवतीत्यभिसंधायैवोक्तं। यतो लीलैव तत्परिचारिका भवतीति। एवं सति दवोनां पादा इत्यारभ्याधिदैविकानंदरुपाविति" अंतेन यावंतिचरण रुपाण्युक्तानि तदतीतत्वमेतच्चरणयो र्ज्ञापितं भवति। उक्तेषु पुरुषोत्तमो लोकवेद प्रथितोज्ञेयः अयं तदतीत इति ज्ञेय इत्यादिना साक्षाद्भगवन्मुखारविंद फल वल्लभाग्न्याचार्य चरणैरग्निकुमारैश्चात्र दाढर्येण स्फुटतरः स्वरुप भेदेन लीला भेदोनिरुपितोऽस्ति। नात्र संशयः। सांशयिकानामेवात्र शंकयोस्ति तेषां अक्षरानंद लीलामध्यपातित्वात्। अत एवोक्तं। लोक वेदातीत शुद्ध पुष्टि मार्गीय लीला सामग्री हि नान्यत्र प्रसिद्धा। एवं सति तत्कर्तापि तथेति सिद्धयतीति। अतः स्वरुप भावना भावाग्नौ नानात्वेनानेन प्रकारेण यत्सर्वलक्षण संपन्नत्वं वल्लभाग्नेरस्ति तदैक देशेन मया निरुपितमस्ति न तु सर्वांशेन। तस्मात्प्रथम साधन दशायां शुद्ध सर्वात्म भावेन शुद्ध रसात्मक ब्रह्म स्वरुप भावनैव कार्या। तत्स्वरुपं श्रीमत्स्वामिनीनां कंदर्प रुपं बर्हापीडानल्पाकल्पादि भिर्विभूषितं त्रितयात्मक वल्लभाग्नि समन्वितं श्रुति स्मृतिभिरपि दुर्ज्ञेयं दुर्विभाव्यं दुष्प्राप अक्षर ब्रह्म प्रभृतिभिरनवेद्य तेभ्योऽनिशं भ्रशंशश्वदज्ञान लीलं तस्यैव भावना कर्तव्या। तत्रापि विचारादौ श्रीमद्वल्लभाग्न्या ज्ञापकायमवलंब्य श्रद्धाया विशुद्ध बुद्धया तदनंतरं उद्वेग प्रतिबंध भोगादीनां साधन मूलोच्छेदः कर्तव्यः सवासनया पुनः आदौ विषयै वैतृप्ति स्ततो नित्यानित्य वस्तु विचार पूर्वकत्वात्सर्व परित्याग स्तत एकांते अष्टांग योग स्ततो भावनायालोचन पूर्वकं तप एकाग्रे स्थिति र्वा ततः प्रेम्णा भगवति प्रवेश एवं साधन संपत्तो प्रथम दशायां पंच पर्वा विद्या निगदिते इत्यादिनापि स्वरुप भावना भावाग्नि प्रवेशो तथैव कर्तव्यं। अव्यावृत्तो भवेत् तदनुभव परत्वादेव यतेत। सेव्य स्वरुपादिष्वपि मूल स्वरुप शुद्ध भावन व्यासंगेन साकं विचरेत्। स्व सेव्य स्वरुपादिषु विरहाग्न्युद्रेकतो यो भावो विविध लीलानु भावकः प्रादुर्भूतो भवेत्तं मनस्येव विभाव्य बहिः कस्याग्रे न प्रकटनीयो न वाच्यः। सुबोधिन्यादि श्रवण साक्षाद्वल्लभाग्न्यनन्य भजनपरो यस्तद्वारैव कर्तव्यं तदितरे तथात्वस्य रहो भावाशयादर्शन प्रत्युत क्लेशापत्तिरिति नियमात्। साक्षाद्भगवन्मुखारविंद फल वियोगाग्निज दैन्य मार्गाद्विमुखानां साक्षाद्व्रजनानंद रमण पुरुषोत्तम स्त्रितयात्मकाग्नि विभ्रम संभ्रमाधिष्ठानः द्विधा श्रृंगार रसावयवादि मात्रकस्तदनुभवात् पराङ्मुखानां सर्वथैव संग स्त्याज्यः। "संगः सर्वात्मनात्याज्यः स चेत्यक्तुं न शक्यते। स सद्भिः सह कर्तव्यः संतः संगस्य भेषजम्" इत्यादिनापि धनादिकोपर्यत्यंता ग्रहेणासक्ति र्नकार्या। तस्यानर्थत्वमेवसर्वशः सम्पादकत्वात्। यतदेवमपि त्याज्यं भवति परंतु कैः साक्षाद्रासोल्लास मदोन्मतः। राधिका रति लंपटस्तदनुभव स्तदनु भवस्तद्विरहानु भवैकार्थ सत्य सन्यस्त संकल्पै श्रीमद्वृन्दावनवासि शिरोमणौ स्थित्वैर्न व्रजवर घोष रत्न सीमंतिनीनां विरहानुभवाशेष क्रियामनुभावयद्भिस्तामाश्रित्यतदात्मकै स्तथैव प्रदर्शयद्भि र्न तु तद्धनासक्त चित्तोभिः। तेषां सर्वदा जन्मांतरे विचारणार्थ रुपत्वमेवाल्प सुखवत्वात् धनादिकस्यानर्थ रुपत्वादिति नियमात् निश्चयात् अत उक्तं॥ श्रीमदाचार्य चरणैः "धनं सर्वात्मना त्याज्यं तच्चेत्यक्तुं न शक्यते। कृष्णार्थे तत्प्रयुंजीत कृष्णोऽनर्थस्य वारकः"

इत्यादिना धनादिकोपरि श्रीमद्वल्लभाज्ञयासक्तिर्न कार्या । किंच स्वरुप भावना भावाग्नि भावनं शुद्ध सर्वागत्वेनैव कार्यम् । केन हेतुना व्रजवनयो ब्रह्मांडांतरवर्तित्वादक्षर ब्रह्मणः संव्यापक संसर्गत एव चतुर्मूर्ति भगवतो लोक वेद प्रसिद्ध पुरुषोत्तमस्य च रसात्मके ब्रह्मणि रमण पुरुषोत्तमे योगमायाकृतेऽस्पर्तयोगे संनिधानाल्लीला विभेदेन स्वरुप भेदाद्रसात्मके स्वरुपे संमेलनाति प्राचुर्यात्तद्भजन पराणां अत्र न शुद्ध समाध्यासपरामर्श विभ्रमे क्लेशकल्पनाप्तौ सावधानतयैवस्थेयं भवति तदनुभव परैः ॥ अतोमयोक्तं शुद्ध सर्वागत्वेनैव स्वरुपं विभावनीयं विमर्शणीयं च । किंच रसात्मक ब्रह्मणि योगमायास्पर्श योगांतरे चतुर्मूर्ति भगवानादय स्तिष्ठंति तेषां मूर्त्यादिनाऽदर्शनाप्तिस्तत्कार्यवशत एव । तदर्शनापत्तौ तेषां तस्मिन्स्थितिनिस्वयात् । तद्विवेकिनां परामर्शयानुमित्या स्वोपास्य स्वरुपे परामर्शस्तु कर्तव्यो भवति यदैव "क्विश्यमानान् जनान्दृष्ट्वा" कृपायुक्तो भूत्वा तासां हृदयस्थः स्वयं सदानंद स्वरुपस्तासां मध्ये प्रादुर्भूतस्तदैव लोक वेद प्रसिद्ध पुरुषोत्तमः पूर्ववदेव स्वास्पर्श योगांतरे आविवेश तस्मिन्काल एव तास्तं ददृशुः । न तु तदनीतेकाले मिलितस्य दर्शनस्यापि मायाजवनिका आवरणत्वादिदानीमेव तं मिलितं स्वरुपं ददृशु स्ताः अत एव श्री शुकेनापि तथैवोक्तमस्ति । तासामाविरभूत् शौरिः शूरस्य पुत्र इति यावत् । अयं लोक वेद प्रसिद्ध पुरुषोत्तमो वेदितव्यः । साक्षान्मन्मथ मन्मथोरूपया सर्वं सदानंदं हृत्स्थं बहिर्निगतं तत्स्वरुपं विजानीयात् । बहिर्व्यक्त्याकृतौ याऽऽकृतिः सा रसात्मकस्य ब्रह्मण शुद्ध भगवत एव तदागतस्योपलक्षण मात्रमेवसोऽस्पर्श योगांतरे एव प्रावीविशत् । पूर्ववदेतस्य दर्शनादेरभावाद्भगवदाकृतेरेव साम्प्रतत्वात् कार्याण्यपि तथैवाभवन । यत तत्सामयि कायामाकृतो निर्दोष पूर्णाखिलरसात्मक ब्रह्म भावन भाव (संपत्ति) संपत्तिरेवावधेया न तु तत्संमेलनेनाकृते वैकृत्वाद्वैकृतयं । भजनानंद रमण प्रियस्य बर्हापीडं नटवर वपुषः श्रीमत्स्वामिनीनां निगूढ भाव कोटि कंदर्पात्मकस्य नित्य कृष्ण कैशोरवेश धारिण आकृते र्नित्यत्वाद्विकृतितत्वस्यासंभवतत्वात्सदैक स्थायिभावरुपा कृतिरेवावधेया ॥ ननु लोकवेद प्रसिद्ध पुरुषोत्तमाकृतौ अपि रसात्मक शुद्धब्रह्माकृतित्वस्यै प्रभावाद दर्शनाप्तौ का व्यवस्थो इति चेत्तत्रवदामः । यथायः पिंडे यावत्पर्यंतमग्नेरतिव्यापकत्वमस्ति तावत्पर्यंतं तस्मिनाग्न्यावयवत्वमेव दृश्यते । नत्वयसस्तदपगमे एवायस्याग्न्यस्त्वं प्रति भाति ॥ तद्वदत्रापि भगवदंशावि र्भाव संपर्कतोऽस्पर्श योगांतरे स्थितेरनु भावत आकृतेरपि तत्संन्निभवत्वं प्रति भाति भगवदाविर्भावस्य नित्यत्वात् तदंश पर्यवसायित्वेनापि तदाकृति सन्निभत्वस्य संदर्शनविधौ न पूर्व पक्षावसर इति मंतव्यं । अतोऽत्राक्रूरागतौ भगवतो नयनार्थे आकृतेस्तथात्वमेव स्थितौ नाकृते भेद दर्शनं जायते ॥ किंच भृंग दंशोद्रेकात् कीटे तदाकारत्वं दृश्यतेऽत्र तु साक्षाद्रसात्मक शुद्ध ब्रह्मौपकुल्यादेः संपर्कतो लोक वेद प्रसिद्धे पुरुषोत्तमे तदाकृतित्वे संन्निभत्वे कोवा विरोधो बाधः शंकनीयो न कोऽपीत्यर्थः ॥ अत एव सुबोधिन्यामपि नथैव श्रीमदाचार्यैः चरणैः प्रपंचितमस्ति । ततो भगवान् ब्रह्मा विष्णुः रुद्रश्च भूत्वा पुनः कृष्ण एव जातः । तासां मध्ये एव भगवान प्रादुर्भूतः यतः शौरिरिति शूरस्य पुत्रः शौर्यमत्र प्रकटनीयमेव सर्वेषां दुःख निवारणार्थमेव यदुवंशेऽवतिर्ण इति । तदा तासां दोष निवृत्यर्थं स्मयमानं मुखांबुज ईषद्धासयुक्तः तासां वैक्लव्येन संतुष्टः स्मित युक्तं स्मयमानं स्मयमानाभ्यां वा सहितं मुखांबुजं यस्य । भक्तानां दोषोः भक्तेभ्यो निर्गतः भक्तौ समायातीति ज्ञापनार्थम् । तदानीतनं रुपं वर्णयति "पीताम्बर धर" इति पीतांबरं हास्य संकोचार्थं हस्तेनधृत्वा तिष्ठति । अथवा । व्यापि वैकुण्ठ रुपेण एतावत कालं लक्ष्म्या सह रमणं कृत्वा तनैव रुपेण प्रादुर्भूतः । स्रग्वी वनमालायुक्तश्च । मध्ये ब्रह्मादि पूजां च गृहीतवान् । लक्ष्म्या वा । अतो विलंब इत्यपि सूचितम् । इत्यादि प्रभूणां लेखाशयात्स्वरुपांतर त्वस्यैव प्रतीतौ तत्समये पूर्वोक्ति भावार्थं वर्त्म नैव लोक वेद प्रसिद्ध पुरुषोत्तमस्यैव व्यापि

वैकुंठादागमनं वयमन्यामहे, प्रभूभिरपि व्यापिवैकुंठ रुपेण तावत् कालं लक्ष्म्या सह रमणं कृत्वा तेनैव रुपेण प्रादुर्भूत इत्युक्तयाग्रहवशात् व्यापि वैकुंठस्याक्षरात्मकत्वं तत्स्वरुपस्यापि तथात्वाल्लोक वेद प्रथित पुरुषोत्तमस्यैव अत्राविर्भावो निरुप्यते । न तु साक्षात्पुरुषोत्तमस्य रसात्मक ब्रह्मणः । ननु यद्भवद्भिः निरुपितं स्वरुप भेदादिकं तत्सामयिकं तत्तथैव मनस्यागतं ॥ "क्लिश्यमानान्जनान्दृष्ट्वा" कृपायुक्तो भूत्वा स्वयं तासां नाभि कमल कोशांतरात्स्थायि विप्रयोगाखिल चरित्राधिष्ठानाद्भिहिः प्रादुर्भूत स्तदनंतरं लोक वेद प्रसिद्धः पुरुषोत्तमः स्वयं तदवसरं भूयप्राप्यागत्य रसात्मक ब्रह्मण्येव स्वास्पर्श योगांतरे प्राविविशदिति तु सत्यं । तदा "कस्याः पदानि चैतानि याताया नंद सूनुना । अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ अनयाराधितोनूनं भगवान् हरिरीश्वरः । यन्नो विहाय गोविंदः प्रीतोयामनयद्रहः ॥ "धन्या अहो अमी आल्यो गोविंदांघ्र्यब्ज रेणवः । यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ तस्या अमूनि नः क्षोभ कुर्वन्त्युच्चैः पदानि यत् । यैंकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरम् ॥ न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणांकुरैः । खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ अत्र प्रसूनावचयः प्रियार्थे प्रेयसाकृतः । प्रपदाक्रमणे एते पश्यताऽसकले पदे ॥ केश प्रसाधनं त्वत्र कामिन्याः कामिना कृतम् । तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ रेमे तया चात्मरत आत्मारामोऽप्यखंडितः । कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम्" ॥ इत्यादिभिः श्लोकै विविध भाव संपत्ति संपृक्तैः या तया सह लीलाभूत तत्स्वरुपस्य पूर्व लेखाखिला चरितार्थे का व्यवस्था इति चेत्तत्र वदामः । व्याप्तेश्च समंजसमिति ब्रह्म सूत्राणु भाष्य संप्रदायेमेव परामर्श-ध्यास निर्धारादेः परिणितेः सौष्ठवत्वान्मुख्यत्वात्तस्यामेव विवृत्तावन्वेष्टव्यं । साकारमेव व्यापकमित्युक्तया साकार मूल पीठिका परम सौन्दर्यांतरे द्विधा श्रृंगार रसात्मक पुरुषोत्तमांतर निष्ट एव तद्व्यापकत्वस्य निर्बाधित्वादचिंत्यानंद परमानंदानुभवाधिष्ठानत्वादनादित्वा-न्नित्यानंद चरित्रात्मकत्वात्परं व्रजजनाः परमानंदानुभव योग्याग्न्यात्मानो मुखारविंद फल वियोगाग्निर्भक्ति योगेन सर्वाज्ञात योगिनस्तेऽपि न ययुरतस्तद्व्याप्ति विशिष्टस्य परमसौंदर्या-काराखिल चरितार्थताया एव सर्वासां व्रजवर घोषरत्न सीमंतिनीनां भावनासु तत्समवाय संबंधातिमात्रकासु सौंदर्याकारत्वेन नटवर वपुषा निगूढ भाव रुपेण श्रीस्वामिनीनां कोटि कंदर्प रुपेण स्वयं तासां भाव रुपेण प्रकटो भवति । "कृत्वा तावंतमात्मानं यावंत्यो गोप योषित" इत्यादिना तदेवानु संधेयं । एकत्वेन बहुरुपत्वं बहुरुपत्वेनैक रुपत्वं तद्भवनं प्रति कारणता परम सौन्दर्य द्विधांग भूतस्य मूल साकारस्यैव ॥ अत एव व्रजवन लीलायां यस्या यो भावः स तया सह रेमे ॥ तदाऽत्र कोऽपि वदिष्यति चेदेवं नित्य रुपेण तासां निगूढ भाव रुपेण सौंदर्याकाराग्न्यनु भवोद्भूतऽभ्दुतं स्वरुपं तासां हृदि नित्यमस्त्येव पुनः "गोप्यः कृष्णे वनं याते तमनुद्रुत चेतसः । कृष्ण लीलाः प्रगायन्त्यो निन्यु दुःखेन वासरान् ।" इति किं । तत्रो-च्यते । तदांतर सदानंद स्थायि विप्रयोगाग्न्युद्भूतस्य पुरुषोत्तमस्य स्वांतरे स्थिते ज्ञानस्या-भाव एव वर्तते । तज्ज्ञाने सति स्वास्थ्य हेतुत्वादांतरे आंतर फलानुभवादेः महाफल पर्यव-सायित्वेऽफलत्वाप्तेरितिमानात् । तदाकलयितुं ता न शक्ताः भवंति । अत एव वनादागत्य शयन भोगादि लीला सामग्रीमंगीकृत्य स्वयं मातृचरण भाव रुपत्वेन मातृ चरण शय्योपरि मातृ चरणोदरे परमानंदाधिकरण भूते संलग्नया स्व शयनं विधाय । पुन र्व्रजवर घोष रत्न सीमंतिनीनां प्रत्येक गृहे व्रजति । तासां कंदर्प रुपेण तद्भोग्यत्वेन तत्तद्गृह संबंधिनी लीला-मंगीकृत्य ताभिः सहानेकां रस रसात्मकां लीलां करोति । गोपिकानामेव भावरुपस्तदर्थमेव कोटि कंदर्पलावण्यं प्रकटी कृत्य तद्भोग्यत्वेन प्रकटः कृष्ण शब्दार्थः इत्यादिवाक्यैः स एव भावार्थोऽत्रधेयः । ताऽपि विविध रसोद्बोधिकां शय्या पुष्प माला तांबूलादि

विविध रसोद्दीपिनीं सामग्रीं विधाय प्रतीक्षंत्योत्यऽनुराग भरभाविताः स्व स्व शय्या मंदिरोप-
कूलेषु स्थिताः भवंति पुनः प्रभ्वागमनानंतरं मनोरथांत रुपेण संपूर्णरात्रौ प्रभुणा सह विहरंति।
यथा मंजूषामुद्घाट्य तदंतरस्थं पदार्थं ततो निष्कास्य यथानुभूयते तथैव श्रीमद् व्रजेन्द्र
सद्मनि प्रभु शयनानंतरे तद्दर्शनामृत रस पानाभाव वियोगाग्नि उद्रेकावस्थामधिष्ठायैव स्व स्व-
भावना मंजुषामुद्गाट्य स्वनिगुढ भावरुपेण परम सौंदर्याग्न्युद्भुतेन समं सर्वा रमंति तत्र द्रष्टव्यं
परमसौंदर्याग्नेः सकाशाद्यावंत्यो व्रजयोषितः संति तावंत्येव रुपाणि प्रादुर्भूतानि जातानि
जायंते सत्यपि च, परंतु तेषां निखिल रुपाणां मूलाधिष्ठानं श्रीमत्स्वामिनीनां निगूढ भावः
कृष्ण पदार्थः कोटि कंदर्प लावण्य रुपः यतः कोटिकंदर्प लावण्याख्यः स्वयं रमण पुरुषोत्तमः
तत्र हेतुरगणित कोटिशः व्रजवर रत्न सीमंतिन्य सात्र तत्र तासां प्रत्येक गृहे कंदर्प रुपेण
ताभिः सह विहरति यतः कोटि कंदर्प रुपः। तद् वदत्राप्यस्या असंन्यस्त प्रकोष्टाया निगूढ
भाव रुपत्वेनास्याः कंदर्प विग्रहेण तथा प्रतिवतीमनयद्रह, स्तस्मिन् परम शोभन काले तस्या
अपि हृदि तत् स्वरुपस्य स्थायित्वेन स्थित्यभावे तत्स्वरुपस्य तन्निगूढ कंदर्प रुपस्य बहिः
संदर्शन विधौ " कस्याः प्रदानि चैतानि यातायाः नंदसूनुना । असंन्यस्त प्रकोष्ठायाः
करेणोः करिणा यथा ॥ " इत्यादि लीला विशिष्टै विविध रसोद्बोधकैः प्रभ्वासक्ति प्रव्यंजकै
र्भगवतो निरवध्यनिर्वचनिय स्नेह प्रयुक्तैः क्रमैस्तयासह लीलाभूत साः तस्याः निगूढ भाव
कन्दर्प रुपेण सार्द्धं । नत्वंत "हिते भगवति सहसैव व्रजांगनाः । अतप्यंत" या स्तासां
निगूढ भाव कंदर्पेण समं सा रेमे। किंचात्र द्रष्टव्यं तासां भावना मंजूषांतरे यो निगूढ भावः
सदानंद रुपः स्थायि विप्रयोगाग्न्यनुभव सार समुच्चयः। कोटिकंदर्प लावण्य रुपः स तत्त-
द्भावाग्निरुपः अस्यामसंन्यस्त प्रकोष्ठायां। " न लक्ष्यंते पदान्यत्र तस्यां नूनं तृणांकुरैः।
खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ " प्रेयस्या यो निगूढ भावः कंदर्प रुपेण येन
स्वरुपेणा केश प्रसाधनं ह्यानः कृतः सोऽयं साक्षात् श्रीस्वामिनीनां कंदर्प रुपस्तत्र विशेष-
स्त्वयं तासां भाव रुपेण तासां भावनां या मंजूषायां बहिः संवेदन परिक्लिष्टेन परिक्लिष्टाया-
मेव स्थितो विज्ञेयः। अस्या स्तु बहिः प्रकटत्वेकांतेऽस्या नेतव्यार्थे अर्थोपलब्धिः सा का।
बहिरांतरयोरेककालावच्छिन्नत्वेन तस्यां स्थायि भाव रुपकत्वेन स्वनिखिलत्वं संपादना-
यैवाव्यक्ते नेतव्यार्थस्य प्रागलभ्यमादिशत्। प्रभुभिरपि तथैव प्रपंचितमस्ति यतः कृष्णः सदा-
नंदः तस्यामानंदं स्थापयितुमन्यासु मुग्धेव गोपी अतस्ता वने विहाय तामनयत्। वनस्थानां
विवेको भवति। इत्यादि। वस्तुतो मुख्य स्वामिन्यामेवांतरयितुमस्याः परम सौभाग्यादिकं
पूर्वोक्त प्रकार विशिष्टं कामिनीनां व्रजरत्न सीमन्तिनीनां भावना मंजूषांतरेषु स्थितानां दैन्यं,
स्त्रीणां चैव दुरात्मतां विविध रस पोषकां व्रजस्त्रीणां च प्रदर्शयन् अव्यक्ते नेतव्यार्थेऽनया
प्रमादः कृतो राधा विशेष संभोगांतरे ततोप्यधिकं स्वस्मिन् मेने ततः तिरोधत्तेहरिश्चसः।
अस्मिन् काले ता इयं च विप्रयोगाग्निना परम क्लिष्टयावस्थया परस्परं तादृश्योऽभवन्।
तत्रापि विशेषस्तासां भावना मंजूषायां ताभ्यो ज्ञातोऽपिसन् स्थित एवास्यां तु नांतरे न बहि-
रत दशमावस्थां साक्षान्मुखारविंद परम सौन्दर्य साकाराखिलाधिष्ठानानुभवानुरुपायाम्।
अत उक्तं सुबोधिन्यां भगवत्कृपायामनधिकारिणी प्राप्त प्रसादेन जाताजीर्णेति। साक्षान्मु-
खारविंद फल स्थायि विप्रयोगाग्ने र्मांद्यत्वेन निरवध्यानंद रुप प्राप्ति प्रसादेऽजीर्णे जाते
वमनमेवोचिततरं तदेव जातं। कृष्ण प्रेमामृत रस स्वरुप लीला रस भावात्मकं तदनंतरं
सर्वाः समवेताः पुनः कृष्णायाः रसात्मक ब्रह्म स्वरुपायाः पुलिने आगत्य अगायत। तदनन्तरं
यज्जातं तासां बाह्यांभ्यंतर भेदेन शारीरी लीलायां तत महाप्रभुणा सम्यक्प्रकारेण प्रपंचित-
मस्ति। तस्मादत्र किं तत् लिखनेन। तस्मात्साक्षाद्भगवन्मुखारविंद फल वल्लभाग्ने र्नानात्व-

स्यानेक रुपात्मकानि, लक्षणानि सन्ति । परम सौन्दर्य साकाराग्निः वपूंषि व्याप्यव्यापक धर्मत्वावच्छिनानि । अतः पितृचरणैरुक्तं " सर्वलक्षणसंपन्न " इति । अत एव भक्ति मार्गीय भजन शिक्षणेन यन्निखिलेष्टदत्वमुक्तमेतावतैव भक्ति मार्गीय सर्वेष्ट दातृत्वं न सिद्धं किंतु मुखारविंद फल भक्ति रुपं तस्य भक्तिमार्ग प्रवर्तकानि बहूनि लक्षणानि संति तत्र व्रजवर घोष रत्न सीमंतिनीनामनुभव प्रमैव तद्धेतु परिचायिकास्ति । श्रीमुखावलोकनानंतर तासां निखिल भाव संपत्तिष्विदं भक्ति रुप मुखारविंद विप्रयोगाग्न्यनुभव मार्गं प्रविश्य भावाब्जत्वं नीलकुंतलैरावृत वन रुहवन्मुख कमलं । श्रीमद्वृन्दावनेन्दुर्गोभि विविध भक्ति रस निभृतः प्रसिक्तं निभृतं च । तदनुभव निरोध साधर्म्यातिमात्रकत्वात्स ? सदृशत्वं संपाद्य तथैव स्वांतर वर्तिनो भक्तिमार्गाब्ज मार्तंडस्योदयादिकं च । तत्र तासां भावाब्ज तारतम्येन भक्ति मार्गाब्ज मार्तंडोदयस्तारतम्येन भक्तेरनेकधान्येवलक्षणानि भवंति वै तत्तद्भाव विशिष्टेन यद्दातृत्वं तद्दातृत्वं तल्लक्षण संपत्ति व्यतिरेकेण न संभवति । यतो पूर्वोक्त भावार्थ समुदायत्वेन यानि यानि विविध लक्षण सम्पत्यात्मानि लक्षणानि तैरेव तद्दातृत्वानिर्वचनीय सामर्थ्य ज्ञापनार्थं मुक्तं " सर्वलक्षणसंपन्न " इति ॥ तत्सर्वलक्षणसाहित्येन यद्देयदानस्य दातृत्व तद्भाव सम्पत्यभिज्ञापकं नाम आहुः " श्रीकृष्ण ज्ञानदः " इति ॥ श्रीकृष्ण पदेन रसात्मक भक्ति साहित्योक्तया भक्ति मार्गीय फलात्मकत्वमुक्तम् । तस्य यत् ज्ञानं तद्ददातीति श्रीकृष्ण ज्ञानदः स्वस्य मुख्य तापाग्नि बीजात्मकत्वेन भक्ति मार्गाब्ज मार्तंडत्वेन स्वामिनी स्त्री भावाग्न्यात्मकस्य रसात्मक ब्रह्मणो भगवतो मुखारविंदाधिष्ठातृत्वाच्छ्री विशिष्टत्वेन यः फलरुपः कृष्णस्तस्य स्वरुपतो लीला रस भावतः साधनतः फलतश्च यद्बहूनि रुपाणि प्रदर्शकं भक्ति रस निभृतं पुष्टि भक्ति मार्गीयं ज्ञानं तद्दादातीति श्रीकृष्ण ज्ञानदः ॥ यतः पूर्वनामनि सर्व लक्षण सम्पन्नस्तल्लक्षण सर्व सम्पत्ति रुपेणैव श्रीकृष्णज्ञानदो भवति तेन तत् ज्ञानस्य मुखारविंद फल वियोगाग्नि मार्गीयत्वेन सर्वलक्षण संम्पन्नात्मकत्वात् स्वातंत्रिकत्वात् द्विधा श्रृंगार रसाखिल भाव सम्पत्तिषु तद्रस प्रेप्सून भक्तानपि स्वातंत्रिकत्वं लक्षयति संपादयत्यपि चैतादृशं यत् ज्ञानं तद्ददातीति "श्रीकृष्णज्ञानदः" ॥ ननु । भगवज्ज्ञानोक्ति प्रकाराः गीता भागवतादावुक्ता एवेति तैरेव ज्ञान सिद्धौ किमेतज्ज्ञानेनेतिचेत् । सत्यं । यद्यपि तत्र ज्ञान प्रकारा उक्तास्तथापि क्वचित् सर्वात्मकत्वेन जगद् व्यापकत्वेन क्वचित्केवल ज्ञानात्मक त्वेनापि निरुपिताः । तेषां मर्यादा मार्गीयत्वात्तथात्वेनैव ते फलाय भवंति । न तु रसोवैस इति श्रुति प्रतिपाद्य रसात्मकत्वेनापि निरुपिता विज्ञेयाः साक्षाद्भगवन्मुखारविंद फल वल्लभाग्न्यंगीकृतानां तद्रस विषयिक ज्ञान सम्पत्या तदितरस्य वैलक्षण्याति मात्रकत्वमिति ज्ञापनार्थं " श्रीकृष्णज्ञानद " इत्युक्तं पितृ चरणैः । यद्यपि शुक कपिल नारदादीनां ज्ञान दातृत्वमस्ति तथापि तेषां मर्यादा मार्गीयत्वात्स्व स्व मतानुरोधेन ज्ञान दातृत्वेऽपि साधन फलयोरपि तथात्वात्तन्मार्गीयत्वमेव न ततोऽपि किंचिदधिकं । आचार्याणां तु साक्षाच्छुद्ध रसात्मक ब्रह्म पुरुषोत्तम अक्षरातीतः वेदातीतस्तस्य स्वरुप लीला रस भाव परम सौंदय साकारादेः संपत्ति धर्म्मिणश्च प्रतिक्षणेष्वभिनव तरुणानंद रुपेणानेक रासाद्याः लीलास्तत्पर्यवसायि यद् ज्ञानं तद्दातृत्वादुक्तं " श्रीकृष्णज्ञानदः " इति यद्वा ॥ श्रीस्वामिन्याः कृष्णस्यापि स्व विरहानुभवाग्न्युत्थं यद् ज्ञानं " मणिधरः क्वचिदागणयन् गा मालया दयित गंध तुलस्या " इत्यादि रसात्मकस्य ब्रह्मणः स्वतंत्र विरहानुभवादि क्रियोपदर्शकं तद् दातीति ज्ञापनायोक्तं " श्रीकृष्णज्ञानदः " इति ॥ यतः पूर्वं श्रीकृष्ण ज्ञानद इति यदुक्तं तद्भावाप्काधिकार हेतु भूतं नाम आहुः " गुरुः " इति ॥ पूर्वोक्त प्रकारेण साक्षाद्विरहानुभवाग्नि मार्गीय ज्ञान दातृत्वेन श्रीकृष्णयोर्वल्लभाग्नेः गुरोः गुरुत्वमनुक्त सिद्धमेवास्ति । तदनुभवनामनुभव परामर्श प्रेमादर्शोन त्वन्यत्र । किं च । पूर्वोक्त प्रकारेण

तदनिर्वचनीय ज्ञान दातृत्वेन व्रजवर वोष रत्न सीमंतिनीनामपि स्वयमाचार्याः गुरवः सन्ति। वेणुद्वारा स्वयं मुखारविंद फल भक्ति रुपाग्नि रुपेणैव कालावच्छेदकत्वेनात्म समर्पणादिकं कारयित्वा परम सौन्दर्य साकाराद्रव रस रुपां सुधां वेणु रन्ध्रैस्तासां नाभि विवरेषु अनुनिवेशयंतस्तद्बर्हापीडं नटवर वपुः संबधिनी या ज्ञान संपत्तिस्तां तथैव संपादयंतस्तासामपि तत्क्रिया कृतावदानत्वे गुरवः स्वयमाचार्या अभवन। मूल धामनि रसात्मक ब्रह्मण्यपि आतृणादिषु श्रीमद्वल्लभाग्निनां मुखारविंद फल वियोगाग्न्यनुभवावयवाकृतिमतां गुरुत्वमनुक्त सिद्धमेवास्तीति ज्ञापनायोक्तं " गुरु " इति। स्वस्य यथा गुरुत्वं बहुभि र्भावार्थं प्रदर्शकै र्भावै स्तथैव व्रज वनयोरिदानींतनेषु च पद्मनाभादिष्वकुर्वन्। इति किमधिकं वदाम्यहं प्रभोर्निरवधि भाव संप्राप्तौ। यद्वा ॥ यो यन्मार्गोपदेष्टा यन्मार्गीय फल दाता च स तस्मिन्मार्गे गुरुर्भवति यथा कपिलादयः। तथा शुद्ध पुष्टि भाक्तिमार्गोपदेष्टृत्वं तन्मार्गीय फल दातृत्वं चाचार्याणामेव नान्येषामिति ज्ञापनायोक्तं गुरुरिति ॥ ननु ॥ यद्यपि कपिलस्य मातरं प्रति योग मार्गोपदेष्टृत्वं वर्तते तथापि भक्ति मार्गो बहुविध इति वचनात केवल मर्यादा मार्गीय भक्ति मार्गोपदेष्टृत्वं अपि श्रूयते आचार्याणां तु प्रसंगादपि शुद्ध पुष्टि भक्ति मार्गादतिरिक्त भक्तिमार्गानिरुपणे को हेतुरिति चेतत्राहुः " स्वानंद तुंदिल " इति। स्वस्य यः आनंदः परम सौंदर्य साकारानुभव परिनिष्ठस्तेनैव बाह्याभ्यंतर योस्तुंदिलः अति पुष्टः इत्यर्थः। आनन्दस्य स्वपदोपादानेनागणितः मनोरथांतो यः आनंदः तेनैवात्यंत पुष्टत्व निरुपणेन तदतिरिक्तस्य सर्वस्यापि अति तुच्छत्वेनास्य सर्वं विस्मारकत्वेनेतरानु संधानाभावात्प्रसंगादपि नान्य भक्ति मार्ग निरुपकत्वमिति ज्ञापनायोक्तं " स्वानंद तुन्दिलः " इति ॥ ननु ॥ एवं सति श्री भागवते सुबोधिन्यां भगवताम् उपास्य धर्मानुरोधेन केवल रसात्मक ब्रह्म स्वरुप लीलैक प्रदर्शयंता फल प्रकरणीय भक्ति मार्ग प्रवर्तकत्वेन स्वस्य तदानंद रुपत्वात्पुष्टित्वात्कपिलाद्याख्या विवृतौ दत्तात्रय धन्वंतर्यादि विवृत्तावपि श्रीवल्लभाग्निनां स्फुटतरारुचिः प्रवृत्ति दृश्यत एव तत्र भवद्भिरेवमुक्तं। आनंदस्य स्व पदोपादानेनागणितः मनोरथान्तो य आनंदस्तेनैवात्यंत पुष्टत्व निरुपणेन तदतिरिक्तस्य सर्वस्याप्यति तुच्छत्वेनास्य सर्वं विस्मारकत्वेनेतरानुसंधानाभावात प्रसंगादपि नान्य भक्तिमार्ग निरुपकत्वमिति ज्ञापनायोक्तं " स्वानंद तुंदिलः " इति। परस्परयोः विरोधाप्तौ शुद्धानन्योपास्य धर्मानुपूर्व्याः कथं संगति उभयोर्मर्यादा पुष्टि भक्त्यंगयो निरुपणादिति चेत्तत्र वदामः। सत्यं। यद्यपि श्रीभागवते दशविध लीला निरुपण प्रस्तावेऽवतारादेश्चरित्र विवृतौ शुद्ध पुष्टि भक्ति मार्गाचार्याणां निखिल मर्यादांग प्रास्ताविकत्वस्य निरुपणात परामर्शे एवानुचिततरं प्रति भाति केवल रासोल्लास मदोन्मत्त स्वरुपानुभविनां न तु वास्तवतस्तत्र हेतुः स्वस्य भजनानंद पुरुषोत्तमास्य रुपत्वात् परमानंदाग्नि रुपत्वात् विप्रयोगाग्नि मात्र कर पाद मुखोदरादि सुषमा सान्द्रत्वात्तदंगाखिल चरित्र परत्वादेव श्रीभागवत गीता ब्रह्मसूत्रादिषु स्वभोग्योपयोगित्वं विचिन्वंति विचिन्वंतः संतो यत्र यत्र स्व भोग्योपहार्यादिकं पश्यति तत्र तत्र तिष्ठंतस्तत्तद्भूम्यंतरे स्वाविर्भावादिकं वितन्वन्तस्तत्तत्तांतरितां कथां रुक्मिणीं प्रति परिहास विरहाग्निजा तास्तादृशी तस्या निरुपयंतो स्ताभि विरहाग्निजाः स्व शुद्धानुभवांतरे प्रयुज्य तत्तदांतरगतं रहस्यमनुभवंति तासां स्व स्वरुपात्मकत्वात्तासां स्वीकरणे न मर्यादांग विरोध बाधः शंकनीयः। अत एव यथा स्वस्य विरहाग्न्यनुभवानु रुपत्वेन परमानंद दुःखानुरुपत्वं। तथैव तेनैव रुपेण तत्प्रार्थन तस्मिन्नेव तदीयानां तत्साधन संकेत स्थलं। तत्प्रार्थनस्य स्वरुपं वच्मि " यच्च दुःखं यशोदाया नंदादीनां च गोकुले ॥ गोपिकानां तु यद दुखं तद् दुःखं स्यान्मम क्वचित् ॥१॥ गोकुले गोपिकानां च सर्वेषां व्रज वासिनां ॥ यत्सुखं समभूत्तन्मे भगवान् किं विधास्यति ॥२॥ "

इत्युक्तया दुःखस्यैवास्मिन्मार्गे परम फलत्वेन येन दुःखानुभवेन यत् सुखं समभूत्तद् दुःखस्यैव प्रार्थना कृता श्रीमदाचार्य चरणैः ॥ स्वांगीकृतेभ्यः स्वकीयेभ्य इति ज्ञापनार्यंव स्वस्यापि तदाहार्यत्वात्प्रार्थनाया न कश्चिद्विरोधः ॥ पुनरुक्तं " उद्धवागमनेजात उत्सवः सु महान्यथा ॥ वृंदावने गोकुले वा तथा मे मनसि क्वचित् ॥ " अत्र द्रष्टव्यं व्रजे नित्य रुपे गोकुलेश स्थिति पूर्वकत्वाद् गोकुलोत्सवे नित्य रुपत्वादेवोत्सवत्वमस्त्येव तत्रोद्धवागमने एव महानुत्सवस्योक्तया किं ज्ञापितं । उत्सवस्तु नित्य व्रजे नित्य रुपोस्त्येव । परन्त्वस्यागमने विरहाग्निजा याः कथायाः प्रादुर्भावे सति तासां परमांतरीयानुभवादेः प्राकटयान्महानुत्सवो जातो । न तथा पूर्वं व्रजेऽभूत् यत स्तत्प्रस्तावे तदंग परत्वादिव मर्यादा पुष्टि भक्तागमनविधावपि स्व भोग्य योग्याहार्यादिकमेव गृहीतवान् । नतूद्धवांगपरत्वे न वा कृत्रिम विरहांग परत्वेन । किंच यथोद्धवागमने एव व्रजे वने च विरहाग्न्यनुभवानुरुप प्राकटये सत्येवोत्सवो ज्ञातस्तेन पुष्टि भक्ति मार्गीय सिद्धांतोऽपि गृहूणीयो विमर्शणीयो भवति तर्हि सेव्य स्वरुप वर्त्मनि अपि नित्याविर्भाव प्रसंगादेव नित्योत्सवत्वं तदाविर्भावाभावे अन्हिकमिवेति मंतव्यं यतो हिंडोल दोलोत्सवादिषूत्सवत्वं तदैव स्याद्यदि प्रकटित शुद्ध पुष्टि भक्ति मार्गाचार्याणां विरहाग्निना प्राकटये सति भगवतो रसात्मक ब्रह्मणो विविध लीलावशिष्टस्याविर्भावो भवेत् । नोचेत यथास्ति तथा तेऽपि जानंति वयमपि विद्मः । परस्परयोः परामर्शे साधर्म्याति मात्रकत्वात् । ननु । अनाविर्भावे को हेतु स्तै र्यत्क्रियते तत्तु मर्गानुरोधयैवेति चेत्सत्यं । तत्रादौ तु मुखारविंद फल वियोगाग्नि संबंधाभावेन स्पष्ट एव भगवदाविर्भावस्याप्यभावो भवति । पुनः सामग्यादिष्वसावधानतया । पुनः स्पर्शास्पर्श विचाराभावात् । पुनः भगवदीयाभगवदीय विवेकाभावात् । पुनरसमर्पित वस्तु स्वीकरणात् । पुनरुत्सव प्रस्तावेऽन्यमार्गीयाणां ब्राह्मणानां शूद्राणां वासं सृतेरैवातिशयात् । भगवद्भक्तांना निंद्य धर्माचरणात् । पुनरभिमानात् । दैन्याभावेन च । पुनः केनचित् दत्तं भगवदर्थं तत्स्वीकरणात् भगवति निवेदिताखिल पदार्थेषु स्व सत्ताभिमानिकत्वाद्भगवद्भक्तानामसमाधानाद्भगन्मंदिरे हास्यादि करणात् । भगवत्सेवायां क्रोधावेशात् । अन्य चिन्तनादपि स्वस्योत्सवदिनानुसंधानाभावात् । तल्लीलानुसंधानावशिष्टात् । स्व सेव्यातिरिक्तानुसंधान स्मृतिश्च एवं क्रियंतः सेवादिषु प्रतिबंधकाः जीव धर्माः संति गणनायां नायांति । तस्मात् सेवायां वा कथायां यत्कर्तव्यं तदुद्धाव्यैव न तु रौढिकत्वात । तस्मादाचार्य चरणास्तु श्रीभागवतादिषु स्वोपभोग्य सामग्रीणामेव साधर्म्याति मात्रकत्वं संवीक्ष्यैव समाधि भाषायां तान् केवल विप्रयोगांग भूतान् साक्षादानंदाशांवतारोत्तरावस्थितान् भवानेव गृह्यंति न तु स्व स्वरुपातिरिक्त धर्मान् । अत एवोक्तं पितृ चरणैः "स्वानंद तुंदिलः" इति ॥ स्वस्य यः आनंदः सर्वाज्ञातः सदैक रुपकत्वादनंत रुपो विविध लीला रसात्मकस्य ब्रह्मणो भगवतः आंतरीय परम सौन्दर्य साकारानुभवाग्न्युद्भूतः कोटि कंदर्प लावण्यरुपः रसात्मक गुणाखिल सामग्री विशिष्टस्ये तापि गुणातितोऽनेक रसादिलीलावयवरुपः संयोगाग्नि विप्रयोगाग्निभ्यां संपृक्तः अगणित मनोरथां तेनैव बाह्याभ्यंतरयोरतिपुष्टरसः तदरितिक्तस्य सर्वस्याप्यति तुच्छत्वेन स्वस्य सर्व विस्मारकत्वेनेतरानु संधानास्फूर्त्या प्रसंगादपि नान्य भक्तिमार्ग निरुपकत्वमिति ज्ञापनायोक्तं " स्वानंद तुन्दिल " इति । एवं पूर्व नमोक्तानंद पुष्टत्व ज्ञापनायाग्रिम नाम आहुः " पद्म दलायत विलोचनः " इति ॥ पद्मदलवत् आयते विशाले लोचने यस्य सः । अत्र लोचनयोः पद्मदल सादृश्य निरुपणेन शैत्यं । अमृत बीज फल रुपत्वं ॥ यथा न भक्तिमार्गाब्जस्य दीर्घताया अंतो न सुरभितानुरागाद्रंतायां नान्तो रक्त रेखा रेखावत्वेनानुराग जालाक्ष्य सुषमासंदोहस्य विविध सुखदानस्या तेन भक्तानां तल्लोचन भाव ज्ञानामत्यंत सुखदमिति

ज्ञापितम् । यद्यपि पद्मदल दृष्टांत निरुपणेन सूचिता धर्माः लोचनयोः सहजास्तथापि विशिष्टोपादानात् पूर्वोक्त निखिलानंद वैशिष्ट्यमपि ज्ञापितं ॥१३॥

एवं आचार्य विलोचन स्वरुपं निरुप्य स्वीय भक्तेषु तत्कार्यमाहुः "कृपादृग्वृष्टिसंहृष्ट दासदासी प्रियः पतिरिति

कृपादृग्वृष्टिसंहृष्टदासदासीप्रियः पतिः ॥
रोषदृक्पातसम्प्लुष्टभक्तद्विड् भक्तसेवितः ॥१४॥

कृपायुक्ता या दृशः कृपाकटाक्षास्तासां या वृष्टयः निरन्तरं वर्षणानि सर्वतः प्लावनं ताभिः संहृष्टाः अत्यंतं आनंदिताः दासा दास्य श्च तेषां प्रियः । तेनैवमया स्फुटतरा विवृतौ किं ज्ञापितं । साक्षाद्विधाश्रृंगाररस रुपस्य शुद्ध रसात्मक ब्रह्मणे मुखमंडलं विविध संचित विचित्र भाव मुकुरायमानं प्रेमासक्ति व्यसन त्याग वैराग्यादीनां धामरुपं, समुदायित्वेन भक्ति मार्गाब्ज रुपं कज्जल नासागत मुक्ता फलादिभिः स्व स्वामिन्युत्तरदल स्थायि विप्रयोग सर्वांग रसानुभवज, निरोधादर्शं स्वान्तरीयाशय समुदाय प्रत्यक्ष प्रदर्शि पांडु वदन सुषमा सान्द्र सन्निभं तन्मुख मंडला युक्त मंडलांतरवर्ती भक्तिमार्गाब्ज मार्तंडः स्थयं वल्लभाग्निः श्रीवल्लविशांतर विहारी, व्रजवरघोषरत्न सीमन्तिनां नाभि कमल कोशेषु निरवधि आनंद रुपेष्वाकाशेषु मुखारविन्द फल वियोगाग्निः शुद्धाध्यासोद्रेक विभ्रम संभ्रम सांद्रेषु भ्रमणशीलः आविर्भाव तिरोभावाभ्यां बहिरांतर स्वरुप लीलादि रमण प्रदर्शयद्भ्यां स्वोदयास्त प्रदर्शकः स स्वयं वल्लभाग्निभानुः स्वांशुभिः निरवधित्वेनातितरलैः प्रचंड प्रभानुभाव प्रयुक्तैः सलिलं मधुरं द्विधाश्रृंगार स्वरुपं, रसात्मक ब्रह्मणि मूलधामनि व्रजवनयो श्चरतृणादिषु पुलिंदीनां अनुभवाधिष्टान रुपेषु यदवस्थितं विप्रयोगाग्निना विविध परम सौंदर्याकार, द्रव द्रव्यं; प्रदर्शयत् तेभ्यः तृणादिभ्यस्तथैव व्रजवरघोष रत्न सीमंतिनीनां भाव भावना समुदाय रुपेभ्यः केदारेभ्यः आकर्षयंतः, स्वदृक्षु परिपूर्णं कृत्वानुरक्त कटाक्षमोक्षण विधिना, तत्तद्रस भावामृत भरावृष्टयो मूलधामनि रसात्मक बह्मणि व्रजवनयो श्च भक्तिमार्गाब्ज मार्तंड रुपेण स्वयं विरहाग्निमार्गाचार्याः कुर्वंति तेन कृत्वा तत्रत्यानि द्विधा श्रृंगार परम सौंदर्य साकार रुप रुपात्मकानि बीजान्यग्नि बीजामृत बीज संज्ञिकानि श्रृंगार कल्पद्रुमात्मकानि तथैवांकुरितानि भवंति तद् वृष्टेरनशिभृशं निसर्गतो निरंतर वर्षणं सर्वतः प्लावनं सर्वेषां भगवत्पदार्थानां रसवृष्ट्याधिक्यात् जलधौ तद्रूपत्व संपादकं, तेन तत्रत्या सृष्टि स्वरुपात्मका संदृष्टा शश्वत् तिष्टति तत्रापि दासाः दासी भाव प्रयुक्ता सरस सारस हंसादयो वेदितव्या ननु तत्र पुरुषवाच्यत्वाभावे मूल धामनि व्रजवनयो श्च दासत्वेन पुरुषाः दासीत्वेन स्त्रीयो विभावनीया स्तेत्वत्रैवस्त्री शूद्रादिषु तत्तुच्छशरीरावस्थां प्राप्तवत्सु तत्प्राकट्यादे तेष्वपितथैवाभूदिति यावत् । ननु मूल धामन्यपि सरस सारस हंसादिषु दास दासी भाव प्रयुक्तत्वोक्तया पुरुष स्त्री वाचकत्वापत्तौ तत्स्त्री पुरुषयोः कीदृशं विभावनीयं इति चेत् । सत्यं । "वीक्ष्यालकावृत मुखं" तत्रत्यं मुक्ति चतुष्टयं मुक्तिमप्युत्सृजंतो यं दासभावमवलंब्य प्रार्थित वत्यो "भवाम दास्यः" इत्यनेन तस्मिन्नेव मुखमंडले भक्तिमार्गाब्ज मार्तंडोपकुले दासी दास भावयोः स्थितेः सर्वत्र लीला लोकादौ प्रथम तया स्व स्वरुपं प्रदर्शयंत । आचार्यास्तयो मुख्यदानं पुरस्कृत्त पश्चाल्लीलांतर प्रवेशं ददातीत्यभिप्रेत्यैवोक्तं पितृचरणैः "कृपादृग्वृष्टिसंहृष्ट दास दासी प्रियः" इति । अत्रापि तद्भावानुरुपयोः दासीदास भावयो

भाव संपत्ति प्राप्तवतां दासीदासानामेव मुखारविन्दरूपेण प्रियो भवति न तु स्त्री शूद्राणां । दृष्टिजनि
हर्षे सम्यक् कथनात् वृष्टि जनितार्द्रतायास्तदीयेषु न कदाचिदपगम इति ज्ञापितं । अथवा
कृपादृग्वृष्टि संहृष्टदासदास्याः प्रिया यस्य स तथा इति भावः । तत्रापि प्रियत्वे हेतुः पूर्वोक्त
प्रकारेणैव मंतव्यं । ननु तदभावे ॥ यद्यपि दासदासी प्रियत्व कथनेनैव पतित्वं प्राप्तं तथापि
पुनः पतित्व कथनस्यायमाशयः । यद्यपि पतित्वं लोके दृश्यते तथापि तत्र शुद्ध स्थायि पतित्व
लक्षणाभावात्पतित्वमौपचारिकमेव न स्वाभाविकम् । आचार्येषु तु मुखारविन्द परम सौंदर्य
साकाराकाश मध्य मंडल भक्तिमार्गाब्ज मार्तंडेषु "सवै पतिः स्यादकुतो भयः स्वयं समंततः
पाति भयातुरं जनं" इति लक्षणं पतित्वमत्रैवास्ति । स्वस्य कालादि भय निवारकत्वेन पूर्वोक्त स-
र्व लक्षणसम्पन्नत्वेन निखिलेष्टदत्वेन नित्यलीलायां स्वकीयान् प्रापयित्वा नित्यत्वं सम्पादक-
त्वेन पतित्व लक्षणमत्रैवास्ति नान्येष्वपीति ज्ञापनायोक्तं " पतिः " इति ॥ ननु पतित्वेन
स्वकीयानां काल भय निवर्तकत्वेन फलदानेन च यथोचितं तथैवाविर्भूय संपादितमस्तु तथापि
लोकोत्पन्नासुर जीवानां स्व प्रति पक्षत्वेन तद् द्वेष कारित्वं भविष्यतीत्याशंक्य तद्भय निवा-
रकत्व सामर्थ्यं कटाक्ष लव लेशान्तरे एवास्पर्श भेदेनात्राप्यस्तीति ज्ञापनायाहुः "रोष दृक्पातस-
म्प्लुष्ट" भक्त द्विडिति । रोष सहिता या दृक् कटाक्षास्तस्यापातेन सम्यक् प्रकारेण प्लुष्टादग्धा
भक्त द्विषो येन सः दाहे सम्यक्तयोक्त्या दग्धानां पुनरुत्थानाभावः सूचितः इति तु प्रकट विवृतौ
मया प्रपंचितमस्ति । परन्तु स्वतंत्रत्ववक्तव्यैव य स्तस्माद्विशेषोऽस्ति सोत्र लेख्यो भवति ॥
श्रीमद्वल्लभाग्न्यंगीकृतानां मूल दैवी जीवानां तदर्थ बोध सिद्धये साक्षाच्छ्रीमद्वल्लभाग्निनां भगवन्मु-
खारविंद फल भक्तिमार्गाधिष्ठातृत्वाद्रास स्त्रीभाव पूरित विग्रहत्वात् बाह्याभ्यंतरयोरानंद परमा-
नंदात्मकत्वात् । प्रति रोमान्तरेऽनेकरासादि लीलावयवात्मकत्वात् । परम सौन्दर्य वस्तु
वास्तवाकाराकृतिमत्वात् । तद्धर्म धर्मि विशिष्टाग्न्यात्मकत्वादेवं सति रोषदृक्स्वपि तथात्व
सहितस्याग्नेस्तद्रूपात्मकत्वादासुर जीवानां भक्तद्विषां तेनैवाग्निना रोष रुपेण दग्धत्वकरणे तदग्नि
संस्पर्श निसर्गतो लीलौपयिक देहादिकं संप्राप्य तर्हि मूल धामन्येव कथं न ययुरग्नि संस्पर्श
तथात्व संपादकत्वात् ननु दग्धत्वं प्राप्य पुनरुत्थानाभावतां गच्छेयुः । "स्वामिन् श्रीवल्लभाग्नेः
क्षणमपि भवतः सन्निधाने कृपातः प्राणप्रेष्ठ व्रजाधीश्वर वदनदिदृक्षार्ति तापो जनेषु ।" इत्यादिना
वल्लभाग्नि संनिधेरुग्र महिम्नो निरुपणात्तेषामपि तथैव भगवत व्योक्तिमनुपपन्नं तत्र जातेऽय-
माशयः तादृक् दग्धत्वात समवायित्वस्य तदग्नेः रसरोषभराक्रांत भावांतरितस्य तादृशेन
रोष दृक्पातेन लौकिकीमग्निं प्रति लक्षयंति संज्ञां करोति किमेनं मम भक्त द्विषं भस्मसात् कुरु-
ष्व सोपि तद्भावानुरोधेनाविलंबेन तथैव करोतीति भावः ननु तेषां दाह देह स्पर्शांतरे स्व
स्पर्शं प्रकटयति न कदापीत्यर्थः । तदग्नेः स्पर्श मात्रस्यैव स्वरुपात्मकत्वाल्लीलात्मकत्वाच्छुद्ध
साकार ब्रह्मत्वं संपादकत्वाच्च तेषां स्व भक्त द्विषां असुराणां भस्मसात् करणेऽप्यंतासं-
भावितत्वात्पूर्वोक्तो यो मदीयो भावार्थः स एव ग्राह्यो भवति नान्य इति भावः । इत्यनेन
स्व भक्त पक्षपात परत्वं सुतरामनिशं भृशं ज्ञापनायोक्तं "रोषदृक्पात सम्प्लुष्ट भक्तद्विडिति" ॥
यद्यपि भक्त सेवितत्वं सदास्त्येव तथापि भक्त सेवितत्व कथनेन पूर्वोक्त नाम प्रकटित सामर्थ्य
दर्शनेन लौकिकास्वानिष्ट निवर्तक ज्ञान जनितानन्द विशेष भरणे क्षणमात्रमपि सेवा वियोगा-
सहिष्णुतया भक्तानां सेवा करणत्व ज्ञापनायोक्तं "भक्त सेवित" इति । अयं भावार्थस्त्वन्यत्यो
भूमावतरणाशयाभिज्ञापकः । ननु मूललीलाया ॥ तत्र तु निखिल रास मंडल मंडना वृन्दैर्योग-
माया प्रभृतिभिः प्रभुभिरपि सेवितत्वे सेवितत्वस्य निरवधिरुपस्य किं वक्तव्यं ॥१४॥
ननु भक्तानां बाहुल्यादनेक विध भाव तारतम्यवत्वेन सर्वेषां सर्व भाव पूर्ति सम्पादक-
त्वेन सेवनं न भविष्यतीति आशंका निरासायाहुः " सुखसेव्य " इति

सुखसेव्यो दुराराध्यो दुर्लभाङ्घ्रिसरोरुहः
उग्रप्रतापो वाक्सीधुपूरिताशेषसेवकः ॥१५॥

"सुखसेव्य" इति । सुखेनैव सेव्य इत्यर्थः । अलौकिकात्यंत सुखानुभवेनैव सेव्य इत्यर्थ । अस्यायमाशयः । यद्यपि भक्त बाहुल्यमस्ति तथापि यो यद्भावापत्या यथा सेवां कर्तुमिच्छति तस्य तद्भाव पूर्ति प्रकारेणैव विविधानुभव तारतम्यज सुखानुभवेनैव सुख संपादनजन्यां सेवामंगी करोतीति ज्ञापनायोक्तं "सुख सेव्य" इति । वस्तुतस्तेषां भक्तानां मुखारविंद फल वियोगाग्न्यनुभव निखिलाधिकाराधिकरणकत्वात् पूर्वं शुद्ध पुष्टि लीला मध्यपातित्वात्सुख सेव्यत्वमनुक्त सिद्ध मेवास्ति न तेषां तदनुभवे तत्सुख सेव्याधिष्ठाने परामर्शो कश्चित्प्राप्तो न कोऽपीत्यर्थः ॥ यथा यथा मुखारविंद फल वियोगाग्ने र्नानात्वस्यानुभवाप्ति स्तेषां तथा तथा ते बाह्याभ्यंतरभेदेन संयोग विप्रयोगानुभवानुरुप संपृक्तेन परं स्वतंत्राः संति विविध भावुकाः संति तैरेव सुख सेव्यः तत्तदर्चितैश्वर्यात्तत्प्रेमासक्ति व्यसनोभ्दूतानां मुखाकृति परम सौंदर्य साकाराखिल भाव संपत्ति प्रवृद्धकानां विधायकानां मुखारविंदाग्नेरति व्याप्तानां मनन निदिध्यास प्रत्यवसाय पर्यवसान फल प्राप्त वह्निभिरेव तन्मुखाग्निः स्वरुप भावाग्नि लीला भावाग्नि भाव भावनाग्न्यादिभिः पूरित विग्रहः सुखसेव्योऽस्ति नान्यैरिति भावः । किं चैतेषां तु मूल लीला मध्य पातित्व विषयेऽविकृतत्वात्तदनुभावाध्यासदेरपि शश्वत् शुद्ध तरत्वात्तथैव सुख सेव्यत्वापत्तौ सुख सेव्यत्वमेवास्ति भूमावागतानां दामोदर दासादीनां तदनुभवानु भूतिस्फूर्तौ तद्वत्वेनैव सुख सेव्य इत्यत उक्तं पितृचरणैः "सुख सेव्य" इति ॥ यथा वेणुना सुखसेव्य ॥ यथा व्रजवरघोष रत्न सीमंतिनीभिः सुखसेव्यः । यथा रमण पुरुषोत्तमस्वामिनी स्त्री भावात्मक स्वामिनीभ्यां सुखसेव्यस्तद्वदत्रापि तत्तद्भावसंपत्तितारतम्य विशेषवद्भिरपि सुखसेव्यो भवति खलु वेणुना सुखसेव्य इत्यनेन किं द्योतितं मया । वस्तुतो वेणुः स्वयंभगवन्नाभ्यारभ्य मुखकमलावधि पर्यंतं प्राप्तं प्रदर्शयन्नांतरीयावयव धार्यांतरीयावयव रुपत्वेन तथांगभूतोऽस्ति, यद्यपि तथापि भगवद्धर्मानुकूल्यादेव भगवद्धर्म सामर्थ्य रुपोऽपिसन् यदि श्रीमत्स्वामिनीनां गुणगानार्णवेषु गुणगान द्वारा निमज्जति पुनरुन्मज्जति तेनतेषां तल भागात् संस्पर्शयन् । तत्रत्यान् मर्म मात्र विग्रहप्रवर्धकान् मर्माग्न्युभ्दूतान्पदार्थान् भावना शतशः प्रकारै निगृह्य स्वयं मुखारविंद फल वियोगन्याचार्याणां सन्यासाश्रम विविध परम सौन्दर्य साकार शुद्ध ब्रह्म रसात्मघन वन मेंदुरं विविध संचित विचित्र भावै र्बहुभि र्गुल्म लतौषध्यादिभिः संपृक्तं सान्द्र मुख्य भक्त भक्ति प्रदात्मदर्श तदुपसेवी भगवद्धर्मादि र्न्निखिलत्वं तत्साम्यत्वमुपयाति यदि तदैव तेन वेणुना तन्मुख वल्लभ विरहाग्निरुपं सुखसेव्यं भवति ॥ तेन कृत्वा तदेव साधनं तदेव फलं अभूत दृश्यतेऽपि तथैव च । साधनत्वेनाधरासनोपरि स्थित्वाहर्निशं शश्वदनिशं भृशं, तन्मुखाग्नि गुणगान पर एव तिष्ठति किंचैतेषां तु मूल लीला मध्य पातित्वात् तत्साधन साध्य फलस्याप्यति सामीप्यमुपलक्ष्यते । अत एवास्मिन् शुद्ध पुष्टि भक्ति भक्तिमार्गे साक्षात्स्वरुपानु भवसाक्षात्फल संबधः । अत एवोक्तं निःसाधन फलात्मायं प्रादुर्भूतोस्ति श्रीगोकुल इति । तत्प्राकट्ये सत्येव श्रीगोकुलस्य तदनुभव समुदाय समष्टि रुपस्यापि फलात्मकत्वात् स्वरुपानुभव एव फल साधनयो र्निश्चियात्तदीयैस्तत्स्वरुपानुभवामृत रसप्रेप्सुभिः प्रथम दशायां वा तदनुभवोत्तरे स्वरुपानुभव एव कर्तव्य इति प्रकटित श्रीमद्वल्लभाग्नि मार्ग मर्यादा स्थितिरस्ति । परंतु येषां पुष्टिमार्गे एवांगीकारो विचारितोऽस्ति प्रभुणा तेषां एव तत्स्वरुपानुभव साधन फलरुपेणानुग्रहातिशयाविष्कार हेतु भूतेन दानं नत्वन्येषां । अत एवोक्तं अनुग्रहो हि पुष्टिमार्गे निमायक इति स्थितिः । अनुग्रह शब्देन स्वरुपानुभव

एव साधन फल रुपेणोच्यते । तस्माद्वेणुः स्वयं पूर्वोक्त पूर्वोक्त प्रकारेण स्वतः सामर्थ्यवत्वेनापि स्वरुपत आकृत्यापि तद्रूपतोऽपि यदि प्रिया गुण गणार्णवोर्मिभिः प्रसिक्तो भवति ताभिरुर्मिभिस्तद्रूपात्मकत्वाद्रसात्मक शुद्ध ब्रह्म व्रजेन्द्रकुमार इव स्वतंत्रः सर्वेभ्योऽस्पर्शा विरहानुभवादिभिरपि तद्रूपात्मकत्वेन तन्मुखारविंद फल वल्लभहुताशः सुख सेव्यो यथा भवति तथैवोपलक्ष्यते प्रत्यक्ष प्रमाण प्राप्त प्रसंगात् अलं अनुमान प्रमाणात्तौ गौणत्वात पुनः प्रमाणापेक्षा व्यर्थैवावधेया । यतो यदि स्वयं रसिक चूडामणि मुख्य श्रीमत्स्वामिनी निगूढ भावात्मकस्तदनुभव रसामृत रस पान प्रमत्तयावस्थया वेणुं वादयति तत् समये श्रीमुखाकृतेः सौन्दर्य साकाराखिल मिश्रित विविध भाव संतति विचित्र विचित्रा माधुर्य लावण्य विभूति र्दृष्ट्व्यैव योग्यास्ति । न वचसा वक्तुं शक्यास्ति । तथापि तदनुभव विक्षोभ निसर्गतः किंचिदत्र तत्संबंधिनी माधुर्य लावण्य सौन्दर्य साकार विभूतिं लिखामि । अनिर्वचनीयांतरीयानुभवोद्रेकाविर्भाव रंहसा वेगेन मुखाकृतौ यावत्यो भाव संपत्तयः स्व स्वामिन्यनु भवानुभूति रुपास्तावत्य स्तदाविर्भाव संपर्कत एवैजमाना भवंति तेनोत्फुल्ल नासा फल मुक्ताफल एवमधरे माधुर्य चांचल्य प्रकंप स्तथैव मद विघूर्णित वक्त्र नेत्रांचलयो स्तदाविर्भावोद्रेक संपर्कत, उन्नतत्वं लोलत्वं चपलत्वं वक्रत्वं सौंदर्यं माधुर्यं मदद्रवत्वं चाकचाक्यातिशयत्वं हसितत्वं उन्मिषत्वं निमिषत्वं मुकुलितत्वं प्रसन्नानंद प्रसरत्वं वक्राकृतिमत्तो भ्रुकुटयोर्भाव भ्रमरराजि छविमतिक्रमंत्योरुन्नतयोः प्रतिबिंबत्वं स्वच्छादर्शमानत्वं तथैव भाल विशाल प्रदेशो मुकुट विविध रत्नमणि प्रकरखचित विविधाभरण रत्नमाला वनमाला गुंजमाल विविध रमण सौगंधादयस्ताभिः परिवेष्टितः पिछगुच्छावतंसाभरण कर्णाभरणगो ज्योत्स्ना समुदाय चाकचक्योर्मयः स्वगतागत मधुरिमां माधुरीं प्रदर्शयंत्यः संत्यो दृगांचलयोः स्व स्वांचलन प्रांत छबि समर्पयंत्यः पुनः स्व स्वाधिष्ठाने व्रजंति पुनरागच्छंति तत्सामयिक सुषमात्वं अपि तदाविर्भावांचितत्वात् गलदमंद मरंद सुषमा वास्तवानुरुपाः गंड मंडलयो विशालयो कर्णाभरणे प्रसूनाकृतिमंतो विविध मणिगण ज्योत्स्नानां तारतम्य कर्बुर संदोह प्रतिबिंब पाताद्भवति संगमे दशनपंक्ति प्रभायां "हार हास उरसि स्थिर विद्युत्" तद्भावाभिव्यंजकायां । स्वासोच्छवास मृदुसंस्पर्श निसर्गतो नासागत मुक्ता फलयोरुच्चावचत्वं पुनर्गंड मंडलयोः नील कुंतलाः सहजैव विविध सौगन्ध द्रवेणार्द्रा सुचिक्कणाः । नील प्रभानिर्वचनीयाः सर्वाज्ञात नील प्रभापरामर्श प्रध्वसिनी तद्वत्वेनांदोल लोलावतंसाभरणादेरुर्मिभिः कर्बुराः प्रतिबिंबित प्रसून विविध वर्ण भाव गण संवृताः कुटिलत्वेन द्विधा श्रृंगार रसाब्धि मधुव्रतालिं मर्मस्तल भागे श्रीमत्स्वामिनीनां नेत्र परम सौन्दर्य माधुर्य लावण्य साकारानुभव निरोधाद्रि गंड शैल स्पर्श विक्षोभं जनयंत प्रदर्शयंतः. प्रतिबिंबिता भवंति । कुंकुम तिर्यग्रेखा विविध रत्नमणि प्रकर खचित मुक्ताबिंदु खी भावात्मक भावदुःखी भावात्मका गतिमत् तत्प्रभा व्याप्ति विशिष्टा तस्याः मुकुरायमाने मुखारविंदे जलोर्मिरिव ललितगति विलास व्यापकत्वं परम भाव वास्तव निरोध कर्दम कज्जलादेश्च तत्समये भवति । तत्समुदाय भवनस्याति व्याप्तिरधरोल्लंघ्य वेणौ प्रतिष्ठा भवति । तत्र तद्व्याप्ति जनितं यन्निखिल पूर्वोक्त निरवधि भाव साःमग्री विशिष्टं तद्दर्शनीयमेवोद्भावनीयं च । पुनः प्रिया गुणगण गानावेश भरवशात् स्वांतरीया स्वातंत्रिकी विरहानुभवानुरुपाणी विरहाग्नि भाव संपत्तिः सप्तरंध्रैः सर्वाधार सूक्ष्म व्यापक धर्म विशिष्टैर्बहिरायाति पुनः मुखारविंद फलानुभव मार्गाधीशेनानुमोदिता भगवदंगुल्यः ताभिः तारतम्येनैव तैः रन्ध्रै स्तस्याः बहिरागमन विधावपि तारतम्यमऽभूत ॥ अत एवोक्तं "कोमलांगुलिभिराश्रित मार्ग" इति । वस्तुतः परम रहस्यांतरत्व बहि र्व्यक्ति भवने भगवतो रस परवशत्वात्स्वयं मुखारविंद फल विरहाग्निरेव सप्तरंध्रानरुद्धत् । यतो "भगवद्धर्म सामर्थ्याद्देव विरागो विषये स्थिर" इति । यथा वेणोः षट्-

रंध्राः भगवद्धर्मरुपाः तत्सामर्थ्येन धर्मिणोऽपि नैकट्यं । सप्तमे रंध्रे साक्षान्मुखारविंद फल रुपेण मूल लीलादीनां स्वरुपात्मकत्वेन लीलात्मकत्वेन भावात्मकत्वेन कारणरुपेण विरागत्वेन तदनुभवेतरानुसंधानादे र्विस्मारकः प्रध्वंसको भगवदनुभाव विषय एवं तिष्ठन् स्वरुपानुभवादेरेव विधायकोऽनिर्वचनीयो विरागोऽवधेयो भवति । तस्माद्यथा मुखारविंदानुभवाग्न्यादर्शीऽनंतत्वमनंताचिंत्य शक्ति समुदायान्विततत्वं तथा तदनंतानुभव विक्षोभ विशिष्टैः पद्मनाभदासादिभिरेव सुखसेव्य एतेषां तदनंतानुभव इयत्ता शून्य सदैकाप्रमेयरुपानुभव सौकर्यं संपत्यैव, यासां संभवानिसर्गो धर्मस्तदनंतानुभवानुभाव विशिष्टानां तु दुराराध्य इति पद्मनाभदासादीनां सुख सेव्यत्वं तद् दृष्ट्वा तद्वदन्येषामपि सुख सेव्यत्वं भविष्यतीति शंका निरासायाहुः "दुराराध्य" इति तदनंतानुभव विशिष्ट परमहंस परम भक्तातिरिक्तानां पुष्टि प्रवाहिकानां वा पुष्टि मर्यादीनां अति कष्टेन कदाचित् दृष्टानुरागत्वेऽपि श्रुतानुरागेऽपि च संतोष मात्र जनकत्वं संभवति नतु वेणुवत् सेवा करणं वा यथा व्रजवरघोषरत्न सीमंतिन्यः स्व स्व हृदि तन्मुखारविंद फलानुभव वल्लभाग्न्यनंतत्वं गणित्वा सेवनं कुर्वंति तदनंतानुभव विशिष्टाः "गत्यानुराग स्मित विभ्रमेक्षितै र्मनोरमालाप विहार विभ्रमैराक्षित चित्ताः प्रमदारमा पतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः" ताभिर्यथा तदग्रेः सेवनं नतु तद्वदिति ज्ञापनायोक्तम् "दुराराध्य" इति ॥ ननु । पूर्वोक्तानंतानुभव विशिष्टानां भक्तानामेव सुख सेव्यत्वमुक्त्वा अन्येषां कष्टनाऽपि संतोष मात्र कथने को हेतुरिति आशंका निरासायाहुः "दुर्लभांघ्रि सरोरुहः" इति ॥ अत्र भक्तानामेवांघ्रि सरोरुहयोः कष्टेन प्राप्यत्वं ॥ कष्टेन प्राप्यत्व कथनेन तत्कष्टस्य विरहाग्न्यनुभावात्मकत्वात्परमालौकिकत्वं ध्वनितं वल्लभाग्नेः परमानंदाग्नि रुपयो योरंघ्रिसरो रुहयोः परमालौकिकानंद परमानंदाग्न्यात्मकत्वेन लौकिक कष्ट प्राप्यसंभवात् तेन दुर्लभांघ्रि सरोरुत्व कथनेन दुःखेन चरणारविंद प्राप्त्यार्ति रुपेण प्राप्ये चरण सरोरुहे यस्य सः । अंघ्रिसरोरुहत्व कथने विषयाशयस्त्वयं साक्षाद्भगवन्मुखारविंद फल वियोगाग्नि रुपोऽनवधिकानि रुपात्मकान्यग्नि बीजानि परमानंद स्वरुपाग्न्यात्मकानि तथैतत् समायाति मात्रकं भूमि संबंधमासाद्य द्विधा श्रृंगार रसात्मकः अनेक रासादिलीला फलाढयः कल्पद्रुम तत्प्रदर्शकान्यग्न्यमृतात्मकानि बीजान्यपि तथैव मंतव्यानि । स्वगत रसस्याप्यनंतत्वाद्रस रुप स्व रुपाण्यप्यनंत रुपात्मकानि बीजानंत रस रुपानंताभ्यामनंतानंद रस रुपस्तेन कृत्वा चरणारविंदयोस्तयोः सर्वांगावतरितरस्तत्तद्बीज फल रसानंतत्वाभिव्यंजक आगत्य स्थितो भवति । तेन कृत्वा तदनंतत्व विशिष्टयोरंघ्रि सरोरुहयो निरवध्यत्यंतालौकिकत्वेन लौकिक कष्ट प्राप्त्यसंभवात् । यथांघ्रि सरोरुहयोस्तादृश भरभावाविष्कार भूतयो निरवध्यत्यंतालौकिकत्वं, विरहाग्ने र्नानात्व विक्षोभ साधनसाध्य व्यापकत्वं तथैव तत्प्राप्त्यात्युद्रेक भरभावितै स्तदीयैः सर्व त्याग पूर्वक विरहाग्न्यनुभवानुरुपः परम फल प्रदस्तदनंतत्व, मूर्तिमान कष्ट एव साधयेत् । एतदलौकिकेन विरहाग्नि रुपेण कष्टेन साधनेन तदुर्लभांघ्रि सरोरुहत्व दुस्साध्यतमं साध्यं भवति तस्मादेव दुर्लभांघ्रि सरोरुहत्व कथनेन दुःखेन चरणारविंद प्राप्त्यार्तिरुपेण प्राप्ये चरण सरोरुहे यस्य स इत्यस्यायमाशयः ॥ इति तु दुष्प्राप्यत्वं व्रजवर घोषरत्न सीमंतिनामुक्तं पूर्वोक्त साधन संपत्ति संनिधौ तु तासां दुष्प्रापकत्वं सुलभत्वमेव तदभावे तु तासामपि दुर्लभांघ्रि सरोरुहत्वं । यत्र भक्तानामपीयं व्यवस्था तत्रान्येषां तत्संबंधः सुतरां दूरापस्त इति नाधिकं वक्तव्यमिति सर्वमनवद्यम् ॥ एवं पूर्वनामार्थ निरुपणेन तत्रान्येषां तत्प्राप्तौ क्वावसरो न कदापीत्यर्थः ॥ भक्तातिरिक्तानां तत्साधन रहितानां स्पष्ट संबंधाभावमुपपाद्य तत्संबंधाभावे पुनर्हेत्वन्तरमप्याहुः "उग्रप्रताप" इति । भक्तिमार्गाब्ज मार्तंडोऽनंताखिलोग्रप्रताप समुदायाधिष्ठानोतः स्वाशिकांश विभेदैनैव चित्र भान्वादिष्वुग्र प्रतापत्वं [illegible] त्युग्र महिम्न कोऽपि

तदा तन्मूलाधिष्ठाने अनंतोग्र प्रतापाधिकरण के स्थातुं विना तदीयान् के
स्थातुं न शक्नोति । तदा तन्मूलाधिष्ठाने "आदित्यानामहं विष्णुः ज्योतिषां रविरंशुमान् । मरीचिर्म-
समर्था भवेयुरतउक्तं भगवता
रुतामस्मि नक्षत्राणामहं शशी" इत्यनेन विभूति परत्वातेविश्वरुपोउदाहृता । विभूतेरंशांशि-
कत्वस्याति प्राचुर्यात्तेषामुग्र प्रतापादैर्वास्तवत्वं निर्णेतुं ब्रह्मादयोप्यशक्ता संति । तदासा-
क्षाद्भगवन्मुखारविंद फल भक्ति मार्गाब्ज मार्तंडोग्र प्रतापोऽनंतरुपः स्वरुपात्मकत्वेन लीलात्मक-
त्वेन तद्वर्णयितुं कः शक्तो भविता । न कोऽपीत्यर्थः । तदीयानां तदनुभवाध्यासाधिक्यदेशे
तदात्मकत्वादिंद्रियैरंतःकरणै र्विषयै र्वा तेपि ततेजीयसो वेदितव्यास्तएव तदुग्र प्रतापाग्नि संनि-
धौस्थातुमर्हाज्ञातव्यास्त एव स्वतंत्रा स्त एव स्वैरं चरंति भगवत्स्वरुपानुभवातिरिक्त धर्म समु-
दायाति क्रमण क्रियायां तदितराणांत्वसह्य तापो यस्य तत्तापस्य परमानंदरुपात्मकस्य तेजसोऽ-
नंतरुपात्वात् अन्येषां तन्नैकटयं अपि दुर्लभं कुतः संबधोऽपीत्यर्थः ॥ ननु पूर्वोक्त भावसंपत्ति
विशिष्टानामेव तत्संनिधौं स्थातुं तदनुभवितुमधिकारो निरुपणादन्येषां तत्संबंधोऽपिनेति
निश्चयादिदानींतनेषु तद्भाव सम्पत्ति अति दुर्लभतमा परमोत्कटा भावात् सेवाद्यनुकूल पुष्टि भक्ति
मार्गीयक्रियातत्परेषुष्वपि तत्फल दानं तत्तेजः स्वभावात्, कदाचिदेतत्सेवा भाव तत्परेषु
भक्तेष्वपि भवति वा भाव एव निर्णयः कर्तव्यः इति चेत् । सत्यं । यद्यपि तत्तेजस उग्रप्रभावं
विचिन्त्यैवेयं तवोक्तिः तथाप्यत्रास्माभिस्तस्यैव समाधानं क्रियते । साक्षादक्षरातीतः ब्रह्मांडातीतः
शब्दातीतः वेदातीतः पुरुषोत्तम प्राकट्येऽपि साक्षादप्रत्यक्ष विषयातिमात्रकस्य प्रत्यक्षातिमात्रक
विषयो व्रजेऽभूत् । तत्रापि मुखारविंद फल भक्तिमार्गाब्ज मार्तंडस्यानंतोग्र प्रताप महिम्नः संनिवे-
रपि तथैव प्राचुर्यत्वमजनि तत्र तत्संनिधौ स्थातुं तदनुभवामृत रसपानकर्तुं व्रजजना एव शक्ता
आशन् । नान्ये गोपादयस्तेषां यथाधिकारपरत्वेन स्थित्यनुभवादीनां व्यवस्थावगंतव्या नाधिक-
तरं । अंगीकृतौ समर्याद मार्ग स्थितेराग्रहेति नियमात् वस्तुतस्तत्कृपयैव तत्स्वरुपानुभवादेः
साक्षात्स्वरुपानुभवज फल संबंधोनंतानंद परमानंद विशिष्टस्तत्कृपापूर्ण प्रमेय बलस्याप्य-
नवधिकत्वादनंतानंद परमानंदात्मकत्वात्तद्दान सामर्थ्यात्तद्भाव संपत्ति मत्भ्योऽत्तिरिक्तेषु तद्भाव-
संपत्ति रहितेष्वपि तत् कृपा विषय प्राचुर्यात्तत्संबंध समवाय तत्क्षण एव विधायकात्समया-
कारण संसिद्धौ तथात्वदाने तत्कृपा पूर्ण प्रमेय बलस्यैवाचिन्त्य शक्तिमत्स्वरुप परं भावनियंत
निश्चय परामर्शांतरीयाध्यास व्यवहार व्यासंग संगतौ । अत उक्तं निबंधे तत्वदीपके भगव-
दीयत्वं द्विविधं यत्र भगवान्स्वार्थं करोति तत्र साधनानपेक्षा "अन्ये तु साधनेनैव भगवति"
इत्यादिनापि । मदुक्त भावार्थ एव विमर्षणीयो भवति तत्कृपा पूर्ण बलवतां नान्येषां भगवान्
स्वार्थं करोतीत्युक्त्या स्वस्यार्थस्य तस्मिन् मूलदैवी जीवे कश्चनाधिकारिणाधारभूत तत्समवा-
यित्वेन मूल संबंधो वर्तत एव तत्र स्व कृपा पूर्ण प्रमये बलेनैव तदतिरिक्तानि साधनानि
अति क्रमणता पूर्वोक्त प्रकारेण फलमनंतानंद परमानंदानुभव घणीभूतं प्रयच्छतीति भावः ।
अत उक्तं "अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिः" अनुग्रहस्य नियामकत्वं पुष्टिमार्गे
एव निरुपणात् तदतिरिक्ते मार्गे तन्मार्गे स्थितेष्वपि तन्मूल संबंधाभावात् तत्कृपा पूर्ण
प्रमेय बलस्याप्यभावान्न तादृकफलं अनंतानंद रुपं तत्संनिधौ स्थिति र्वा ॥ ननु यद्यपि
भक्तातिरिक्तेपु तत्तेजसः असह्यत्वमुक्तं तथापि तेजसः स्वभावात्कदाचिद्भक्तेष्वप्यसह्यत्वं
भविष्यतीत्याशंका निरासायाग्रिम नामाहुः "वाक्सीधु पूरिताशेष सेवकः" इति ॥ वाक्सी-
धुना वचनामृतेनानंतत्वादनंत भावामृत रस मिश्रितेन बाह्याभ्यंतर भेदेन पूरिताः अशेषाः
पद्मनाभदासादयोंतरंग स्व सेवकाः पूर्णकृपा रस पात्राः येन सः वचनानां पीयूषत्वोक्त्या
तद्भक्तानां सर्वेन्द्रिय बाह्याभ्यंतरयोः सुख जनकत्वं शुद्ध परामर्शाध्यास मनोरथांत रुपाधिष्ठान-
त्वं प्रकृतिः प्राकृत प्रपंचाविद्या निवर्तकत्वं च ज्ञापितमिति भक्तानां पूर्वोक्त तेजोऽनुग्रत्वा-

शंका निरासायोक्त " वाक्सीधु पूरिताशेष सेवक " इति ॥ यद्वा साक्षाद्भगवन्मुखारविंदाधिष्ठातृत्वेन वाक्पतित्वेन वचनं मधुरं प्रकटयति, वा भाषणादिभिर्यद्वाक्य जनितो विलासायनंताशयो मर्मोत्पादक स्तस्य या ऊर्मयो बाह्याभ्यंतर योरुदूर्ण मेधमान स्व भाव शीलास्ताभिरास्फालितानां बहिरांतरयोः स्वगत मर्माधि वितन्वंत्यो व्रजवर घोषरत्न सीमन्तिनीनां तथैव कुर्वंति तद्भक्तिमार्गाब्ज मार्तंडोग्र प्रतापस्य निखिलत्वमनिशं भ्रशं सेवातत्परा स्ता स्तथैव तद् वाक्सीधुना पूरिता अभवन् । प्रतिक्षणेषु रहो रमण समय विशेषेणार्थं भवंति च । ता अपि सेवा कोटि विषय मध्यगाति सेवकांग भूता एवावयेयाः श्रीमत्स्वामिनीनां सौंदर्य साकाराखिल रूपं बिभ्रंत्यो निरुपधि स्व स्नेहानिर्वचनीय भाव विषयमेव सूचयन्त्यो रमण पुरुषोत्तमः श्रीमत्स्वामिनीनां कंदर्प रूपो नटवर वपु स्तदग्रे समर्पयंती स्वांतरावस्थितं तद्भोग्यत्वेन तद्रमणार्हं सामाग्र्यादिकमिति हेतो स्ताः अपि तदनुरोधेन सेवा भावांग भूता स्तास्तथैव स्व वाक्सीधुना विविध भावामृत रस जलधि स्वभाववता पूरिताः करोतीति भावः॥ अत उक्तं पितृ चरणैः " वाक्सीधु पूरिताशेष सेवकः " इति ॥१५॥

एवं इदानींतनेषु पद्मनाभदासादि सेवकेषु किंच मूल लीला मध्यगातिषु भक्तेष्वपि वचनामृत रसपूर्णे नात्यंतार्द्रत्वं बहिरंगागितं उक्त्वा श्रीभागवतार्थं निरुपकैः वचनामृतैः फल प्रकरणीय भाव संप्रदायाशयाभिभूतैरपीदानींतनानां स्व प्राकट्य हेत्वभिव्यंजकानां तथैवार्द्रार्द्री करणत्व ज्ञापनायाहुः ।

श्रीभागवतपीयूषसमुद्रमथनक्षमः ॥
तत्सारभूतरासस्त्रीभावपूरितविग्रहः ॥१६॥

वचनामृतैरपि सेवकानां सर्व ताप निवारकत्व ज्ञापनायाहुः "श्रीभागवत पीयूष समुद्र मथन क्षमः" इति श्रीभागवते फल प्रकरणीय रुपो यः पीयूष समुद्रः विविध भाव रसामृत समुद्र स्तस्य मथने सारोद्धारार्थं मालोडने क्षमः समर्थ इत्यर्थः । समग्र श्रीभागवतस्य पीयूष समुद्र कथनाभिप्राय संदर्भे एवं प्रति भाति आयात्यपि चैवम् । तस्य द्वादशांग रुपत्वात्तदवयवात्मकत्वात्तन्मध्ये नरकादीनां स्थिति निरुपणत्वात् तदालोडनविधौ तत्सारोद्धारार्थांतरेऽपि तत्तत्सारोपलब्धौ तत्तत्सारस्य रासस्त्रीभाव पूरित विग्रहानुभव सौकर्य संपत्तावविनियोगात्तन्मथनस्यापि प्रयतेजनाभावाद्रास लीलैक तात्पर्य इति नामाभिप्रायाद्दहवशाद्रास लीला फल प्रकरणावधि पर्यंतमेव श्रीमद्वल्लभाग्नि मते "सदा सर्वात्मभावेन भजनीयो गोकुलेश्वर" "व्रजाधिप" इत्यभिप्राया नान्यः। भक्ति योगाखिल चरित्रवतः श्रीभागवतस्यानेक रासादि लीला भाव जलध्यात्मकत्वात्समुदायित्वेन पीयूष समुद्रत्वं, नतु द्वादशांग भूतस्य। यद्यपि श्रीमदाचार्याणां तत्रापि विवेचनाशयस्याति प्राचुर्यमस्ति तथापि स्वोपयोग्य भोग्यत्वेनैव भाव सारांश ग्रहणायैव लोक संग्रहार्थं च । नतु तज्जनित पीयुष समुद्र मालोडय तत्सार भूतेन व्यूहावतार चरित्राभिज्ञापकेन रास स्त्रीभाव पूरित विग्रह पूर्णाय । यतः पूर्णानंदस्य स्वानंद तुंदिलस्य रास लीलैक तात्पर्यस्य फल प्रकरणीयो यः पीयूष समुद्रो विविध भावामृत रस समुद्र स्तन्मथने आलोडने क्षमः इति भावार्थानुसंधानमुद्राव्यै श्रीभागवत पीयूष मथन क्षम इत्यस्य भावार्थो ग्रहणीयः परमोपपन्नः ॥ यद्वा ॥ फल प्रकरण रुपो भागवत पीयूष समुद्रः अमृत रस समुद्र स्तस्य मथने सारोद्धारार्थमालोडने क्षमः समर्थ इत्यर्थ इति मयाव्यक्ति विवृतौ प्रपंचितमस्ति ॥ तेन स्व सेवकानां फल प्रकरणीय श्रीभागवतार्थाज्ञान जनित तापोऽपि तदर्थ प्रतिपादक सुबोधिन्यादि रुप वचनामृतैरपि निवार्यत इति ज्ञापनायोक्तं

श्री भागवतपीयूषसमुद्रमथनक्षम " इति ॥ एवं पूर्व नाम्नि श्रीभागवतस्यामृतसमुद्रत्व-मुपपाद्याचार्याणांतन्मथनकर्तृत्वमुपपाद्याग्रिमनाम्नि तत्सारोद्धार कर्तृत्व ज्ञापनायाग्रिम नामाहुः " तत्सारभूतरासस्त्रीभावपूरितविग्रह " इति । अत्र रासस्त्रीभावपूरितविग्रह-स्योक्तेरयमाशयः । यथा क्षीरसमुद्रमथने क्षीरस्यामृतापेक्षया न्यूनत्वादमृतस्यैव सार-भूतत्वमुचितं तस्य स्त्री भावापेक्षया न्यूनत्वाल्लक्ष्म्या एव सार भूतत्वमुच्यते । अतः कूर्मपृष्ठभागे भगवतः कंडूयनाभिप्रायोऽमेव, त लक्ष्मी स्त्री भावांतरीय प्रकट करणायैव कंडुकाभिप्राय परामर्शे तदुपपत्तौ तदेवार्थोनुसंधेयः । कंडुकस्य तत्प्रकटनायांतरीयमर्माधि-जनकत्वात्तनुमथनेनैव तत्प्राकट्य भवनस्य सांप्रतत्वाय तथैव भगवदवतारश्चकार स्वांतरीय रहस्यं यत्तदंतरगतं स्थितं तदुद्धृतवानित्यर्थः । तन्निमितस्य मुख्यत्वात्तदितरस्य गौणत्वान्मुख्य भावार्थ एव ग्रहणीयो भवति । तस्मात् सर्वेषु शास्त्रेषु वेदादिष्वपि रहस्याखिलचरितार्थ-तायाः परमस्वात त्रिकत्वमलक्ष्यातिमात्रकत्वमेवास्ति ॥ यथा वेदाःत्रैगुण्य विषयात्मकाः ॥ नतु साक्षाद्व्रजनानंद मुखारविंद फलमार्गीयाभक्तिरसवर्धकाः प्रवर्तकाश्च । रसोवैस इत्यादिना परोक्षज्ञान विषयेऽपरोक्षवद्वदंति श्रुतयो । वस्तु विचारे क्रियमाणे तासां परोक्षाति मात्रकत्व-मेवास्ति ता अप्यनुमानादिकं कुर्वंति स इत्युक्तार्थे एवानुमानादि संप्रदायस्याभिव्यक्ति र्भवति । तस्मात्ताभ्योऽपि रसात्मक ब्रह्मणो भगवतो यद्रहस्यं गुह्याद्गुह्यतरमिन्द्रियमनों-गोचरातिमात्रकं सर्वाँज्ञातलील तत्तु भिन्नमेवास्ति । अतो वेदेषु त्रैगुण्यात्मकत्वं भगवतोक्तं । " त्रैगुण्य विषयावेदाः निस्त्रैगुण्यो भवार्जुन " इत्युक्तत्वात् । वेदानां त्रैगुण्य विषयात्मकानां प्रवृत्तेः परावृत्तिं स्पष्टयन् । तज्जन्येभ्य उपद्रवोद्रेकेभ्यो विमोचयित्वा तद्भिन्नं स्व-रहस्यादिकमुपदिशति परंतु तस्मिंस्तत्समवायित्वस्यासंभवात्कथं सगतिः तद्बलदज्ञानाभावे परमेष्ठिनोपि तदितरानु संधानजमोहसंभवाद्वत्सहरणादिषु स्फूर्तौ तदेवावगम्यते । रसात्मक ब्रह्मणो यद्रहस्यं तत्तु सोनजानाति । नतत्प्रकटितेषुवेदेष्वपि तद्रहस्यमस्ति । उक्तं च तथैव भगवता " त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयते । ते पुण्य मासाद्य सुरेन्द्रलोकंमश्नंति दिव्यान दिवि देव भोगान् ॥ ते तं भुक्त्वास्वर्गलोकंविशालं क्षीणे पुण्ये मर्त्यलोकं विशंति । एवं त्रयी धर्ममनु प्रपन्न । गतागतं कामकामालभंते ॥ " इत्यादिना भगवता वेदानां त्रैगुण्य विषय पर्यवसायि फलकत्वं प्रदर्शितं । तं प्रदर्शयंस्तत्तो विमोचयन् स्वरुपानुभवमेवनित्याभियुक्तत्वं योग क्षेमत्वं पर्युपासत्वं अनन्यचिंतनत्वं परम कृपयोपदिशति ।

" अनन्याश्चितयंत्तो मां ये जना पर्युपास्सते ।
तेषां नित्याभियुक्तानां योग क्षेमं वहाम्यहम् ॥ "

इत्यादिना त्रैगुण्यवेदविषयान् विनुदन् स्व स्वरुपानुभवं भजनजन्यं नित्याभियुक्तमेव प्रदर्शितवान् । अग्रेऽपि स्व भजनातिरिक्तं यन्निखिलं तं निंद्यति ॥

" येऽप्यन्य देवता भक्ता यजंते श्रद्धयान्विताः "
" तेऽपि मामेव कौन्तेय यजंत्यविधि पूर्वकम्॥ "
" अहंहि सर्व यज्ञानां भोक्ता च प्रभुरेव च "
" नतु मामभिजानंति तत्वेनात श्च्यवंतिते ॥ "

इत्यादिनापि स्वातिरिक्तान्य भजनजन्यं निःसारं फलं विनुदन् स्व भजन संसिद्धरेव सर्वोत्कृष्टत्वं प्रदर्शितवान्। अग्रेपि तदेव स्पष्टयति ॥

" यान्ति देवव्रतादेवान् पितॄन् यान्ति पितृव्रताः
भूतानियान्ति भूतेज्या यान्ति मद्याजिनोऽपिमाम्"

इत्यादिना ॥

तस्मात् किं वेदेषु किं पुराणादिषु यद्रहस्यं तत्तु तेभ्यो भिन्नमेवास्ति न तद्गतानुभव परामर्शस्य सर्वत्र तदनुभवाधिकारशून्य जनेषु प्रवृत्तिरस्ति तस्य भगवदनुग्रहैक वेद्यत्वाद्भगवदनुग्रहैक लभ्यत्वात । प्रकटित साक्षाद्भगवन्मुखारविंद फल वियोगाग्निभक्तिमार्गेऽपि मुख्य भजनपरा अनन्य भजनपरा व्यभिचाराव्यभिचार स्पष्टकाः प्रदर्शका परिनिष्ठाः स्वस्व मूलपीठिकां भजनानंद ब्रह्मानंदरुपां प्रदर्शयन्तः कियंतः सन्ति प्रभुचरणानां कुलेऽपि तत्र तेषां तत्तत्क्रिया-चरणप्रवृत्तेरेव तत्तदुपासनाग्रहादेदर्शनात्तौ तत्तद्भावानुभवाध्यासाधिकम् अभिज्ञापयितुं तत्क्रियैव परिचायिका भवति यथा गोपीनाथेन वेदाध्ययनेनात्यभिनिवेश संसर्गं प्रसंगात्स्व मूल पीठिकामेवावलंब्य यज्ञादिकं कृतं तत्तुतत्फलमुद्दिश्यैव सुरेन्द्रलोक भोगाशयं ग्रहीत्वैव नतु साक्षाद्भजनानंद रमण पुरुषोत्तम परमतत्वं श्रीमद्यशोदोत्संग लालित फल प्राप्त्यर्थं तत्प्राप्तिः सातु तत्साधनैः "नाहं वेदैर्न तपसा न दानेन चेज्यया" इत्यादि वाक्यैः दुरापास्ता किंच साक्षात मुखारविंदफल वल्लभाग्रेः सेव्य स्वरूपं तद्भाव विशिष्ट व्रजस्वरुपांतर प्रतिष्ठित-मुत्सृज्य यज्ञादिषु प्रवृत्तिः सातु स्वाधिष्टानमधिष्टायैव स्वप्रवृत्तिः वितनोति । यद्यपि सोम याज्ञिकत्वं परंपराप्राप्ति परामर्शोऽस्ति तद्धर्माचरत्वं च तेषां तथात्वस्यात्यभिनिवेशात्तत्फल पर्यवसायित्वात्तत्करणमुचितमेव । साक्षाद्भजनानंद पुरुषोत्तमः अक्षरातीतः वेदातीतः शब्दातीतः ब्रह्मांडातीतः श्रीमत्स्वामिनीनां निगूढ भावः पुष्टिभक्तिमार्गेतत्वं: कृष्ण पदार्थोनान्योऽस्पर्श स्तन्मुखाग्नि वंशे आगत्य यज्ञादिकं कर्तव्यमुचितं भवति वा फलप्रदं भवति वा भविष्यति न कदापीत्यर्थः ॥ तर्हि तत्कर्तृणां यज्ञादि क्रियाग्रह प्राचुर्य विषये किमनुसंधेयं तत्र वदामः ॥ "त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते । ते पुण्यमासाद्य सुरेन्द्रलोकमश्नंति दिव्यान् दिविदेव भोगान् । ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणेपुण्येमर्त्य लोकं विशंति । एवं त्रयीधर्ममनुप्रपन्ना गतागतंकामकामा लभंते ॥" इत्यादिभि र्भगवद्वा-क्यैरसद्यज्ञादि ज्ञान विषय पराणां तत्क्रिया पराणां तत्फलाग्रहजुषाणानामेव तत्पुण्यक्षीणे सत्येय तद्वासनयाऽस्मिन् कुले परंपरा तत्कर्तॄणां गतागत भेदयोः स्वरुपं निसंदिग्ध प्रकारेणासंशयो भूत्वावेहि । "शुचीनां श्रीमतां गेहे योग भ्रष्टोभिजायते" इत्यादिनापि तदेवाव-गन्तव्यं ॥ "अन्याश्रयो न कर्तव्यः सर्वथाबाधकस्तु सः । ब्रह्मास्त्र चातकौ भाव्यौ प्राप्तं सेवेत निर्ममः" इत्यादिनान्याश्रयवर्जन पूर्वकं साक्षाद्भजनानंद पुरुषोत्तम भजनाश्रयं समर्थयतां "सदा सर्वात्मभावेन भजनीयो गोकुलेश्वर" इति करपल्लवेन संदर्शयतामाचार्य चरणानां आज्ञामुल्लंध्य यदि वैदिकं मुखारविन्दफल वियोगाग्नि कुले आगतैस्तदुक्तकर्मज्ञान परिनिष्ठैः क्रियते तदातु स्पष्टमेवाग्निकुलजनित माहात्म्यादिकमुत्सृज्यमंतव्यमेव भवत्येते याज्ञिकाः परंपरा तज्ज्ञानक्रियापरायणा एवेति ॥ ननु व्रजवरघोष रत्न सीमंतिनीनां भाव भावनानुसंधानाध्यास साधनपरा अवधेयाः । अत एव मयाऽत्याग्रहेणैव लिखितमस्ति । वंश पदं पुत्र परत्वं ज्ञेयं । किंचास्मिन् कुले आगत्य साक्षाद्भजनानंद पुरुषोत्तम मुखारविंद फल वियोगाग्निज दैन्यंप्राप्य तद्विरहाग्निमयो भविष्यति वास्ति तयोरपि तथात्वे कथं नाग्नित्वं वल्लभकुलत्वं मंतव्यं । किंतु मंतव्य मेव । अत एव मयाग्रदर्शनेपरिलक्षं विधाय वल्लभाग्न्यं-गीकृत जीवानां विरहानुभवाग्न्यपरिपाकदशान्वितानां पुनरावृत्ति जुषतां शुभायै चात्यंत क्षेमायैव निवेदन पद्धति निरुपितास्ति । क्वचित इत्यवकलय्यैव तदभजन परेषु याज्ञिकेषुवा तद्भजन परेषु भजनानंद रमण पुरुषोत्तम स्वरुपानुभवातिरिक्तासत्तया चरण संबंध गंध

मात्र रहितेषुतदीयै र्य त् कर्तव्यं त त्कर्तव्यं नात्राधिकतरवक्तव्यं । तस्मादाश्रयस्तु वस्तु विचारे क्रियामाणे आदौ साक्षाद्व्रजनानंद पुरुषोत्तम मुखारविंद फल वल्लभाग्निरेव कर्तव्यस्ततदाश्रय साधन पूर्ण प्रमेय बलेनैवानायासेनैव साक्षादुत्तर श्रृंगार स्थायिभावैकरुप पुरुषोत्तम स्वरुप भावनायां विविधलीला परिकरादिभि र्विविधसंचितविचित्रभावसंपत्तिभिर्ग हनागति रुपायां स्वातंत्रिकत्वं । तदनुभवितुं सर्व भवनरुपमीयादेव ततो लीला भावनायामपि तथैव च । तस्मादन्याश्रयादिकमुत्सृज्य स एव कर्तव्य आश्रयो येन तत्फलमार्गीया साधनादयः सर्वे आश्रिता भवेयुः । अत उक्तं । "सर्वदा सर्व भावेन भजनीयो व्रजाधिपः" इति । सव देति सावधानतया श्रवणार्थमभिमुखीकरणेन हे अन्तःकरण हे भक्त इति वा संबोध्य सर्वदा सर्वस्मिन्काले सर्वात्मभावेन व्रजाधिपो भजनीय इत्यन्वयः । सर्वदेति कालाऽपरिच्छेद उक्तः । सर्वात्मभावेन सर्वेषु बाह्याभ्यन्तर भेदेन पदार्थेषु भगवत्स्वरुपानुभवानुकूलेषु यो तापः आत्मभाव भगवत्संबंधित्व भावनं तेनेत्यर्थः । अत एव व्रत्रासुरेणापि तथा प्रार्थितं । "त्वन्मा-ययात्मात्मजदार गेहेष्वासक्त चित्तस्य न नाथ भूयादिति" अथवा सर्वभाव सर्वात्म भावः तेन तथेत्यर्थः । इति तु अस्मत्प्रभुचरणैरणु भाष्ये तृतीयाध्याय तृतीय चरणे प्रपंचितमस्ति तदीयैस्तत्रैव परिभावनीयः । तदधिकरणरुपास्तु व्रजे रासमंडल मंडनाएवेति न तद्भावा-धिष्टानान्वेषण प्रयासः । तस्मात्सर्व भावेन व्रजाधिपस्यैव सर्वोत्कर्षत्वेन भजनत्वं श्रीमद्वल्ल-भाग्निभिः उपदिश्यते ननु तदतिरिक्तस्य तदतिरिक्त भजनमभिमतमस्माकं ॥ किंच यो यत्र संलग्नः स तस्मादन्यत्र गतिं कर्तुमशक्तोस्ति । स्वस्य तद्भजन परिनिष्ठत्वात् । तद्भजन पर्यव-सायिफलनिश्चयात् चेत् । कश्चन संसर्गतोऽस्ति शुद्ध मूल दैवजीवः स्वरुपांतर भजने संलग्नस्तं श्रुतानुरागाग्निरेव साक्षाद्व्रजानानंद रुपानुभवे एव प्रवर्तयति । तस्य मूल शुद्धसंबंध प्राचुर्यात् । यत उक्तं "स्व भावास्य अन्यथा भावः नैव शक्यः कथंचन अतस्त्रिविध जीवेषु त्रिविधा भगवत्कृतिः" । इति प्रवाहिको मर्यादी न भवेत् । मर्यादी प्रवाहिको न भवेत् । पुष्टि भाववान् मर्यादिको न भवत् । मर्यादिको भक्तिमार्गीयत्वेन पुष्टि र्न भवेत् । पुष्टि प्रावाहिकः पुष्टि मर्यादिको न भवेत् । पुष्टि मर्यादिकः पुष्टि र्न भवेत् । पुष्टिः पुष्टि पुष्टिर्न भवेत् । इति परस्पर विरोधि धर्माचरणाति मात्रकत्वं निश्चित्यैवोक्तं श्रीमदाचार्य चरणैः "स्वभावस्या-न्यथा भावः नैव शक्यः कदाचन" । अत स्त्रिविध जीवेषु त्रिविधा भगवत्कृतिरिति । तद्विरोधं परिहर्तुं भगवानपि न समर्थः कुतोऽन्या इति ज्ञापनायोक्तं "अत स्त्रिविध जीवेषु त्रिविधा भगवत्कृतिः" तस्मादेतादृशान्प्रत्याग्रहोऽपि न कार्यो । ये यथामां प्रपद्यन्ते तांस्तथैव भजाम्यहं" इत्यादिना भगवतै तेषां व्यवस्था समाहितास्ति । इदानीं प्रस्तुतमनुसरामः । यथा प्रकर्षेण फल प्रकरणीयस्य भागवतस्य प्रथक्त्वेनैव सर्वाज्ञात लीलावत्वेन समूह रसात्मक रासाद्यनेक लीला रसरुपत्वेन, स्त्रीपुंभाव रत्नाकर संवृतेन पीयूषसमुद्रत्वमस्ति तथात्वे तथा तन्मथन सामर्थ्यमन्यत्र न पश्यंत एवोक्तवंतः "श्रीभागवतपीयूषसमुद्रमथनक्षमः" इति । तन्मथन सामर्थ्यं श्रीमत्प्रभुचरणेष्वेव निश्चितवंतोऽग्निकुमारास्तत्सारोद्धारार्थ मालोडने क्षम इत्यनेन तत्साराखिल सामग्रीषु वस्तु विचारे क्रियमाणे स्वस्यैवाग्नि स्वरुपात्मकत्वात्स्वरुप लीलानुभवादेः सारसमुच्चाविष्कारा कृतिमतीशारीरीलीलास्यैव तदनभिव्यक्तिं प्रदर्शयति । "यावद्बहिः स्थितोवन्हिः प्रकटो वा विशेन्नहि । तावन्नलीयते सर्वमिति कृष्ण समुधिमः" इत्यारभ्य कृष्णो-ऽयं सदानंद उग्दतोग्निः सर्वत्राग्नि लीनं जनयितुं शक्नोतीत्यंतेन कृष्णः श्रीमत्स्वामिनीनां निगूढ भावास्तासां परमानिर्वचनीय यद् दुःखाग्नि नीलज्वालोद्भूतस्तस्योद्यिमश्च केवल विरहाग्निनैवांतरीय स्वरुपानुभवादिकं स्थायित्वेन संपादनाशयस्तथैनकृतवानिति यावत । यत स्तदुद्यिम विशिष्टा शारीरीलीला । किंच रस समूहात्मक रसाद्यनेक लीलाया अपि तद्भग-

वदुद्यमाग्नित्वं संपादनविषयसंसर्ग नैसर्ग्यादग्न्यात्मकत्वमनुक्त सिद्धमेवावगंतव्यं । तत्स-मुदायत्वेन फल प्रकरणीये श्रीभागवते पीयूष समुद्रे भावरत्नाकराणां निरवधित्वेन तत्सारांग-भूतत्वेन तेषु स्वांग सांगत्वं विनिश्चित्य स्वस्यैव स्वरुपात्मक सारसमुदायस्योद्धृतौ तथैवा-लोडन विधिना क्षम इति सर्वमनवद्यं ॥

यतः पूर्वनाम्नि श्रीभागवतस्योक्त प्रकारेणामृतरस समुद्रत्वं स्व स्वरुप विरहाग्न्यात्म-कत्वेन विविधभावाकाराकृतिमत्वमुपपाद्याचार्याणां तन्मथन कर्तृत्वमुपपाद्याग्रिम नाम्नि तत्सारोद्धार कर्तृत्वज्ञानायाग्रिमनामाहुः। "तत्सारभूतरासस्त्रीभावपूरितविग्रह" इति। तच्छब्दः परामर्श मध्य-पाती परामर्शोद्रेकैव प्रवर्तयंस्तेषां प्रसादरुपाशक्तिः स्त्रीभवति भावार्थ संदर्भे ग्रहीत्वा व्रजति। तत्र श्रीमत्स्वामिनीनां शुद्ध स्त्रीत्वं भगवद्भावना स्त्रीलिंग विशिष्टं भगवद्रमणि निखिलांगाधिकरण भूतं प्रदश्य ततः प्रत्येकैक वत्र्मान्तरे स्वामिनी भावहृत द्वितीयो कृष्ण पदार्थरुपः पुंभावो निधाय तेभ्य एवादात् । तत्प्रासंगिकं कुंडल अलक्षाति मात्रक भाव संदर्भे ग्रहीत्वा नयति तं प्रदश्य श्रीमत्स्वामिनी स्त्रीत्वं कृष्ण निगूढ भावेन पुंभावत्वं द्वयोस्तासुसंपादितयोः प्रादुर्भाव शारीरी लीला विशिष्टे श्रीभागवत पीयूषसमुद्रे एवाभूत समुदायित्वेन भाव रत्नाकर रुपत्वेन । अत एव तन्मथने तदाप्तौ तद् भाव पूरित विग्रहत्वोक्त्या साक्षाद्भगवन्मुखारविंद फल वल्लभ वियोगाग्ने स्तदखिल करणत्वं तद्भाव पूर्णत्वं तद्भाव संपादकत्वं स्व विग्रह नैसर्ग्यादेव तद्भावा पूरितत्वमनुक्त सिद्धमे-वास्ति नत्वौपचारिकत्वप्रसंगात् ॥ तासां श्रुतिरुनाणां गौड़ देशस्थानां च युगल भाव विशिष्टानां तदंतरीय स्थापितयोर्द्वयोः स्त्रीपुंभावयोः संप्रदाय संप्रवृत्तेः परिशोधार्थायैव तद्भावाक्रांतस्य रसभाव-रत्ना करांचितस्य श्रीभागवन फल प्रकरणीयस्यालोडने क्षम इत्यत्रायं भावः। क्षमत्वेनान्येषु तन्मथन क्षमत्वस्यात्यंता भावं सूचयंतोऽग्नि कुमारा आचचक्षिरे । "श्रीभागवतपीयूषसमुद्रमथनक्षमः इति । वस्तुतः स्व विग्रहेणैव रासाद्यनेक लीलावयव धारिणा यद्रासस्त्रीषु स्त्रीभावस्थापनं पूर्वोक्त प्रकारेण कृतं तस्य भावसारत्वेन तदाखिलत्वं स्त्रीभावसारधनीभूतं श्रीभागवत पीयूष-समुद्रांतरगतं तमुद्धृत्य सूक्ष्मेन विग्रहेनैव तासां स्त्रीभावसारसमुदायेन तद्भाव पूर्णे पूर्णत्वं करोति इत्यभिप्रेत्यैवोक्तं पितृचरणैः "तस्सारभूतरासस्त्रीभावपूरितविग्रहः" इति । यद्वा रासस्त्रीणां भाव समुदायसारं प्रतिकारणता मुखारविंद फल वल्लभाग्नि अनुभवोद्रेकस्यैव नान्यस्य इति कृत्वा भावोद्भवे भाव संदर्भे तस्यैव स्व मुखारविंद फल सार समुच्चयमुद्धृत्य तेनैव पूर्णत्वेन पूर्णोऽभवदिति भावः ॥ अन्यदपि । क्षीरसमुद्रमथने क्षीरस्यामृतापेक्षयान्यून-त्वादमृतस्यैवसारभूतत्वमुचितं । अत्र तु समुद्रस्यैवामृतमयत्वाल्लोके तत उत्कृष्ट पदार्थस्या-भावादेतद्भावातिरिक्तस्यापि सारत्वं न संभवतीति मुक्त्यपेक्षयाप्यधिकस्य भोक्तृत्वमाचार्या-णामेव नान्यस्यापीतिज्ञापनायोक्तं तत्सार भूत रासस्त्रीभावस्य सारत्वमुक्तं । यथा क्षीर समुद्रोद्धृतसारस्य भोक्तारो देवा एव नान्ये तथैव तत्सारस्य स्त्रीत्यादि अत्र विग्रहस्य भाव-पूरितत्व कथनात्तदखिलाग्न्यवयवातिरिक्त संबंधमात्ररहितद्योतनाय पूरितत्व कथनोक्तिः । एवं यथा देवानामंतरेवामृतपूर्तिर्नबाह्यतः तथा न प्रकृते, आचार्याणां तु बाह्याभ्यंतरभेदेनैतद्भाव पूरितत्वमेव नान्य भावसंबंधोऽपीति ज्ञापनायोक्तं रासस्त्रीभाव पूरितविग्रह इति ॥ ॥१६॥

ननु पूर्वोक्त प्रकारेणाचार्याणां विग्रहस्य बाह्याभ्यंतरभेदेन कथमेतद्भाव पूर्णत्वं एव । रासस्त्री-भाव पूरितत्वं अन्य संबंधरहितत्वं अनवच्छिन्नत्वेन सोपपत्तिकं अव्यक्तं व्यक्तकरणे किं प्रयोजनं इत्याशंका निरासायाहुः

सान्निध्यमात्रदत्तश्रीकृष्णप्रेमा विमुक्तिदः ॥

रासलीलैकतात्पर्यः कृपयैतत्कथाप्रदः ॥१७॥

पूर्वोक्ताखिल भावसंपत्ति पूरितविग्रहसन्निधौ यथा उचिततरं भवति भवेद्वा भविता तथैव पितृचरणैरुक्तं "सान्निध्यमात्रदत्तश्रीकृष्णप्रेम" इति स्वस्य सन्निधेः प्रेममुक्तत्वावच्छिन्नात्मकत्वात् श्रीभागवत फल प्रकरणीय पीयूष सुधानिर्यास संशिक समुद्र तत्सार समुदायात्मकत्वात्तत्स्व-भावत एव सान्निध्यमात्रेणैव निखिलेष्ट दातृत्वेन सर्वलक्षणसम्पन्नत्वेन समुदायांगभूत द्विदलात्मक प्रेमाखिल भावसंपत्तिं ददातीति सान्निध्यमात्रेणैव दत्तं श्रीकृष्णप्रेम येन सः ॥ यदि पूर्वोक्त प्रकार विशिष्ट भाव संपत्या बाह्याभ्यंतर भेदेन पूर्णत्वं न स्यात्तदा स्वकीयानां स्व सान्निध्य मात्रेणैव श्रीकृष्णप्रेमदान सामर्थ्यं न स्यात् यतो मुखारविंदफल वल्लभाग्रे निसर्गत एव यथातत्पूर्णत्वं तथैव प्रेमदान सामर्थ्यात्तथैव ददातीति यावत् । किंच ये याभि र्भावसाराखिलचरित्रवतीभिर्भाव-संपत्तिभिः पूर्णः स एव दातुं शक्नोति नत्वपूर्णोऽपीति । प्रेमदाने श्रीकृष्णपदोपादानान्मुख्य भक्तस्य परमसौंदर्याग्न्युद्भूतं यत्प्रेम तत्प्रेमोचितं मुखारविंद भगवतस्तदधिष्ठातृत्वस्य स्वस्ययतः स्व सानिध्यमात्रेणैवदत्तं युगलप्रेम येन सः ॥ तत्राप्यनेक लीला विशिष्टं अनेक भावसंदर्भविशिष्टं परम फलप्रदं सर्वेषु भावेषु स्वरुप लीलात्मकेषु प्रवेश सहकारि तद्ददातीति यावत् ॥ ननु तादृक् प्रेम दाने को हेतुरिति शंका निरासाय तद्धेतु भूतं नामाहुः "विमुक्तिदः" विशिष्टां साक्षाद्भगवन्मुखारविंदफलवियोगाग्नि दैन्य संप्रदाय पुष्टि भक्तिमार्गीयां रासयनेक लीलाब्धि महावर्तैरावृतां परमांतरीयत्वमेव प्रापिकां मुक्तिं ददातीति विमुक्तिदः ॥ किंच विविधलीला विशिष्टं त्रितयात्मकफल वल्लभाग्नि संपृक्तं यत्स्वरुपं भगवतस्तत्साक्षात्संबंधस्तदनुभवानुरुपा निरोध संज्ञिकाविमुक्तिस्तां ददातीति विमुक्तिदः । पुष्टि भक्तिमार्गे उक्त भगवतो रसात्मक ब्रह्मणोऽनुभव साक्षात्संबंधस्यैव मुक्तित्व कथनस्यायमभिप्रायः । यथा मर्यादामार्गे सायुज्यादि मुक्तेरेव फलत्वं तथास्मिन्पुष्टि भक्तिमार्गे साक्षात् त्रितयात्मकस्य शुद्ध रसात्मक ब्रह्मणो भगव-तोऽनुभवफलसंबंधस्यैव फलं न सायुज्यादेरिति ज्ञापनाय मुक्तित्वकथनं । अपिच । रासस्त्रीभाव पूरित विग्रह सन्निधेरेवनैश्चिंत्यतएव विमुक्तिदानं भवति तदीयेभ्यः पुनरन्यथा भावस्यासंभवात् तदेक स्थायिभावत्वादुक्तं विमुक्तिपदं ॥ एवं स्वमार्गीय फलस्य सर्व मार्गीय फलाधिक्यं तस्यच सर्वालौकिक प्रमाणसिद्धत्व ज्ञापनायाग्रिमनामाहुः "रासलीलैक तात्पर्य" इति । पूर्व नाम्नि विमुक्तिदत्वमुक्तमग्रिम नाम्नि रासलीलैकतात्पर्य इत्यनेन स्व सान्निध्यमात्र निसर्गतो मुक्तिदानं पूर्वोक्त भाव संपत्ति चरितार्थ विशिष्ट रासमंडल मंड-नानामपि विप्रयोगाग्न्यात्मकायां शारीरीलीलायां विप्रयोगाग्न्यात्मकत्वेनैवमध्यपातात् फल-वियोगमार्गीया या विमुक्ते स्वरुपमभिभावनीय । साक्षाद्रसात्मक भजनानंद मुखारविंद फल भक्तिमार्गीय सर्वाधिक्य सर्वोत्कर्षत्वाद्रासलीलायामेव विमुक्तिस्थानात । अंतर्गृह रुधानामपि तन्मार्गीयत्वेनैव विमुक्तेः स्वरुपं विजानीयात् । यद्यपि संयोग रसानुभवांतर एव विमुक्ता जातास्तथापि स्वयंप्रभुर्वल्लभाग्न्यनुभवोपरिलक्ष्यं विधाय ततोनिष्कास्य संयोगांगपरत्वेनैव ताभिरेवसहविरहतीत्यनेन विमुक्तः स्वरुपं रासाद्यनेक लीला मध्यपातित्वेनैव ज्ञापितं । अत एव स्वस्य मुखारविंदफल वियोगाग्न्यात्मकत्वात् फलरुपत्वात् फलप्रकरणीयत्वेनैव फलरुपत्वं संपादके स्वस्य तात्पर्यं अपि तस्मिन्नेव ननु द्वादशांगभूते तदितरे फलरुपस्य वल्लभाग्ने स्तात्पर्य मस्तीति ज्ञापनायोक्तं "रासलीलैकतात्पर्य" इति ॥ यद्वा मूल भगवत आविर्भाव साक्षात्कारेण पूर्णानंद भजनानंदरुपेण योगमायया सह नंदगृहेएवजातः स्वपरिकरस्य ब्रह्मानंदानुभवेउपद्रवोपशमनायाक्षरब्रह्मणः स्वदर्शनादि चिरकालजनिता तदार्ते स्वथात्व संपादनाय चैतदहेतोः । तदाविर्भावस्य रासलीला पर्यंतमेव फलरुपत्वं निश्चित्य स्वकीयान् ब्रह्मानंदमनुभावयित्वा "ब्रह्मानंदात्समुद्धृत्य" भजनानंदानुभवं कारयित्वा ततो भगवत्प्रि यांस्तद्ब्रह्मानंदानुभवमनिच्छंत्यः पुष्टि भक्तिमार्गीयविमुक्तिदेन रसात्मकेन वासुदेवेनानुमोदिता

स्व रसात्मके ब्रह्म धामन्येवानयत् । अक्षर ब्रह्मणस्तात्पर्यं तमेव स्वयमायापटांतरेणैवानुभवं कारयित्वातमोवर्णरूपांतिरिष्करणीं स्वयं योगमाया प्रक्षेपितवती । अत "तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरे" रित्यादिना श्रीशुकेनापि तत्सामयिकं भवनं स्पष्टमेव ज्ञापितमस्ति । श्रीमदाचार्य चरणैरपि नतु भगवदीया अंधकारे प्रविशंतीत्यादिना । तमसिके प्रविशति ये संभूतिमुपासते ते एव । नतु भगवदीया अत उक्तं नतु भगवदीया अंधकारे प्रविशंति । अतोऽत्र दृष्टव्यं मध्याकाशस्थः परमालौकिको भगवन्मनरुपः श्रीमत्स्वामिनीनां वदने ह्यनुभवान्युद्भूतो चंद्रविराजते । तत्तलभागेऽधकारागमनस्यासंभवात्प्रकृतेस्तमसो दर्शनात सर्वाः रासमंडल मंडनास्तत्तमसोहरेः सकाशादेव निवृत्ता जाता किमभिसंधेयं यतो मया प्रदर्शिताया तम आवरण रुपा निरिष्करणी योगमाययैव प्रक्षेपिता तत्समयेऽक्षर ब्रह्म प्रभृतीनां भावाग्निरुपायां शारीरीलीलायां अनधिकारं संवीक्ष्य तत्तथैव कृतवतीत्यत्रायमाशयः । यतो रसालीला पर्यंत निरवधित्वेन स्वकीयान् स्वस्वामिनी भावाधिकरण भूतान् सर्वात्मभाव क्रियासात्मकान् सम्यक्प्रकारेणानुभवं कारयित्वा तैः परमांतरं भक्तैः सहैव स्व तिरोभावं प्रदर्शयंतौ व्रजे नित्यत्वं विरहाग्न्यादर्शकतृत्वं संपाद्य स्वधामनि रसात्मक ब्रह्मणि ययुरिति समुदाय वृत्तांतमवकलय्यैव पितृचरणाचचक्षिरे "रासलीलैकतात्पर्यः" इति ॥ "ब्रह्मानंदात्समुद्धृत्य भजनानंदयोजने" इत्यादि वाक्यैरपि तदेवावगम्यते । "ततेधामनि" इत्यादिश्रुतिभिः वैकुण्ठादप्यस्याधिकं सहजं स्थापनमस्तीति तथा प्रसिद्धो वेद इति तत्रैवागमनमुचितं आवश्यक मित्यर्थः ॥ यथा राजान्यत्रकार्यं कृत्वा स्वराजधानीमेवगच्छति तथा ज्ञापनाय संबोधनमित्यादि सुबोधिन्यां त्रिंशत्तमाध्याये श्रीमत्प्रभुचरणैः प्रपंचितमस्ति तल्लेखाखिल भावार्थसमुदाय हृदयारुढादपि यन्मयापूर्वं भावार्थ समुदाय हृद्गतं रहस्यं गुह्याद्गुह्यतरं सर्वेभ्यः पुष्टि भक्तिमार्गीयभ्योऽग्निकुमार वंशेभ्योऽप्यज्ञातलीलं प्रदर्शितं तदेव सिद्ध्यति । ऋतेऽग्निकुमारान् तद्वृत्तांत निखिलमभिज्ञातुं केचिदपि न शेकुः । अतः स्तैरेवोक्तं "रासलीलैकतात्पर्यः" इति ॥ ननु रास लीलानंतरं भगवान् परमनंद पूर्णब्रह्म विरुद्धधर्माश्रयादिभिर्विवर्जितो निर्दोष पूर्ण विग्रहः स्वपरिकर साहित्येन स्वतिरोभावं प्रदर्शयन् व्रजे व्रजवर घोषरत्नसीमंतिनीनां भावना भावाग्नि रुपेण स्व स्थितिं प्रदर्शयन् तस्मिं स्तथैव वैशिष्ट्यं विशिष्टत्वं संपादयन् स्व तिरोभावममिव्यंजयन्स्व धामन्येवजगाम पश्चात् अक्रूर आगत्य प्रभूणां नेतव्यार्थे स्वरुप व्यवस्था कथं विभावनीया । आकृत्यातु तादृशमेवोक्तो प्रतिभाति । वेषाभरणभाषणादिभिश्च तदा तत्स्वरुपं पृथक्त्वेन कथं विभाव्यं भवतीतिचेत् सत्यं । आकृतावेव सादृश्यात् सर्वे पुष्टि भक्तिमार्गीयाः अस्मदीयाः परम मोहंगतास्तैनैव मोहेन साक्षाद् व्रज संबंधिनी लीलानां मथुरादारभ्यद्वारिका पर्यंत लीलानामभिधानत्वेनैवाभेदमेनिरे । अत एव तत्सादृश्ये एव मोहंययुः । आकृतौ सादृश्यं प्रतिकारणताक्षरब्रह्मणो भावनाया भगवद्दर्शनात्यंत्युद्रेकाद्भगवदाकृतित्वस्य संभवात्तद्भावनानुरुपे लोकवेदप्रसिद्ध पुरुषोत्तमेऽपि तदाकृतिमत्वमप्यनुक्त सिद्धं विजानीयात् । तेन योगमाया कृतास्पर्शं योगान्तरे भगवत् सन्निधौ स्थितावपिद्वयोर्दर्शयोराभिमुख्यं तद्वदितियावत् । यथा दर्शयो सन्मुखे परस्परयोः प्रभामंडलयोरभेद दर्शनात्तैरैक्याभात्वस्य प्रतीतिस्तथैवाकृत्योरप्यैक्यत्वात्तदर्शनेन केषांचिद्भेददर्शनात्तिरपिनाभूत् । यतो लोकवेदप्रसिद्धाकृतिरननुभवतो दुर्बलान् साक्षात् श्रीमत्स्वामिनीनां निगूढ भाव कृष्ण स्वरुपानुभावाद्विमुखानेव व्यामोहयितुं शक्तास्ति नतु तदनुभवपराणां । वस्तुतः एतद्भाव समुदाय मणिगण निभृतामेतद्गत भावना मंजूषा तामुद्गारयैवानभिव्यक्तयभिभाविका भावरत्ना वलय एव मया प्रकटिताः सन्ति । तदीयैरपि तथैव हृदि संनिविश्यैव सर्वेभ्योऽज्ञातत्वेन तथैव संरक्षणीया नतु यत्र कुत्र प्रकटनीया तस्मात्स्वयं साक्षात् शुद्ध ब्रह्म स्वसौदर्य साकाराखिलसामग्री साहित्येन प्रादुर्भूय

प्रकृतिः प्राकृत जन्यैंकादशवर्षपर्यंतं पूर्वोक्त प्रकारेण व्यूहसाहित्येन लोकवेद प्रसिद्ध पुरुषोत्तमेन सह रासलीला पर्यंतमेव स्वस्वरुपात्मिकांलीलां कृतवान् । तदनंतरं लोकवेद प्रसिद्धः पुरुषोत्तमः स्वधामनि गन्तुयाजिगिमिषा तामधिष्टान रुपामधिष्ठायैंवाक्रूरेण सार्द्धं मधुपुरीं जगाम । स्वयं रसात्मक रमणप्रियः स्वपरिकरैः साकं स्वरसात्मके ब्रह्मधामन्येव ययुरित्यभिप्रत्यैव पितृचरणाउक्तवंतो "रासलीलैक तात्पर्यः" इति ॥ एतत् सर्वं कतृत्वं मुखारविंदफल वल्लभाग्नेरेव नान्यस्यत्यभिसंधायैव तन्नाम्न्येव तत् समुच्चयार्थं प्रद्योतयंत अवादिषुः स्वयमग्निकुमाराः "रासलीलैक तात्पर्यः" इति । रासलीलायामेव एकं केवलं तात्पर्यं यस्यसः । एतेन साक्षात्संबंधस्यैव सर्वाधिक फलत्वं ज्ञापितं । यदि मुक्तेरेवैतदपेक्षयाधिकं फलत्वं भवेत्तदा भगवानेतन्मार्गीय फलानुभवंकारयित्वा पश्चान्मुक्तिंदद्यात् । तस्या अक्षरात्मकत्वात् तस्मादुद्धृत्य रसात्मक भजनानंद भजन भक्तिमार्गीयानां इदमेवेन्द्रियवतां फलमोक्षोनचान्यथा इत्याकूत रहस्य विशिष्टामेव दत्तवान् । तस्मादेतस्यैव फलप्रकरणीय स्व शारीरी रुपकस्य फलत्वं नान्यस्येति भावः । यस्मादेतत्फल निरुपणादेवास्य प्रकरणस्य फल प्रकरणत्वं नतु प्रकारान्तरेणाप्येतत्सर्वं हृदिकृत्वाचार्यैरेतस्यैव फलत्वं निरुपितं नान्यस्येति ज्ञापनायोक्तं "रासलीलैक तात्पर्यः" इति ॥

एवं पूर्वोक्त फलस्यैव सर्वाधिक फलत्वमुपपाद्य प्रकारान्तरेणापि फलत्व प्रतिपादकत्वेहेतुभूतंनामांतरमाहुः "कृपयैतत्कथाप्रद" इति । फल प्रकरणीय श्रीभागवतपीयूषसमुद्र रुपस्तत्सारभूत रासस्त्रीभाव पूरित विग्रहः सर्वलक्षण सम्पन्नस्तत्स्वरुप भावाखिल गहन गतिरुपा तत्स्वरुपांतर चारणी या कृपा तथैंव तत्कथा राससंबंधिनी तां प्रकर्षेण ददातीति निखिलार्थानुभवं कारयतीति तथेत्यर्थः । यद्यपि कथायाः शब्दात्मकत्वात्तस्याः कथनमेवदानं नतु तद्वत्वेन तथापि तद्दाने प्रकर्षं कथनात्तत्र च कृपायाएवहेतुत्वकथनाद्यत्रैतत्कथा व्यतिरेकेण कथनं तत्रकथनमेवनदानं यत्र कृपा पूर्वक कथनं तत्रैव दानं ॥ दाने प्रशब्दोपादानात्तदर्थानुभवत्वं ज्ञापितं इत्यत आहुः "कृपयैतत्कथाप्रद" इति । यद्वा । यथाफल प्रकरणीयस्य पूर्वोक्त प्रकारेण त्रितयात्मकत्वेन वल्लभाग्नखिलावयवात्मकाच्छारीरी लीलात्मकत्वादत्यंतालक्ष लीलात्मकत्वात्फल रुपत्वमस्ति तदनुभवादेव दानंतुविना तत्कृपांकथंलभेत् तत्कृपयैवलभ्यत्वादुक्तं "कृपयैतत्कथाप्रदः" इति । यद्यपि कथायाः शब्दात्मकत्वमस्ति । तथापि शब्दब्रह्माग्निरुपत्वात् तस्यापि शब्दानुरागाग्नि विद्यमानेऽपि दृष्टानुरागाग्नेः सांप्रतित्वाच्छ्रोतॄणामपि साक्षात्तल्लीला विशिष्टस्य रसात्मकब्रह्मणो भगवतोऽनुभवादिकं प्रत्यक्षातिमात्रकत्वेनैव भवति । तच्छ्रुत्वा यथा परीक्षितस्य तद्गानाग्निना दाहोऽभूत् । दाहकत्वं तदैवस्यात् । यदि यस्यकथा तस्य तस्याहदर्शनास्तौं तस्यानुभवाध्यास प्राचुर्यादेव तस्यानुभवादे स्त्रितयात्मक वल्लभाग्न्यात्मकत्वस्यातिव्याप्तेस्तस्य तथात्व करण एव चरितार्थतायां विनियोगात् । तस्मात शब्दब्रह्मनादब्रह्म स्वरुपयोः परोक्षाग्न्यतिमात्रकत्वात् तदनुध्यानावस्थाध्यास व्यासंग संपर्कत एव प्रत्यक्षानुभवाग्नेरतिसांप्रतत्वमनुक्त सिद्धमस्ति परंतुतयोर्मार्गः प्राप्याधीनोऽस्ति तत्किं तापाग्न्यात्मकयोः शब्दनादब्रह्म स्वरुपयोस्त्रितयाग्न्यामकत्वात्तयोः मार्गयोरपि तथात्वान्मार्गीयानामपि तथात्वमेवापेक्षते । तदैव समानाधिकरणत्वात्प्राप्य प्राप्तोरैक्यभावस्वभावात् यथा प्रत्यक्ष स्वरुपानुभवादेरनुभव आनंद संदोह सुखानुभूत्याप्ति तदपेक्षयाधिकार एव भवति ज्ञापनायोक्तं "कृपयैतत्कथाप्रदः" इति ॥ १७ ॥

यद्यपि रासलीला प्रदानत्वकथनेनैव तत्प्रतिपाद्योभयसंयोग विप्रयोग रसानुभवस्य श्रोतॄणां तदीयानां तद्रस भावनया रसानुभवः सिध्यति तथापि केवलो विप्रयोगभावः भावान्तर रहितः

स्वतंत्रतयाँ तत्तदवस्था भेदेन विकलत्वं अस्वास्थ्य मूर्छा पुनर्जागरण तादात्म्येनयत् किंचित् स्वास्थ्यं प्रलापइत्यादि अवस्था भेदेनानुभव सिद्धयर्थं कथनत्व ज्ञापनायोक्त "विरहानुभवैकार्थ" सर्वत्यागोपदेशक इति ।

विरहानुभवैकार्थत्यागोपदेशकः
भक्त्याचारोपदेष्टा च कर्ममार्गप्रवर्तकः ॥१८॥

पूर्वं नाम्नि कृपयैव तत्कथाप्रदत्वे यद्यपि कथायाः शब्दब्रह्माग्न्यात्मकत्वात्तयोः संयोग विप्रयोगात्मकयोः रसयोरनुभवाप्तिस्तच्छ्रोतृणां सिद्धयति तथापि शब्दब्रह्माधिष्ठानाश्रयाश्रिते-नैवतस्य गुणगानात्मकत्वात्तत्प्रत्यक्षानुभवाभावाद्वस्तुतः पारतांत्रिकत्वमेवास्ति तदुपजीविनांसा-क्षाद्भगवदतिरिक्तेस्थातुं शक्तानामेव तत्कथामृतं तेषां तथैव विर्वाहकं भवति । यतो यदि शब्द ब्रह्माग्निमनुभूय साक्षाददर्शनात्युद्रेकोपजायतेऽन्यभावांतरगतिराहित्येन तदा तदवस्थैव तत्परिचा-यिका भवतिखलु। शब्द ब्रह्माग्न्यात्मका कथा श्रवणानंतरं तच्छ्रोतृणां कीदृश्यवस्था भवति । विकलत्वस्याखिल सामग्री विशिष्टा । अस्वास्थ्यं मूर्छापुनर्जागरणं तादात्म्यं प्रलापादेरवस्था-भेदेन साक्षादनुभवासिद्धयंति तत्तदवस्था भेद प्रदर्शकां तेषांमीदृश्यवस्थायां जातायां सत्यां स्वयं तदस्वास्थ्य मूर्छादिधर्म धर्मी रुपप्रवर्तको मुखारविंदफल वल्लाभाग्निरुपोपदिशति सर्वत्यागंकृत्वा व्रजवर रत्नघोष सीमंतिनीभिरेव यथा साक्षात्स्वरुपानुभवातिरिक्तान् सर्वान् मनोगतान् धर्मान् संत्यज्य पुष्टिफलमार्गीय चतुर्थाश्रम धर्माचरणत्वं प्रदर्शितं तथैव यूयमपि कुरुध्वं । तादृशत्या-गाभावे तत्स्वरुपानुभवस्याप्यभाव इति विज्ञायैव तूर्णमेव भवद्भिरपि तन्मार्गीयस्त्याग एव स्वीकरणीयो भवति । एतत्स्वयं अग्निकुमाराः स्वपितृचरणानां निर्देशाखिल चरित्रं विज्ञायैव कथयंति । "विरहानुभवैकार्थसर्वत्यागोपदेशक" इति । तत्साक्षात्स्वरुपानुभवो रासाद्यनेक लीलाविशिष्टो देहादि सर्वत्यागाभावे कदापि न भविष्यतीति व्रजवर घोषरत्न सीमंतिनीनां सर्वत्यागपूर्वक चतुर्थाश्रमाचरण विद्यमान प्रमेय प्रमाणमानात् । तेन हेतुना विरहानुभव एव एकः केवलः अर्थः प्रयोजनंतन्निमित्तको यः सर्वत्यागः तदुपदेश कर्तेत्यर्थः । यद्यपि रास-लीलायांद्विधांग भूतस्य विप्रयोगाग्न्यनुभवादे र्भावसंपत्तिरस्ति तथापि तस्यां भजनव्यभिचारि दोषातिशयत्वस्य संमेलनेन न भवति पुष्टिभक्तिमार्गीयत्वेय कैवल्यं । तत्र "कस्याश्चित्पूतनायंत्या" इति लीलाभिनिवेश भावकथनात् तृतीयाध्यायेऽपि आद्यश्लोकेऽनौचित्य प्रतिपादनाद्द्वितीया-दिश्लोकैरुपालंभप्रार्थनादिभाव निरुपणान्न केवलत्वं । तत्रैवोपदेशपदोपादानस्यसम्यग्विनियोग दर्शनादुपदेश भावार्थः तदीयैः ग्रहणीयोस्ति । स्वरुपांतरोऽनुभव भावान्तरेऽभिनिवेशात्पूतना-द्यनुकरण विधानतस्तत्स्वरुपेऽनुभजन व्यभिचारि दोषावृतविधौ तत्तदनुकरणात्मकान् चतुर्मूर्ति भगवानंग भूतान् धर्मान्बहिर्मनोगतान् सर्वान् त्यागं कारयित्वोपदिशंति स्वयंमुखारविंदफल वल्लभाग्नयश्चेत् तत्साक्षान्मुखारविंदफल रसामृतं विविध रसघनीभूतं पानकर्तुं युष्माकं तज्जनितो विरहानुग्न्युद्रेको वर्तते तदा एतान् तत्स्वरुपानुभवेतरान् सर्वान्धर्मांस्त्यजन्तु तदैव विशेषेण रहो विरहस्तदनुभवार्थे एव गच्छन्तु । "दुर्लभोऽयंपरित्याग" परित्यागाभावे तदुपलन्धिरपि दुर्लभतरा विज्ञेया भवति भवतीभिः पुनस्ता अपि तदुपदेश निर्देशाशयं गृहीत्वा तथैव चक्रुः श्रीमद्गोवर्द्धनादि लीलानुकरणादिकं कृतवत्यस्तत्रापि तत्साक्षात्काराभावे साधन सम्पत्तिरेव निर्णीता श्रीमद्वल्लभाग्निभिरेव । "नहिसाधन संपत्या हरिस्तुष्यति कर्हिचित् । भक्तानां दैन्यमेवैकं हरितोषण साधनम्" इत्यादिना तद्दैन्यं कृष्णायाः पुलिने कृष्णायाः प्रसादतः यदैव प्राप्तवत्यस्तदैव शुद्धविरहाग्नि यज्ञफलरुपेण तासामेवाविर्भूतः स्वयं साक्षान्मन्मथमन्मथ रुपेण श्रीमत्स्वामिनी

कंदर्पवपुषा । तदखिल वृत्तान्तमभिप्रेत्यैवाग्निकुमारा अवादिषुः "विरहानुभवैकार्थं सर्वत्यागोपदेशक" इति ॥ श्रीमद्वल्लभाग्नेः मुखारविंदफल भक्तिमार्गाब्ज मार्तंडस्य विरहानुभवैकार्थं सर्वत्यागोपदेशकस्य सर्वधर्मान्परित्यज्यमां केवलं श्रीस्वामिनीभाव विषयं प्राप्नुहीत्याग्रह नैसर्ग्यकत्वाद्विरहानुभवैकार्थे तथाविधित्वेनैवोपदेशको भवतीति भावः ॥ तस्मात् प्रकटित शुद्ध पुष्टिभक्तिमार्गांतरवर्तिनो भगवदीया अपि तथैव कुर्युः तत्स्वरुपानुभव साक्षात् फलसंबंधार्थं तल्लीलामध्यपातित्वस्यसिद्धयर्थं, परन्तु वस्तु विचारे क्रियमाणे परम दुरापास्तातद्विरहानुभवजभावसम्पत्तिरेतेषांमनुभव सौकर्यं संपत्तावगमनविधौ तस्याः अत एवोक्तं प्रभुभिरपि "दुर्लभोऽयं परित्यागः प्रेम्णा सिद्धयति नान्यथा" इति प्रेम्णः प्रत्यक्षानुभव विषयातिमात्रकत्वात्तद्रूपत्वात्तद्रुपत्वात्तस्याप्युपलब्धे दुर्घटत्वमेव दृश्यते । अत एव प्रभुभिरपि तत्प्रेम्णोपलब्धि सिद्धये तद्विरहानुभवाग्ने नानात्वांनुभवाप्ते साक्षात्कारप्रदर्शनीय सेवामार्गः प्रकटितः सः कीदृशः तापात्माग्निर्ज्वालात्मको व्रजेन्द्रसद्मनोजिराखिल लीलानुकरणाविष्कारहेतुभूतः प्रतिक्षणेष्वभिनवतर तरुणानंदरुपेण विरहानुभवाग्न्युत्पादको स्वास्थ्यातिमात्रकस्तस्मिन् यद्यागत्य दैवी जीवास्तथैवन कुर्युः तदा स्वास्थ्यार्थं यत्फलरुप संपादकंसेव्यस्वरुप साधनादिकं तत्तथैवास्वास्थ्यादिकं प्रदर्शयेत् तथैव रुपं विरहाग्न्यवयवधारि प्रदर्शयेत् तदैव श्रीमदाचार्य चरणाशयस्तस्याभिनंदनं भवति । नोचेत्तदेवास्वास्थ्यौधमे स्वास्थ्य संपादकं भवति तस्य साक्षाद्भगवन्मुखाग्न्यनुभवसांग संगतेरभावात् । अत एवदृश्यतेऽपि तथैव श्रीमग्दोवर्धनाधीश स्वरुपे तस्मिन् साक्षान्मुखारविंद फल वल्लभाग्निनां निगूढ भावः । साक्षात् कृष्ण पदार्थ रुपोस्ति ॥ श्रीमव्द्रजेन्द्रकुमार स्वरुपाकल्पापेक्षया कृतावपि तत्सन्निभत्वस्यातिमात्रकत्वमस्ति । रुपेण वेशाभरणैरपिच ॥ तथात्व विधिवत्वे तथैव विरहाग्न्यनुभवोत्पादका विधाय तदितरानुभवांतरे प्रदेशादेस्तिरोधायकाभाव सम्पत्तिरस्त्येव परन्तु केषांचित्सासंलग्ना । न केषां चिदित्यर्थः । यतो स्वास्थ्योद्यमाखिल चरितार्थे स्वास्थ्याखिलं चरितार्थताया एव संमेलनान्नतद्विरहानुपर्यवसान पर्यवसायित्वं परिपाकाग्नावभवत् । तत्स्वास्थ्योद्रेकावरोधादेषा दैवीसृष्टिः ॥ साक्षाद्व्रजनानंद स्वरुपे श्रीमत् स्वामिनीनां निगूढ भावे कोटिकंदर्प रुपेण व्रजति स्वास्थ्यहेतु समुदायमधिष्टायैव साक्षाद्भगवन्मुखारविंद फल रसास्वादज़ निरोधाग्निसुख संदोहमुत्सृज्य प्रमाद्यति । सएव सेवाफल साधनाध्यासः साध्यफलाध्यवसरे प्रतिबंधमेव करोति । किंचेदंमे लिखनं लिखनं न भवति नास्ति किंतु केवल साक्षाद्भगवन्मुखारविंद फल त्रियात्मक वल्लभाग्निमयत्वमेव । स्वरुपतः साधनतोऽनुभवतः । सेवा कथा कीर्तनतोऽनान्य धर्मतो ज्ञान विज्ञानतः क्रियाविधि विशेषतो भगवत् स्वरुपानुभवादिभिर्विविधसंचित विचित्रभावावयवधारि यद्यप्येतच्छ्रुत्वा धारणाध्यासे तग्दत हार्दंन व्रजेयुः । शुद्धपुष्टि भक्तिमार्गीयाः तदा किं श्रवणेन श्रुत्वा श्रुत्वास्वास्थ्यतामेव व्रजंति । सेव्य रुपंप्रत्यहं नूतन श्रृंगारालंकृतं दृष्ट्वा दृष्ट्वापि स्वास्थ्यतामेवानुसरंति । तेन किं विरहानुभवैकोयोऽर्थः स सेत्स्यति न कदापीत्यर्थः । तस्मादियमत्यनौचिती यया विरहानुभवजन्यो योऽर्थो न सिद्धयेत चैत् श्रुत्वा, दृष्ट्वा दृष्ट्वा कृत्वा कृत्वा प्रत्यहं विरहाग्नेः प्रवृद्धि प्रकारं प्रति दिनानुभावानुरुपेण हविषा समेधयंतो विरहानुभवानुरुपतामेव गच्छेयु स्ततस्तेषामवस्थैवतत्कृतावदानत्वस्य निखिलत्व परिचायिका भविष्यति, तद्विरहानुभव संप्रदाय विधिवतां मुख्य फलानुभवाभिमुखे गमनविधौ स्वयं साक्षाद्व्रजनानंद पुरुषोत्तमोऽपि प्रतिबंधकर्तुं न शक्यते । तदा तदितरे बाधांकर्तुं कथं शेकुः । अतस्तद्विरहानुभव शुद्धाध्यास संप्रदाय विविधतामवस्थाविकार हेतुभूतां रुपकतां निरुप्यंते । "विकलत्वं तथाऽस्वास्थ्यं प्रकृतिः प्राकृतं न स्थाहि । ज्ञान गुणाश्च तस्यैवं वर्तमानस्य बाधकाः" ॥ "बहिश्चेत् प्रकटः स्वात्मा वह्निवत्प्रविशेद्यदि । तदैव सकलोबंधो नाशमेति न चान्यथा ॥ गुणास्तु संगराहित्यात् जीवनार्थं भवन्ति हि ।

भगवान्फलरूपत्वान्नात्र बाधक इष्यते ॥ स्वास्थ्यवाक्यं न कर्तव्यं दयालुर्न विरुद्ध्यते । दुर्लभोऽयं परित्यागः प्रेम्णा सिद्ध्यति नान्यथा ।" इत्यादिना तद्विरहानुभवैकार्थवतामेव याऽवस्था तन्निरोधभर भावितैव प्रदर्शिता श्रीमद्वल्लभाग्निभिः ॥ "अत्रारंभे न नाशःस्याद्दृष्टांतस्याप्यभावतः स्वास्थ्यहेतोः परित्यागाद्बाधः केनास्य संभवेत् ॥" "हरिरत्र न शक्नोति कर्तुं बाधा कुतोऽपरे" । इत्यादि । लेखार्थस्त्वयं । यदि सेवाफल साधन संपत्याकेवलं साक्षाच्छ्रीमुखावलोकनात्युद्रेकाधिक्यात्तदार्तिभरभावितास्युस्तदैव विरहानुभवैकार्थिन उच्यंते । ननु सेवाफल साधन संपत्यैव तद्विरहानुभवोद्रेक संप्रदायो भवद्भिर्निरुपिते वस्तु विचारे क्रियमाणे विरहानुभवोद्भवाधिष्ठाने साक्षाद्व्रजेन्द्रकुमार सुकुमार सौन्दर्यादेः साक्षादनुभव विषयएव तदितरे तद्विरहानुभव प्रवृत्तेरसंभावितत्वात्कथं तत्प्रवृत्तिःस्यादितिचेत्सत्यं । वक्ष्यमाण परित्यागस्य पूर्ण पुष्टिभक्तिमार्गीय मुखारविंदफल वल्लभाग्नवयवधारी । तदनुभव भाव संपत्यंतर भावित्वेन तत्पूर्वदशायां भगवत्स्वपसेवनस्यावश्यकत्वात् तत्र साक्षादनुभव भावसंपत्ति पूर्वक श्रीमुखदर्शनं । तदंगस्पर्श जनित तत्साक्षात्संगाभिलाषाया अति प्राचुर्यत्वेन विरहाग्न्युद्रेकाधिक्येन तच्छांत्यभाव जनितत्वात्संगम पूर्वकं विरहस्यानुभवः निरंतरं तद्भावापत्तिस्तदर्थं तत्सिद्ध्यर्थमित्यर्थः । तेनैव पूर्ण विरहात्मकेन साधनेन पूर्ण भाववानधिकारीति ज्ञापितं । तादृशस्य सर्वात्मभाववद्भक्तसंबंधिरासलीला विचारस्यावश्यकत्वेन तस्याश्चपरमफलत्वेन स्वस्यापि तन्मार्गीयत्वेन तत्फलोत्कटाभिलाषया सांप्रतं तत्पूर्वाभावात्तत्पूर्वकस्याधुनादर्शनाद्यभावाद्विरहस्यावश्यकत्वं तदागृह स्थितौ गृहस्थितानां तद्भाव वैजात्यात्तत्संगस्यैतद्भावनाशकत्वेन तदनुभवाभावाद्गृहत्यागावश्यकत्वं । तस्मादेवसेवासाधन करणं यत्तत्तु साक्षाद्व्रजनानंदस्वरुपानुभवजविरहानुभवैकार्थमेवनान्य प्रयोजनं । तदनंतर विकलत्वं वैक्लव्यं । तथा तच्चतदेवास्वास्थ्यं । कुत्रापि स्वास्थ्याभावः । प्रकृतिः विप्रयोगाग्न्यनुभवस्य प्रकृतिः स्वाभाविकोधर्मः प्राकृतं लौकिकं न भवति । हियुक्तश्चायमर्थः । तथास्वास्थ्यमिति तत्साक्षादनुभवातिरिक्ते यन्निखिलंज्ञानं गुणादयस्तन्मार्गीया एव मनः स्वास्थ्यहेतुरुपाः तादृशस्य पूर्ण सेव्य स्वरुपानुभवद्वारा विरहानुभवैकार्थभाव संपत्तिमत एवं प्रवर्तमानस्य पूर्वोक्त वैक्लव्यादिभाव पूर्त्यवस्थितस्य बाधकाः साक्षाद्व्रजेन्द्रकुमार सुकुमार सौंदर्यानुभवेतर संज्ञिकाः गुणगानादयो रसानुभवैक सेवा पूर्वोक्त भावनाशकत्वात् प्रतिबंधका एव विज्ञेयाः । तस्मात्तत्स्वरुपानुभवातिरिक्ते कदापि किंचिदपि भावांतरीयंयत्किंचिदपि तं नानुसरेत् । तत्रहेतुस्तस्मिन् स्वरुपानुभव विषयिणां विषय पदार्थाः सन्त्येव । तत्स्वरुपानुभवस्य निखिल माहात्म्य ज्ञान क्रियशक्तिमत्वात् । अंश कलात्मकानां अवताराणां लोकवेद प्रथित पुरुषोत्तमस्यापिच मूलाधिष्ठानत्वात् । अनंतकोटि ब्रह्माण्डेश्वरस्यैश्वरत्वात् । अनंतत्वाद्ब्रह्मादीनां मनननिदिध्यासनादिना दुर्ज्ञेयत्वादक्षरातीतत्वाच्छब्दातीतत्वाद्वेदातीतत्वादिति तु माहात्म्य बुद्ध्यापि सर्वेषां तद्बोधकानां पदार्थाणां स्थित्यधिष्ठानं तेषामाश्रयणमस्मिन् स्वरुप एवास्ति । किंच शुद्धाशुद्ध द्विधाशृंगार रस प्रकरणीयत्वेनाप्यस्मिन्नेव स्वरुपे त्रितयात्मकं स्वरुपं वल्लभाग्नेः भक्तिमार्गाब्ज मार्तंडस्य विरमणं साक्षाद्व्रजनानंद रमण प्रिय मुखमंडले एव । प्रतिक्षणेषु नव नव भाव चरित्र चरितार्थैरेवरासाद्यनैक लीलावयवत्वं सौन्दर्यलावण्य एव सान्द्रत्वं भावैर्गहनागति रुपत्वं निरवधित्वेन परिकर परिवृतत्वं पुष्टिभक्तिमार्गीयत्वात धर्मार्थकामादेः कटाक्षलव संस्पर्शमात्रेण दानौदार्यत्वं । स्वविरहात्मकेन क्षणेनैव मुक्त्यधिक सर्वोत्कृष्टफल मूललीला मध्यपातीत्वं नित्यरुपमखंड दानसामर्थ्यं श्रुतिभिर्विमृग्य प्रयासादिभिरपि अगोचरत्वं । श्रीमद्वल्लभाग्नीनां शुद्ध समाध्यध्यास मध्यगफलत्वं व्रजवर घोषरत्नसीमंतिनीनाम "क्षण्वतांफलमिद" मितितत्वतो निश्चयंतीनां स्वरुपतः साधनतः फलतश्च सर्वस्वरुपत्वं । तं विहाय तदितरे भावांतरे व्यभिचार

दोषेण साकं "सदासर्वात्मभावेन भजनीयो व्रजाधिप" इत्याज्ञां अनन्य भजनाग्रह स्पष्टका-मुल्लंध्य भजन करणे प्रयोजनाभावे कथं प्रवृत्तिःस्यात् वा करोति । अतः साक्षाद्व्रजेन्द्रकुमार स्वरुपानुभवाधिष्ठिता प्रवृत्तिरन्य भजनमधिष्टाय तस्या अक्षरात्मकत्वादक्षर भजनपरिनिष्ठा विज्ञेया तेषांतद्भजन पराणां तथात्वादक्षर भजनपरिनिष्ठानां ज्ञानक्रियायोग एव कारणं साक्षाद्भजनानंद स्वरुपानुभवफलसंबंधस्य मुख्यकारण निषेध पूर्वकसाधनतः फलतश्चचतुर्व-र्गादिभिश्च साक्षाद्भजनानंद स्वरुपानुभव फल संबंध एव मुख्य कारणम् । अत एवोक्तं श्रीमदाचार्य चरणैः "प्रामाणमार्गाद्भिन्नोहि भक्तिमार्गो निरुप्यते" इति । तस्मात्प्रमाण प्रमेयमार्गयोः परस्परयोः भजन साधनफल तारतम्य न विरोधातिमात्रकत्वमस्ति । तन्मार्गीयाः केनचित् योगेन भगव-द्भक्तसंग प्रभावेन तथाचास्मिन् पुष्टि भक्तिमार्गे आगमिष्यंति वा आयांति परंतु तेषामक्षरानंद भजन परिनिष्टाग्रहवशादंश कलात्मकानामवतारादीनां तद्भजन संपृक्तानां तत्तद्भजनकथा प्रसंगेषु परमोपास्य धर्मत्वेनैव संप्रवृत्ति भविष्यति । तथैव भजनानंद स्वरुपेऽपि । ननु सर्वांगेन शुद्ध सर्वात्मभावेनान्य भजन राहित्येन भावान्तर प्रवेशाभाव पूर्वकत्वातेऽस्मिन्मार्गे भजनपराः स्युर्नकदापीत्यर्थः । अत एव व्यभिचारि भजन दोषाति प्राचुर्यान्मार्गानुरोध पूर्वक सेवादिसाधन फलानुसंधान जुषाणानां तथैव प्रति फलति । अनधिष्ठितं साधनं न साध्यं साधयिष्यतीतिमानात् । अत एव फलासौ निःफलत्वातेः संदर्शनात्तदेवावेहि अत एवोक्तं मद्भक्ति युक्तस्य योगिनावै मदात्मनो न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इत्यादिना साक्षा-न्मुखारविंदफल वियोगानल मार्गीय मद्भक्तियुक्तस्य तन्मार्गीयाखिलज्ञानक्रिया विषय भावसम्प-त्तिमतस्तद्भक्तियोगेन योगिनोवैतिनिश्चयेन मदात्मनो ममानुभवाधिकरणभूतस्यानुभवोत्तर पर्यवसायि फलादीनामवसरे न वैराग्यंन वा ज्ञानं अत्यंत क्षेमसहायीभूते भवितारो न कदापीति स्वकीयान् प्रतिलक्षयति । स्वभक्तियोगेन स्वप्राप्तिः स्व भक्तियोगाग्न्यनुभावानुरुपा भक्तियोग फलमानत इति भावोभाव्यः । तस्मात्तन्मार्गीय ज्ञानवतांतु तत्फल साधकत्वादक्षरानंद पर्यव सायित्वमेव सिद्धयति नाधिक्रम् । तस्मात् पूर्वोक्त वैक्लव्यादिभाव पूर्त्यवस्थितस्य साक्षाद्भग-वत्स्वरुपानुभवादौ प्रवृत्ति विषये ज्ञानं गुणास्तद् भक्तियुक्तस्य तद्भक्तियोगेन योगिनः बाधका एव भविष्यन्ति न तत्फल साधकाः । ज्ञानस्याक्षरात्मकत्वाद्भिरोवतो वैद्य करणत्वं भक्तिमार्ग विरोधकत्वं शापदापकत्वं । गुणानां केवल भक्तिमार्गीयत्वादपिते तत्साक्षात् स्वरुपानुभवा निर्वचनीयभाव सम्पत्त्यासौ प्रतिबंधका भवन्ति । एवं सति यत्र स्वरुप गुणस्मरण प्राचुर्य विषयेऽपि फलाभावः तत्र गृहादीनां प्रतिबंधकत्वेन त्याग विलंबे फलाभाव इति किं वाच्यमिति भावः । यतस्तादृशस्यसुतरां ते ज्ञानगुणाश्चबाधकाएव भवितारो भविष्यंति च । रसानुभवे फले वा पूर्वोक्त भावनाशकत्वात्प्रतिबंधकाएव विज्ञेयाः । अत एवोक्तं संन्यास निर्णये । "विकलत्वं तथा स्वास्थ्यं प्रकृतिः प्राकृतं नहि । ज्ञानं गुणाश्च तस्यैवं वर्तमानस्य बाधकाः । सत्यलोके स्थिति र्ज्ञानात्संन्यासेन विशेषतः । भावना साधनं यत्र फलंचापि तथा भवेत्" इत्यादिनापि तादृशस्य ते ज्ञान गुणादयो बाधकत्वेनैव निरुपिताः "गुणास्त्विवति" । गुणानां धर्मरुपत्वात् साक्षा-न्मुखारविंद फलानुभवोद्भूतस्य विरहानलस्यं संगाभाव हेतुत्वेन तदतिरिक्तस्य स्वास्थ्यहेतोर भावात् कदाचित् अति तापेनाश्रयाभावा जीवनानुपपत्त्यागुणैरेव जीवन सम्पत्तिरित्यत उक्तं "जीवनार्थं भवंतिहि" । यथा "तवकथामृतं तप्तजीवनमित्यत्र" "हि" युक्तश्चायमर्थः । परमानंद विरहाग्नौ जीवनानुपपत्तौ परमानंद गुणानामेव जीवन सम्पादकत्वमुचितमित्यर्थो "हि" शब्देनद्योत्यते । तेन गुणानां यथा कथंचित् जीवन मात्र सम्पादकत्वं नतु स्वास्थ्य हेतुत्वमपि । 'तु' शब्देन संगातिरिक्त धर्मैः स्वास्थ्य शब्दोऽयावर्तितः । ननु साक्षाद्भगवन्मु-खाग्न्याचाय प्रकटित भक्तिमार्गेऽस्वास्थ्याति प्राचुर्य एव परम फल निरुपणात् पुनः श्रीमुखा-

वलोकनानंतरं तु शब्देन संगातिरिक्त धर्मैः स्वास्थ्य शब्दोऽव्यावर्तित इत्युक्त्या स्वास्थ्य विषयस्यैव प्रमाणात् कथंतन्निषेध पूर्वकस्यास्वास्थ्यादेः सुखाधायित्वं निरुप्यते । इति चेत् । सत्यं । यत् श्रीमुखावलोकनानंतरं स्वास्थ्यादिकमस्मिन्मार्गे वर्तते तस्याऽस्वास्थ्यादि मात्रक त्वात्परमफल रुपत्वात्स्वास्थ्यत्वेनमन्यामहे । नत्वस्वास्थ्याविशिष्टं स्वास्थ्यादिकं वयंमन्या महे इति न मंतव्यं । तदस्वास्थ्यापगमेऽस्मिन्फल वियोग जदैन्यमार्गे तत्फलाप्तिरेव नास्ति । न भविता । वियोगाग्न्यनुभव मार्गमर्यादाग्रहातिमानतः । तस्मात्तादृशस्य गुणादि धर्मोद्भूत स्वास्थ्यादिकं तत्फल प्राप्तौ प्रतिबंधकत्वेनैव निश्चीयते । अत्र न काचिद् अनुपपत्तिः । अत एवोक्तं "स्वास्थ्यहेतोः परित्यागात बाधः केनास्य संभवे" दिति । अस्य मुखाग्निरुपस्य तापस्य न केनापि बाधः नाश इत्यर्थः । एवं दृष्टा दृष्टोपायानां नाशकत्वाभावमुक्त्वा भगवतोऽपि नाशहेतुत्वमाशंक्य निराकुर्वंति "हरि" रिति । यद्यपि हरिः सर्वदुःखहर्त्ता तथाप्यत्र अस्मिन्मार्गे ईश्वरत्वाद् बाधां कर्तुं सर्वदुःखकर्तुं न शक्नोति । अत्रोपपत्तिः । यस्य यथास्वरुपं तस्य तथात्वेन ज्ञानमीश्वरस्यैव भगवतः अस्य भावस्य नाशहेतुभावमपि जानाति स्वस्य स्वामिनीभावाधीनत्वमपि जानाति इति स्वस्यनाशकत्वं ज्ञात्वा नप्रवर्तत इत्यत उक्तं "हरिरत्र न शक्नोति कर्तुं बाधांकुतोऽपरेति" । भगवद्धेतुक बाधाभावं कैमुतिकन्यायेन निरुप्य तदितर हेतुक बाधाभावमाहुः " कुतोऽपरे " इति । फल प्रकरणीय प्रस्तावेऽपिताभ्यो धर्माद्युपदेशं कृतवान् स्व स्वरुपानुभव साक्षात् फल संबंध भवनांतरे प्रतिबंधंकर्तुं वाचः पेशैर्यद्यप्युद्यमोऽ-भूत्तथापि तानि स्वरुपानुभवातिरिक्त विरुद्ध धर्मप्रदर्शकानि भगवद्वचनानि न मेनिरे तासामांतरे सर्वात्मभावस्य स्थायित्वात् त्रितयात्मकाग्नि संपृक्त स्वरुपानुभव पूर्ण प्रमेयबल सामर्थ्यात यत उक्तं "हरिरत्र न शक्नोति कर्तुंबाधां कुतोऽपरे" इति । किंच तासां सर्वात्मभाववतीनां आंतरीय स्थायिभावादे धैर्यादिकस्य परीक्षा ग्रहणायैव धर्माद्युपदेश व्याजंपुरःस्कृत्याशयस्तु स्वात्मानंददान पर्यवसाय्येव स्थितः स्वस्यफलात्मकत्वात् स्वरसात्मक परिकरेषु फलमेवदास्यति नतु तदवांतरीयं फलं । अत उक्तं सन्यास निर्णये "भगवान्फल रुपत्वान्नात्र बाधक इष्यते ॥ स्वास्थ्य वाक्यंन कर्तव्यं दयालुर्न विरुद्धयते ॥१३॥" इति ॥ भगवत्पदेन षड्गुणैश्वर्य सम्प-न्नस्तेगुणाः सर्वे रसात्मकाः यथा भगवतो नित्यत्वं श्रीस्वामिनी स्त्री भावात्मकत्वमस्ति तथा तन्निरोध गुणानामपि तथात्वाद्रसोवैस इति श्रुत्युक्त्या रसात्मक पुरुषोत्तम उक्तः अतोऽस्मिन्मा-र्गेस्वस्यैव फलरुपत्वाद्विविधरस भावात्मकत्वात्स्वप्राप्तौ एतद्भावस्यैव फल साधकत्वात्तद्भाव फलानुभवस्य मुखारविंदफल वियोगाग्न्यात्मकत्वात् स्वप्राप्तौ तत् फलानुभवदानाभावे स्वस्यैव तददेयत्वं तदभावसम्पादकत्व कथने स्वस्यैव फलप्राप्तौ प्रतिबंधकत्वेन स्वस्यैव फलत्वमेव न सिध्येदित्यत उक्तं "फलरुपत्वान्नात्रबाधकइष्यते" ॥ यतो भगवतः प्रभुत्वात्तु सर्वांशेनकोटिशः प्रकारेण फलदान सामर्थ्यमेव दृश्यते परन्तु विरहाग्नि परिपाक पूर्वक विरहानुभवोऽपेक्ष्यते । येन तथैव दानंस्यात् । अत्रतु फलरुप सेवादि साधनादिकं कृत्वा मुखारविंदफल वियोगाग्निरुपां कथां परम सौन्दर्य साकाराखिल चरित्रवतीं श्रुत्वा श्रुत्वा विरहाग्नेरपरिपाकत्वमेव साधयंति तत्रहेतु र्ज्ञान क्रियाभावात् यद्यच्छ्रुतं यद्यत्कृतं तत्तत्पर्यवसायिनीयावत्पर्यंत स्वयं क्रिया वह्लभाग्नि स्त्रितयात्मकानस्यात् । साक्षाद् भजनानंद कोटिकंदर्पलावण्यरुप माधुरी बहुभावनल्प कल्प विभूषिता न भवेत्तावत्पर्यंतं किं श्रुतेन किं कृतेन तत्र तथैव फलति । अत उक्तम् "क्रियातुसाधनै-रेवनमनोरथवार्तया" ॥ अत एव विरहाग्न्यनुभवोत्तरांग परिपाक पूर्ण दशावतामेव स्वयं वह्लभाग्निर्मुखारविंद फल रुपेणोपदिशति । नत्वपरिपाकापूर्ण स्वास्थ्याप्रमेय बलवतां कातराणां ॥ ननु स्वस्य फल रुपत्वात्फलदित्सायाश्चसिद्धत्वात् स्वरुपेणलीलया दर्शनेन परोक्षाभ्यांतापा-ग्न्यनुभवापगमं मा करोतु । तथापि यत्किंचित् अस्वास्थ्यं स्वयमेव वचनेन, कथं न निवारयति इतिचेत् तत्राहुः स्वास्थ्य वाक्यमिति रसात्मक पुरुषोत्तमेन भगवता तादृशं विरहानुव परिपाक

पूर्ण प्रमेय बलवत्तांप्रति यत्किंचित्स्वास्थ्य हेतुकमपि वाक्यं वचनं न कर्तव्यं न वक्तव्य-मित्यर्थः। तादृग्रूपेण स्वास्थ्य करणे वचनेन यावान् स्तापाग्निः निवर्तिष्यते तावानेव फलप्राप्तौ विलंबो भविष्यति इति ज्ञात्वा वचनेनापि स्वयं फल रुपेण स्वात्मानंद दान दित्सया स्वास्थ्यं न करोति। यदि कुर्यात् तर्हिफल विलंबे स्वयमेव हेतुः स्यादिति स्वस्यैव विरोधित्वं स्यादिति यत्किंचित्स्वास्थ्य हेतुभूतस्यापि वाक्यस्याकरणं॥ ननु यत्किंचिद्विलंब हेतुत्वे को दोष इति चेत्तत्राहुः। "दयालुः" इति। असाधारण दया समुद्रः पूर्वं दयायाः स्वरुपं मया निरुपितमस्ति। तद्दयाखिल चरित्रवान्। यदि यत्किंचिद्विलंब सहिष्णुत्वमपि चेद्भवेत तदातावद्दयांशस्यन्यूनत्वात्परम दयालुत्वं नोपपद्यतेति न तादृग्वाक्य करणं। एवं मुखारविंदफल वल्लभ वियोगाग्नि भक्तिमार्गीय संन्यासरूपं साधन फल प्रकार विचारेणोप-पाद्योपसंहरंति। "दुर्लभोऽयं परित्यागः प्रेम्णा सिद्ध्यतिनान्यथा" इति। तस्मान्मार्ग क्रियाया सम्प्रदायस्त्वयमेव क्रियते तु केवल यन्निखिल तत्सेवाफल साधन संपत्तौ प्रत्येक क्रियांगांगि-ताऽस्वास्थ्य प्रतिबोधका क्रियायां स्वास्थ्यातिमात्र परत्वादेव तदा वाच्यं। तत्फलाप्तिः केन प्राचुर्येण पूर्ण प्रमेय बलेन भविता, यत एतद्विचाराभावेन रौढिकत्वादेव सर्वेऽस्मदादयो व्रजंति। प्रति फलितमपि तथात्वेनैव भविष्यति। लौकिकवत्प्रभुः कृष्णः मनुते नैव लौकिकम्। तस्मात्स्वयं स्वतंत्र विरहाग्निरुप स्थितयात्मक वल्लभाग्नि संबृन्तस्तथात्वेनैव तथात्वमंगीकरिष्यति। न तु यस्य कस्योपरि मनोगतान् धर्मान्। इत्यभिप्रेत्यैवोक्तं पितृ चरणैः "विरहानुभवैकार्थ सर्वत्यागोपदेशकः"॥ संन्यास निर्णयेऽपि स्वेनैव प्रपंचितमस्ति "विरहानु भवार्थं तु परित्यागः प्रशस्यते। नतु श्रवणादि प्रवृत्ति सिद्ध्यर्थं। अत एवोक्तं। "श्रवणादि प्रवृत्यर्थं कर्तव्यश्चेत्सनेष्यते। सहाय संगसाध्यत्वात्साधनानांच रक्षणात॥ अभिमानान्नियोगाच्च तद्धर्मैश्च विरोधतः। गृहादेर्बाधकत्वेन साधनार्थं तथा यदि॥ अग्रेपि तादृशैरेवसंगो भवति नान्यथा। स्वयंच विषयाक्रांतः पाषंडी स्यात्तुकालतः॥ विषयाक्रांत देहनांनावेशः सर्वथाहरेः। अतोऽत्र साधने भक्तौनैवत्यागः सुखावहः॥ विरहानुभवार्थं तु परित्यागः प्रशस्यते॥ इत्यादिभिः महाप्रभुभिरपित्यागात्याग विचार परामर्शानुमितः प्रदर्शितास्ति यतोऽत्र वितत्य किं लिखनेन। तस्मात् "विरहानुभवैकार्थ सर्वत्यागोपदेशक" इति॥ ननु गार्हस्थ्यं सम्पादनीयम्॥ ननु विरहशब्द वाच्यत्वेन किं तस्यानुभव करणत्वं तत्करणे कावा व्यवस्था इति चेत् तत्र वदामः विशेषेण रह इति विरहो-भावः विशेषेणाव्यक्तमिति विरहः रहसोऽधिक्य ज्ञापको भगवतः परम सौन्दर्यं तस्य तथैवा-लक्ष्यलीलया साकार ब्रह्मत्व संपादकत्वाल्लीलादेरपि तथात्वेन भावात्मकत्वेन स्व गुणाखिल सामग्र्या समं व्यापक धर्मत्वावच्छिन्न नैसर्ग्यकत्वात् प्रेमासक्ति वासनादे व्यसनादे गायत्री चतुर्थपाद चतुर्थाश्रम शुद्ध पुष्टिभक्ति मार्गीय "सर्व धर्मान्परित्यज्यमामेकं शरणं व्रज" इत्यादि धर्म विशिष्टत्याग मूलाधिष्ठानत्वात्। विविध भाव सम्पत्युत्पादकत्वान्मूर्छा प्रलापादेः संप्रवृत्ति हेतुत्वात् रह रुपत्वे विरह इत्युच्यते। तस्मादपि रहस्तरं रुपकत्वं तद्रहसोधिक्यं मुखारविंदफल विरहानल समुदाय संप्रदाय सांद्रतरे तस्याग्रेरप्यति मात्रत्वात् सन्मनुष्याकृति-मत्वात्। विविध लीलारस भावाकार सम्पादन संप्रदाय सौष्ठवत्वात्। परम सौन्दर्यं द्विधां-गाखिल विभूतिमत्। तदधिष्ठानावयवादेः समुदाय भावाकृतिमत्वात्। सोऽपि स्वयं रासा-द्यनेकावयव सामग्री साहित्येन रहोरूप लीला लोकेऽपि व्रजवनयोः सर्वाज्ञातलील इत्यादि विचार शुद्ध परामर्शोद्भूताया उपलब्धे विरहत्वमुच्यते। ननु पूर्वं रहस्त्वेनान न परम सौन्दर्यं निरुप्य विरहत्वमुक्तं पुनस्तथैव मुखारविंदफले वियोगानल व्याप्ति संप्रदायेऽपि तथैव निरुपणे को हेतुरिति चेत्तत्राहुः। सर्वेषां भगवत्पदार्थानां किं बहुना द्विधा शृंगार रसस्यानेक रासादि लीला विशिष्टस्यापि मूल कारणरुपः स एवाग्निस्तस्य रसात्मक ब्रह्मणो बाह्याभ्यंतर भेदेन निखिल

विभूत्यात्मकत्वात् । स निसर्गतो रासक्षोभाव पूरित विग्रहः स्वभावत एवेत्यात्राय भावः । अतः श्रुत्यंतरेपि इयमेवोपलब्धि र्भवति । स एषोग्नि र्वैश्वानरो यतः पुरुषः योहैनं पुरुषविधं वैश्वानरं पुरुषान्तरे प्रतिष्ठितं वेदेत्यभिप्रायेण । तस्मात्परम सौन्दर्यं साकारादेराकारवान् स्वयं मुखारविंदफल वल्लभाग्निरेव विजानीयात् ॥ अत एव परम सौन्दर्यानुभव संस्पर्शत एवाग्नेः मुखारविंदाकृतिमत पूर्ण प्राकटयं भवति । पुन स्तन्मुखारविंदफल वल्लभाग्न्यनुभव सकाशादेव तस्यैव परम सौन्दर्यस्य शुद्ध द्विधा श्रृंगार रसरुप ब्रह्मसाकार प्रदर्शकस्य प्राकटयं भवति । तत्र दृष्टव्यं तदुद्भूतं निखिल रसात्मक ब्रह्म साकार विशिष्टं बाह्याभ्यंतर भेदेन आंतरं तु महाफल रुपत्वेन तस्मिन्नेवाग्नौ स्थायित्वेन सुस्थिरं भवति । तदधिकरणत्वाभावे स्वस्य सुस्थिरत्वस्याप्यभावात् । कृत्रिमत्वात् क्षणिकं भवेत् । तत्क्षणिकत्वेऽनित्यत्व प्रतीतौ तदसाधारण धर्म निरुपण संपत्तौ साधारण धर्म निरुपण संपत्तिवत् । अत एव मुखारविंदफल वल्लभाग्नावेव सर्वभवन सामर्थ्यं परम सौन्दर्य साकारादे र्मूल निदानं विरहत्वेनोच्यते । त्रिवर्णत्वात् । त्रैलोक्याद्भुत सौंदर्य साकारत्वान्नानात्वात् । तस्याग्ने निरवधित्वं प्रदर्शयति । तत्त्रिवर्ण त्रितयात्मकं स्वरुपं सर्वत्र लीलालोके भाव भावनासु तस्यैव प्रतीतौ तदेवास्माभि र्निश्चीयते त्रिवर्णत्वेन किं श्वेतारुणकृष्णत्वमिति । श्वेते शुद्ध शुद्ध रसात्मक ब्रह्म धर्मत्वावच्छिन्नत्वे सात्विकं तत्स्वयं सात्विकत्वेन सात्विकीं सृष्टिं भगवद्रमणाधिकरणभूतां स्वामिनी प्रतिबिंबाखिल सामग्री समवाय संबंधाभरण भूषितामसृजत् । भगवतो विविध बहि रमणेच्छोद्रेक प्रसंगात् ॥ तथैवारुणत्वेन राजसीं सृष्टिं ॥ तथैव कृष्णत्वेन तामसीं ॥ तेन कृत्वा त्रैलोक्यां प्रादुरासीत् । त्रिवर्णात्मनस्त्रितयात्मकादग्नेः सकाशादेव यथा श्रीमत्स्वामिनीनां भावनाग्निनैव तासां निगूढ़ भाव रुपत्वेन नटवर वपुषा प्रकटो भवति । क्रम पद्धतिः सातुसैग्रावधेया । मुखारविंदफल वियोगानलस्य तद्भवनाखिल सामर्थ्य नैसर्ग्यात् ॥ तदग्नेः परम सौन्दर्य रसात्मक ब्रह्म साकाराखिल नानात्वात् तत्तदवयव भावसम्पत्तिसंपादकत्वात्तत्संधाताखिल चरित्र नित्यत्वात् त्रैलोक्याद्भुत सौन्दर्यमत्युक्त तदग्नः सकाशाद्यदुद्भूतं त्रैलोक्यं तदेव तत्संघात परम सौन्दर्यं साकारेणाकारलंकृतं परम सौन्दर्यमिति व्युत्पत्या त्रैलोक्याद्भुत सौन्दर्यं तदधिकरण भूतत्वाज्जल्पनेपि तथैव तद्भावस्मृति विशिष्टेनोक्तं ॥ भगवतोऽपि त्रैलोक्याद्भुत सौन्दर्य इति ॥ अतः श्रुतिरपि तथैव वदति मुखारविंदफल वल्लभाग्निस्तुतिविषयं । यदग्ने रोहितरुपं तेजसः तद्रूपं । यच्छुक्लं तदीयं । यत्कृष्णं तदन्नस्येतिश्रुतेः । तस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुत्या स्वर्गादिलोक सुखस्यापि भगवदानंद लेश कथनात् तत्तद्वारैव ब्रह्मानंद परत्वादनेक विधिवत्वेनैव सुखत्वमुच्यते । अस्त्यपि च तथैव । तत्पर्यवसायित्वेन तत्राप्यरुणत्वं श्वेतत्वं कृष्णत्वं नानारुपत्वे न तैजस धर्मत्वावच्छिन्नत्वेन । मनुष्य लोकेऽपि तदानंद मात्रया रुपरस गंध स्पर्श शब्दादिषु नानात्वेन श्वेतारुण कृष्णवर्ण वचित्रताभिरेव मणिरत्न प्रवालादिषु वर्णविभेदकत्वस्योपलब्धेस्तदेवावगम्यते । अन्न ब्रह्मणोऽपि तथात्वाद्व्रतमोपित्रयी धर्मत्वं सात्विक राजस तामसत्वेन श्वेतारुण कृष्णाग्निस्त्रिवर्ण वशिष्टत्वेन वर्ण विभेदकत्वं दृश्यते । सुरलोकेऽपिच । तस्मादानंदमात्रा स्वयं साक्षादक्षरातीत भगवदानंद लेशमनेन प्रकारेण वितन्वंत्याब्रह्मस्तंभ पर्यन्तं भगवदानंद लेशस्यानंत प्रदर्शितवती तदा ज्ञातव्यं साक्षाद्धामनोधाम विभूतेः स्वरुपम् । अक्षर ब्रह्म प्रभृतीनां मनन निदिध्याशामिमात्रकागम्यं, अनिशं भृशं चिन्त्यानानां जीवन्मुक्तानां शुक नारदादीनां नमन योग्यं व्रधीशस्य स्वरुपलीला परिकरादेर्या स्वरुपानंद विभूतयस्तासांज्ञानविज्ञानानुभूतिः सातु तेषां परम दुर्लभतमा । शुकादीनां कुयोगिनां नमनमेव पर्यवसानमित्यादि श्रीमन्मुखारविंद फल वल्लभाग्नि सूक्तिभिरपि तथैव प्रति भाति ॥ किंच रसात्मक शुद्ध परम सौन्दर्य साकार

ब्रह्म धर्मत्वावच्छिन्नानुपूर्व्यास्त्येवमेव । अत्रत्वत्यंतानंताप्रतिमप्रभावो भगवतो निरुपणान्न लौकिक युक्त्या विरोध बाधः शंकनीयोऽस्ति । यतो मुखारविंदफल वियोगाग्नेर्य त्रिवर्णत्वं त्रितयात्मकत्वं परम सौन्दर्य साकारघनीभूतं नानात्वेन सावधिकत्वं निरस्ययन् निरवधि-कत्वमेव प्रदर्शकं प्रति क्षणेषु नवनव भाववैचित्र्याद्रासाद्यनेक लीलाभिज्ञापकं तदेव त्रैलोक्यां सात्विक राजस तामस भावसंपत्यात्मके तद्रूपत्वेन तदाकृतिमत् विज्ञेयं तदेव वास्तव वस्तुनः परिशोध्यपरामर्शाभ्यास शुद्ध सम्प्रदायनुमत्यास्मिन्मार्गे विरहत्वेनोच्यते । तस्यानुभव इति किं तत्समुदायित्वस्य विरहस्य यदि श्रवण मनन निदिध्यासन शुद्ध पुष्टिभक्तिमार्गीयत्वेन बाह्याभ्यंतर भेदेन धारणास्यात्तदैव तस्यानुभव भवनस्यप्रमा सर्वत्याग विशिष्ट गायत्री चतुर्थ पदार्थ चतुर्थाश्रमाचरण मात्रैकानुगामिनी सर्वभवन समर्था यस्या आनंदानुभवाग्रे लवलेश मात्रे मुक्त्यादि सुखं तुच्छत्वेनशेषे तत्प्रमाये विशिष्टा विख्यात यशस्विनस्तान् प्रति स्वयं सर्वत्यागोपदेशकः । ननु मार्गावेशीन् प्रति । तेषां व्यवस्थातु प्रदश्यमानामार्गोक्त क्रिया तु साधन पूर्वकावाग्विषयरुपा तस्या यथांतरत्वं परिशोधनं क्रियेते तदास्वभावतो सावधानतया मानसी सेवानुसंधान परामर्शाभावेन भगवद्भोग्य योग्य सामग्र्यादिष्वतत्परतया मुख्यतो वल्लभाग्निः साक्षाद्भगवन्मुखारविंदफल वियोग जनित तापाद्याभावादिभि र्यत्कुर्वन्ति तत्प्रत्युत महाफल प्राप्त्यंतरेऽनभिप्रेत्याश्रय धर्म विरोधी कश्चन् आग्रह स संशिय एव केन हेतुना स्वयं तद्विरहानुभवानुसंधान पूर्वक भगवद्भोग्य सामग्र्यादिषु सेवाशृंगारादिषु तनुजायां तत्परो न भवति । भार्यादीनां प्रतिकूलानुकूलयो विचार परामर्शा भावात्तैः सहव्य-वह्रियंते तेषां मनोगत कलुषतामलय्यैव तेतुं स्वदुष्ट स्वभावतोऽप्रमाद्यत्वे प्रमादमेव कुर्वन्ति । तत्र स्वस्य सावधानं भवितव्यं भार्यादिरनुकूल चेत्कार्यां भगवत्क्रियां उदासीने स्वयं कार्या प्रतिकूले गृहंत्यजेत् । तत्यागे दूषणंनास्ति यतः कृष्ण पराङ्मुखः । इत्यादि फल मार्गाधिष्टा-तु राज्ञा विषयाग्रहेण तेषां त्याग एवोचितश्च तेषामानुकूल्यत्वं अस्ति तदातु तैः सह भगव-द्भोग्य सामग्री श्रीअंगसेवादि करणीयं । तत्तूभयोरेवाग्निमांत्तर महाफल मोवि प्रस्तावे परम फलप्रदं भवति । तस्मादस्मिन्मार्गे तत्फल प्राप्तौ दुर्लभत्वमप्यस्ति परम सुलभत्वमप्यस्ति । मुखारविंदफल वियोगाग्नि संधातेन सुखसेव्यत्वं परमफल प्रदं भवति । तदभावे तु पूर्वोक्त भाव संपत्तिवत् तस्मात् यः स्वग्रहे प्रधान भूतस्तस्य स्वग्रहपरिकरेषु भार्यादिषु सावधानतयास्थेयं तेषामन्याश्रये देवतांतर भजने व्रताद्याग्रहेष्वास्था भवेत् । साक्षाच्छ्रीमद्यशोदोत्संग लालित स्वामिनी निगूढ भावानुभवातिरिक्त भावांतर प्रवेशाशये विरोध्येव भवेत् । स्वयं वस्तुतः स्वकीयानां सर्वथैवान्याश्रयादिकं न कारयेत् चेत्स्वस्याग्रह साक्षात् भजनानंदानन्य भजन भक्ति पुष्टिमर्यादांगभूतमुल्लंघ्यतेऽन्याश्रयादिकं कुर्युस्तदातेषां त्याग एव कर्तव्यो न तत्रात्मीय-त्वेन तत्यागाग्रहेऽतत्परो भवेद्तत्परत्वेस्वस्यापि तथात्वाद्भगवन्मुखारविंदफल वियोगाग्न्यनु-भवाद्बहिर्मुखत्वे कः सन्देहः । एवंसति मार्गमर्यादया साक्षाद्वल्लभाग्नि मुखारविंद निदेशाशय प्रज्ञाया यदुचिततरं भवेद्वा यत्साधु भवेत्तदेवकर्तव्यं ॥ यद्वा । विराहानुभवस्य भावान्तरे-णाप्युपचर्यंते । अलक्ष्य कुटीरस्थ राधासर्वस्वसम्पुट इत्यनेन श्रीमत स्वामिनीनां नाभिकोषे एवालक्ष कुटीरत्वमुद्भावनीयं । परम सौन्दर्य साकारानुभवोद्भूत मनन निदिध्यासनादिकाद्य-स्मिंस्तत्व साक्षात्कार निगूढ भावरुपः कृष्ण पदार्थः प्रकटो भवति परमदुःखानंदतरोत्तर परम सुखानुभव सांद्रतम नीलज्वाला शिखी विरहाग्निस्तत् प्रसृतः पुरुषोत्तमः सएषोग्निः वैश्वानरो यतः पुरुष इति श्रुत्यर्थं प्रदर्शयन् यद्विरहानुभवैकार्थं सर्वत्यागोपदेशक इति सर्व-मनवद्यम् ॥ तद्विरहानुभव सम्प्रदाय व्यतिरेके यानि यानि साधनानि पुष्टि भक्तिमार्गीय सेवादि वृत्ति विशिष्टानि प्रत्युत तानि तद्गाढयं शिथिलयंति । तेषां स्वास्थ्याति मात्रकत्वात् सेव्य

स्वरुपे यत्स्वरुपं भक्तानां उत्तरीयासनोपविष्टं विरहाग्न्य स्वास्थ्योत्पादकं स्व स्वरुपातिरिक्त बाह्याभ्यंतर भेदेन पंच पर्वाविद्याविस्मारकं तस्मिनभि निवेशाभावे तदितरे तदधिष्टानेऽत्य-भिनिवेशात्तत्फल साधकानां साधनानामपि तथात्वादग्रेऽगतिमत्वात् स्वास्थ्यजल योगत्वमेव नतपुनः साधनानि । यतः प्रत्युत तेषां स्वास्थ्यजल योगाद्विरहाग्न्युपशामकत्वमेवावगं-तव्यं । प्रतिभात्यपिच । एतद्भाव परामर्शाधिष्टानं परम सौन्दर्य धनंतरं श्रीमग्दोनधर्नाधीश श्रीअंग स्पर्श श्रीमुखावलोकनेन शृंगारादिभिस्तदंतिक गत्या तत्रत्यामखिल मंगलात्यारिभ्य शयन पर्यंत क्रियायामेवान्वेष्टव्यं । विजिज्ञासितव्यमित्यांतरलापिकया मया मुखारविंदफल वियोगाग्न्यनुभवोद्रेक रंहसातद्विरहानुभवजं रहस्यं प्रकटितमस्ति तद्विरहानुभवाब्धि लहरीभि र्बाह्याभ्यंतर योगस्फालितानां सदैक तदवस्थाभरभावितानां शुभायैव तत्पूर्वानुभवानुभूति संस्मृतेः केवल विरहाग्नि स्वरुपाग्नः संधुक्षणार्थैव । इति । अत्रायं भावः। अत एवोक्तं तयैव राधयैव "राधा सर्वस्व संपुट इति । स्वस्य तत्समये तद्विरहानुभव विक्षोभोद्रेकोदर्कं भाव-त्वंख्यापयंती राधा विशेष संभोग प्राप्त दोषं अपराधं च ज्ञापयंती "हा नाथरमण प्रेष्ठ क्वासि क्वासि महाभुज" इति जल्पतीस्वदैन्यत्वमुद्घाटयंन्ती उक्तवती अलक्ष कुटीरस्थः राधा सर्वस्व सम्पुट इति ॥ एष एव रहोनुभवस्तदनुभवार्थमेव यः सर्वत्यागः सवासया देह पतन पर्यंतं तस्योपदेशक इत्यनुसंधायैवोक्तं पितृचरणैः "विरहानुभवैकार्थ सर्वत्यागोपदेशकः" इति ॥ यद्वा । स्वयं भजनानंद रमणप्रियो राधा सर्वस्य सम्पुष्टिस्तत्स्वतंत्र विरहानुभवे राधासर्वस्व निगूढ भावोत्पादके एव विरहस्त्वं विशेषेण रहस्त्वं । तदनुभवस्य परिपाका-ग्न्यात्मकत्वात्पीत ज्वालात्मकत्वात् स्वामिनी विग्रह विभूत्यात्मकत्वात् कोटि कन्दर्पलावण्या-त्मकत्वात् स्थायी भावसदैक रुपत्वाद्रहस्तस्याति मात्रकत्वात्तत्परामर्शस्याप्यतिगहनागति रुपत्वात् तदनुभव एव विरहानुभवस्तदर्थमेव यः सर्वात्मनाया फल प्रकरणीय चतुर्थाश्रमा-चरणादिकमवलंब्य व्रजवरघोष सीमंतिन्यो यथा तत्प्रस्तावोक्त तावदानत्वमदिशत् । तथांग भूते यस्त्यागस्तस्योपदेशको । ननु तदवान्तरीय देशेस्थित्वा मर्वत्यागोपदेशकः । एवं चेत्स्या-त्तदाग्नि कुमारा अप्येवं न वदेयुः "विरहानुभवैकार्थ सर्वत्यागोपदेशक." रहशब्दोपादानाद्धि शब्दोपादानात् । पूर्वोक्त प्रकारेण ध्वनि निवहत्वमेव द्योतितं । तस्यां तु तदंगभूत परामर्श प्रवृति प्राचुर्यस्यैव प्राधान्यात् । तदीयैस्तद्विरहानुभव विषय सौगन्ध्य वसनाभिभूतैस्तत्परामर्श एव कर्तव्यो न तदित्तरानुसंधानस्येति भावः॥ यत एतद्विरहानुभव समुदायानंतानुभव विशिष्ट परामर्शा भावाति मात्रहैमुद्दिश्यैव तद्विरहानुभव दानसंसिद्धये स्वयं भूतले साक्षाद्भगवन्मु-खारविन्द रुपेण फल रसानुभवाखिल निरोधतारतम्याधिक्य चरित्रवता तापाग्निज्वालात्मकत्वेन प्रादुर्भूय तत्साक्षात्स्वरुपानुभव भावदेशे तत्स्वरुप सदृशानुकूलाखिल सामग्री विशिष्ट स्वरुप सेवामार्गं प्रकटंचकार तस्मिनग्न्याकारोत्पादक विरहानुभवाधिकरणत्वं श्रीस्वामिनी निगूढभावं स्वामिनी विप्रयोगाग्नि यज्ञ फलं निधाय तदेव सेवार्थंदतं तत्ताप परामर्शः परावर्यैण कर्तव्य-स्तत सेव्य स्वरुपांतर्गत स्वरुप सेवनैव विरहानुभवस्यानभिव्यक्ति विशिष्टस्य बहिर्व्यक्ति र्भविष्यति वा तदधिष्टान सेवनेनैव । अत एवैतत्परामर्शाभावे तदान्तरीय स्वरुपानुभव विक्षोभ व्यासंग रहिते सर्वमार्ग वेशिनो रोढिकत्वेन धावंति व्रजंति परंतु तदवान्तरीय भजनाधिक्यात् स्वास्थ्यजलयोगात्प्रत्यहं सेव्य स्वरुप सेवाद्यनुकरण मार्गानुरोधानुपूर्व्या समं कुर्वतः स तोऽपि स्वास्थ्य शैत्यमेव प्रदर्शयंतो जलरुपा एव भवंत्यग्रे भविष्यंत्यपि च । तदवान्तरीय स्वरुपस्य तथांगाखिल स्वास्थ्यजल योगातिमाधकत्वात्तदुपासकानां तत्सेवन तत्पराणामपि तथात्व भवने किं चित्रं न किमपीत्यर्थः ॥ ननु दैवीजीवानामुद्धारार्थमेव स्वयं साक्षाद्भगवन्मुखारविंद रुपेण तदेव फलप्रदेन स्वाविर्भावं भूतले कृत्वा तथैव तेषां शुद्ध रसात्मक ब्रह्मसंबंध संपाद्य

नाम निवेदनादिक संस्काराश्च पुनः स्वेनैव दत्तं सेव्यरूपं सेवनाय पुनस्तत् स्वरुपांतरस्थं स्वरुपानुभवादिकमुत्सृज्यावांतरीय स्वरुपं तदधिष्ठानं तद्भजन तत्सेवा परत्वविषय स्वास्थ्य-जलयोग एव प्रत्यहं प्राप्तौ कोवाहेतुरिति चेत्सत्यं । प्रथमतयात्मनिवेदनाखिल भाव संपत्याऽ-शुद्धांगपरत्वादुत्तरोत्तर तत्संबंधिनी क्रियासु व्यभिचारी दोषाधिक्य प्राचुर्य संमेलनेनोत्तरोत्तर तदांतरीयं स्वरुपानुभवाभावात्तदवांतरीय स्वरुपे एवात्यभिनिवेशात्स्वास्थ्यजलयोगस्यैवा-भिव्यक्तौ विरहानुभवगंधलवलेशोपि न दृश्यते । न भवेत् सेवाकथा कीर्तनादिभिरपि । आत्म-निवेदनाखिल भाव संपत्तावपि अनर्थत्वस्य रुपकत्वं द्रष्टव्यं स्वयमात्मनिवेदी भगवत्संनिधौ-स्थित्वा तुलसीदलं ग्रहीत्वा देहेंद्रियप्राणांतःकरणादिकं धनदारादिकं च समर्पयित्वात्मनिवेदी भवति ॥ पुनः कश्चन प्रस्तावे प्रकृतिः प्राकृतं कुत्सितं आश्रित्यमूल भगवदाश्रयं निर्भर्त्सयन् । तत्समर्पित धनादिकं पुनस्तुलसीदलं ग्रहीत्वा दत्वा ब्राह्मण मुखात्स्वस्तीत्यादि विहित शास्त्रा-नुचारं कारयति । मूर्खोबालिशो बहुरोगग्रस्तो मंदधीरेव न जानाति तुलसीदलं ग्रहीत्वा ग्रहीत्वा कस्य धनादिकं दीयते । पूर्वं तु मया भगवत्संनिधौ तुलसीदलं ग्रहीत्वा भगवते कृष्णाय गोपीजनवल्लभाय धनादिकं सर्वं समर्पितमस्ति पुनस्तत्समर्पित धनादिकस्य कर्मकांडोद्भूत धर्मादिकमाश्रित्यान्य विनियोगं क्रियते । एवं प्रकारमवलम्ब्य इति ज्ञानाभावे यत्करोति यद्ददाति तदनुसंधान राहित्येन यत्र यत्रानुसरति तत्र तत्रात्मादिनिवेदनाशुद्धिं साहित्येनैवेति बोद्धव्यं ॥ ननु तर्हिपुत्र विवाहदिषु तद्धनव्ययाभावे तत्कार्य सिद्ध्याभावे गृहस्थानां निर्वाहादर्शने किं कर्तव्यं चेत्तत्र वदामः । चेत्ते स्वस्य भावानुकूलास्संति भगवति समर्पितात्मनः संति सेव्य स्वरुपसेवायां तत्परास्संति । अन्याश्रयादिभिरहिताः संति तदातेषु तत्सेवकत्वंमत्वात्मीयत्व बुद्धिं निवृत्य तेषां विवाह व्यवहारार्थं तद्धनादे विनियोगस्य भगवदाज्ञांगभूतस्य भगवदभि-प्रायाभिमतान्न विरोध बाधः शंकनीयः । तद्भक्तानां तदुपासन धर्म विशिष्टानां तद्भावसजातीनां तथैव कर्तव्यत्वान्न विरोधस्तेषां भगवद्भक्तांगपरत्वात्तदितरेषु देवांतर भजन परिनिष्ठेषु शैवेषु ब्राह्मणेषु तथैवानुसर्तव्यमिदमेव बाधकं । "विप्राद् द्विषड्गुणयुतादरविंदनाभ पादारविंद विमुखात् श्वपचं वरिष्ठं" इत्यादि अनुसंधेय तथैव कर्तव्यं भवितव्यं च । तस्मादत्र विचारणीयं । कथमेतेषु स्वयं मुखारविंदफल वल्लभाग्निः सर्वत्यागोपदेष्टुं संभावनामपि करिष्यति । न कदा-चिदपीत्यर्थः ॥ तस्मान्मार्गावेशिनांमध्ये एवमेव चलति ॥ एवं विरहानुभवे हेतुत्यागोपदेश कर्तृत्वमुक्त्वा भक्तिमार्ग स्थैर्यार्थं भक्त्याचारोपदेश कर्तृत्वमाहुः "भक्त्याचारोपदेष्टाच" इति । भक्तिमार्गीयो यः आचार आचरणमन्याश्रय राहित्येन निरुपधिभावेन फलज्ञानपूर्वकं सेवा साक्षाद्बुद्ध्या सेवाधिकरणं तदुपदेशकर्ता इत्यर्थः । तस्य कथा कीर्तनादेः कर्तृत्व ज्ञापनाय-चकारः । अत्र पूर्वनाम्नि विरहानुभवैकार्थ सर्वत्यागोपदेशकत्वं मुखारविंदफल वल्लभाग्नि-नामाचार्याणां मया यथास्थितं तथैव निरुपितं । तदनंतरत्वेन साद्धंयन्मुखारविंदफल वियो-गाग्न्यनुभवजाचरणं तदेवभक्त्याचरणं अन्याश्रय रहितं । तदनुभवेतर प्रपंच विस्मारकं । तदेव फलविधायक निरवधिरुपेण निरुपधिभावेन तज्ज्ञानाखिल चरित्रमत् । तदुपदेशकर्तेत्यर्थः ॥ तदाचरणान्वेषण संकेत स्थलमनुक्तसिद्धम् । व्रजवरघोषरत्न सीमंतिनीनां भावनां परामर्श व्यासंग संगतावेवानवेष्टव्यं । अत एव भगवच्चरणत्वादेः सौष्ठवत्वं तासां भावना समुदाय सामग्रीषु यथा भक्तिरुपे मुखारविंदे श्रीमद्वृन्दावनेन्दु गोभिरंजिते रसिके प्रेमासक्तिव्यसनादि भाव विविध भावसंतति विचित्रात्मदर्शो श्रीमत्स्वामिनी पीताग्नि ज्वालाशिखावयवार्थाभि ज्ञापक बदर पांडुवदनाखिल सुषमाभिरभिभूते वेणुना तद्गुणगणानुगायनि । तद्विविधाविर्भा-वांचिते मोहन मुकुटादिभिः केवल श्रीमत् स्वामिनी नेत्र भावांचिते या भावाध्धीनामूर्मयः प्रादुर्भूता भवंत्यान्दोलनेन प्रकंपनेन च । वार्तयाग्रीवालोल लीलया ताभिरभिभूते प्रेमासक्ति

व्यसनादीनां स्व स्वतंत्रानुभवाभिभूतानां या व्यवस्था वास्तवी तदवस्थाखिल चरितार्थतायामुकुरायमानो मुखारविंदफल भक्तिमार्गीय चतुर्थाश्रम शुद्ध सन्यास निरोध रोध वैराग्यकामः परम स्वांतरगत सौन्दर्य साकाराखिलानुभवत्वं निष्कामत्वं तदनुभवेनैव तयोर्वास्तवत्वेन निखिलांतरीयाशयोभिव्यापके रसात्मकाखिल लीलासु भक्तिमार्गाब्ज मार्तंडोदयेन साकं लोकवत् लीला कैवल्यमित्यनेन लोकवत् क्रियाखिल चरितार्थेषु भावात्मकत्वमेव संप्रदाये भावो भवति विहरणे मनन निदिध्यास शुद्ध परामर्श व्यासंग सम्पत्तौ स्वतापाग्नि ज्वालासंप्रदाय परिणत फल रुपायां फलकत्वमेव विधायके स्वस्यानुभव विक्षेभोद्रेकोदर्कानुभवाग्रे अन्यसंबंधादेः विस्मारके केवल श्रीमत स्वामीनी स्वरुपानुभवादिषु तद् गुणगणनविषये प्रतिक्षणे नवनवभाव वैचित्र्यानिमज्जनोन्मज्जन भाव सम्पत्यात्मता दर्शे तत्तन्मार्गीयत्व भक्त्यांगाखिल चरितार्थ प्रवृत्या सम्यग् यदाचरणं तन्मुखारविंद भक्त्याचरणं निरवधि निरुपधि निरोध तारतभ्येन तापाग्नि तारतम्येनान्य संबंधगंध रहित तदुपदेश प्रवर्तकत्वकथनस्यायमाशयः। यदि केवलं भक्तिमार्गोपदेशमेवकृत्वा स्वकीयेषु वर्णाश्रमाचार धर्मान्नप्रवर्तयेत्तदा बहिर्मुखानां स्वप्रवर्तित भक्तिमार्गे दोषारोपात् स्वमार्गस्यापिदोषारोपहेतुत्वमापद्येत। इति निर्दोषत्व ज्ञापनार्थमाहुः "कर्ममार्ग प्रवर्तक" इति तु व्यक्त विवृतौमयालिखितमस्ति परंतु स्वतंत्रे। एवं सति पूर्वानुभवानुपूर्व्याः विरोध आयाति पूर्वनाम्नि भक्त्याचारोपदेष्टाचेति तस्मिन् या भक्त्याचरण संबंधिन्यो भावसम्पत्तयो निरुपितास्तासामुपदेशकर्तारो वल्लभाग्रयः व्याधुट्य कर्ममार्गे तत्कृतिषु केनहेतुना वियुज्य पूर्वानुभवे निरावरण स्वातंत्रिकेऽन्य संमेलनं संप्रवर्तयंतो व्यभिचार भजन दोषादिकमुपदिशंतो स्वातंत्रिकत्वं स्वविरहाग्न्यात्मके मार्गे कर्ममार्ग प्रवर्तकत्वे न सम्पादयन्ति कर्मादे वेदात्मकत्वात त्रैगुण्य विषयात्मकत्वात् विरहानुभवैकार्थ सर्वत्यागोपदेशकः भक्त्याचारोपदेष्टाच इति नाम द्वयार्थ परामर्श शुद्धांतरीयत्वेस्याऽत्यंतानिर्वचनीयोत्यंतोत्कर्षत्वात्। कथं स्वमार्गे दोषत्वख्यापनाय कर्ममार्ग प्रवर्तक इति विरोधात्तो कर्ममार्ग प्रवर्तक इति नाम्नोऽखिल भावसम्पत्तिरपि पूर्वनामद्वयो र्भावसम्पत्तिषु संगता भवति नतु कर्ममार्ग प्रवृत्ति विषये। "न्यासादेशेषु धर्मत्यजन वचनतोऽकिंचनाधिक्रियोक्ताकार्पण्यं वांगमुक्तं मदितर भजनापेक्षणं वा व्यपोढं। दुःस्साध्येच्छोद्यमौ वा क्वचिदुपशमितावन्य सम्मेलने वा ब्रह्मास्त्रन्याय उक्तस्तदिहन विहतो धर्म आज्ञादि सिद्धः।" तदुपरि पितृ चरणानां लेख परामर्शान्तरीयत्व विचारणात् स्वप्रकटित भक्तिमार्गे निर्दोषत्व ख्यापनायैव कर्ममार्ग प्रवर्तक इत्यनुसंधेयं शुद्धानन्यानुभवीनामनुभवादेरेव निर्वाहात् मुखारविंदफल भक्तिमार्गीयानि यानि यानि कर्माणि क्रियारुपाणि भाव भावना रुपाणि तेषां कर्मणां। विरहानुभवैकार्थे सर्वत्याग विशिष्टिनां भक्त्याचरणाशेष कृति कुशलानां परम विरहानुभवदशायां सहार्द इति तयैव निर्वाह दर्शनाम्नौ तत्कर्मणां गहनागति रुपस्य परमफल रुपत्वात्तत्समुदाय कर्ममार्गस्य प्रवर्तकत्वं निश्चित्योक्तं "कर्ममार्ग प्रवर्तकः"। यत्र "सर्व धर्मान्परित्यज्य मामेकंशरणं व्रज" इत्युपदिशति तत्र पुनस्तत्सन्मुखाधिष्ठातृत्वेन स्वयं कर्ममार्ग प्रवर्तकः कथं भविष्यत्येकरुपेण वाग्विलासेन कार्यद्वय करणे वाग्विलासे एव व्यभिचाराचरणा परिशोध परामर्शात्तस्मिन्न संभावित्वान्मूल धामन्यपि अनिश्चयाद्वेदाधिष्ठाने एव निश्चयात्तस्य कर्ममार्ग प्रवर्तकत्वात्तन्मार्गीयानां कर्मज्ञानकांडाभ्यां तत्करणमावश्यकं भवति तेषां तत्कर्मसमुदाय साधनेन तत्फल मुख्यत्वमिति नियमात्। अत्र तु पितृचरण लिखंति। सर्वधर्मानिति उक्त रीत्यालौकिक वैदिक भगवद्धर्माननियमात्। अत्र तु पितृचरण लिखंति। तदसाधकत्वात् त्यक्त्वामां शरणं व्रजेत्युत्तरार्ध सहितेन शरणगति दानं तदनंतरमेकं केवलं भाव विषयं मां व्रजे प्राप्नुहीति तद्भाव दानं एतन्निर्देशाग्रह विषये ब्रूहि कर्ममार्ग प्रवृत्तिमार्गं क्वास्ति न कुत्रापीत्यर्थः। किंच। "तदिह न विहतो धर्म आज्ञादि सिद्धः" इति। यद्वा धर्मत्याग कथनेन धर्मो न विहतः तत्र हेतुः "आज्ञादि सिद्धः" इति कुर्वित्याज्ञा विषयो यः स एव धर्मः धर्मत्यागाज्ञाशय

विशिष्टः यो धर्मः स एव रूपानुभव साक्षात् फलसंबंध प्राप्ति परम सौभाग्य दशायां परमो धर्मः ॥ किंच तस्यागस्याप्यत्राज्ञाक्षय विषयत्वान् धर्मत्वमेवेतिभावः। यतो धर्मत्याग कथनेन धर्मो न विहितो भवति। "आज्ञादि सिद्ध धर्मत्वात्तदतिरिक्त त्यागांगभूत धर्मसमुदाये तस्यैव प्रमुखत्वात्। स एव कर्तव्यत्वात्। पुनः साक्षाद्भगवन्मुखारविंदफल वल्लभाग्नीनामार्थः "कर्ममार्ग प्रवर्तकः" इति विषयाभिव्यंजकः कुत्रपर्यवसानमीयात्। अत्रेदमाकूतं ॥ यावत्पर्यंतं साक्षात् द्विधाशृंगार रसात्मक रमणप्रिय स्वरूपामृत रसमधुपाय मानसो न भवेत् तावत्पर्यंतं वर्णाश्रमादयः यावंति कर्माणि वेदोक्तानिसंति तान्युदासीनवृत्त्या भगवत् सेवाकथानंतरं तद् व्यासंगानुरोध साहित्येनैवकार्याणि चेत् श्रीगोपीजनवल्लभेत्रितयात्मकेफल वल्लभाग्नौ पूर्णानुभव प्रमेय बलवानस्ति तदातु तस्यकृतेनर्थोपि न। अकृतेन प्रत्यवायोऽपि न। तस्य भगवति रसात्मक ब्रह्मणि पूर्णानुभव साक्षात्स्वरूप संबंध फल रसानुभव विषय प्राचुर्यात् करणेऽकरणे कोऽपि विरोध बाधः। रसात्मक ब्रह्मणि स्वरूपानुभवे निरुपधि निरवधि स्नेहत्वावच्छिन्नत्व मूल निदान बीजानुभावात् तदनुभवीनामपि तथात्वान्न विरोधबाध शंकनीयो नास्ति न भविता। यतो भगवदासक्त्या यावत्पर्यंतं तदितर प्रकृति प्रपंचाध्यासादिध्वंसो न भवेत्तावत्पर्यंतं विधिनिषेधाद्यनुसंधायैव यत्कर्तव्यं तत्करणे समंजसमेव। अत उक्तम्। भगवता "यस्त्वात्मरतिरेवस्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्यकार्यं न विद्यते ॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्व भूतेषु कश्चिदर्थव्यपाश्रयः ॥" इति पूर्ण प्रमेय बलवतां तत्स्वरूपानुभव रसमाध्वीक पान प्रमत्तानां साधनफल विभेदाभ्यां स्व स्वरूपानुभव साक्षात्फल संबंध एव प्रदर्शितवान्। तदितराणांत्वावश्यकत्वेनैव कर्मादिकं मर्यादापुष्टि भेदाभ्यां कर्तव्यमिति उद्दिश्योक्तमपि भगवता "तस्मादसक्तं कार्यंकर्म समाचर। असक्तोह्याचरन् कर्मपरमाप्नोति पूरुषः ॥ कर्मणैव हि संसिद्धमास्थिता जनकादयः। लोक संग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ यद्यदाचरतिश्रेष्ठः तत्तदेवेतरोजनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ न मे पार्थास्ति कर्तव्यं त्रिषुलोकेषु किंचन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ यदिह्यहं न वर्तेयं जातु कर्मण्य तन्द्रितः। ममवर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥ उत्सीदेयुरिमे लोका न कुर्यांकर्मचेदहं।" इत्यादिना तदनुभव रसपानाभाववतां कर्मकर्तृत्वमेवोपदिष्टं। इति तु स्वेनैव तदंशांश परत्वेन तन्मुखाधिष्टातृत्वेनोक्तम्। तदभिसंधायैव पितृ चरणैरुक्तं "कर्ममार्ग प्रवर्तकः" इति। अन्य आज्ञा। "तावत्कर्माणि कुर्वीत न निर्विद्येत यावती। मत्कथाश्रवणादौ वा श्रद्धायावन्न जायते ॥ ज्ञाननिष्ठो विरक्तो वा मद्भक्तोवा न पेक्षकः। सलिंगानाश्रमांस्त्यक्त्वा चरेदविधि गोचर इत्यादिनापि ज्ञाननिष्ठो विरक्तश्च मर्यादांगत्वेन कर्मादिकरणत्वमुपदिष्टम्। मद्भक्तो न पेक्षक। सायुज्यादेः कुत्सितत्वं मन्यमानस्तस्य भक्तिमार्गीयफल संबंधं प्राचुर्य प्रमेयबलं निश्चित्योक्तं "सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" इति। तस्मादिदं नाम श्रीमद् वल्लभाग्नेः साक्षाद्भगवन्मुखारविंदस्य तस्याखिल भावसंपत्तयो भक्तिरूप मुखारविंदफल वियोगाग्निः यज्ञ संबंधिनी यानि यानि कर्माणि तेषामेव प्रवर्तकत्वेन स्व स्वनिर्वाहादिकं तदनुभविनां अनुभव परामर्श विषये प्रदर्शयंति ॥ ननु केवल कर्ममार्ग प्रवर्तकत्वादित्यत्रायमाशय ॥ गीतायां यद्भगवतोक्तं तत्तु लोकवेद प्रसिद्ध पुरुषोत्तमेनैतस्य साक्षाद्भगवदवयवात्मकत्वादेकादश वर्ष पर्यंतं प्रभोः सान्निध्याति मात्रकत्वात्तदंगपरत्वात्पुरुषोत्तमत्वमेवाभूत् यद्यपि वस्तुविचार क्रियमाणे अक्षर ब्रह्मणो भावनानुरूपत्वमस्यास्तीति। तथापि तद्भाव विषयेन भगवतः सन्निधानेनच पुरुषोत्तमत्वमेवाभूत् तद्धाम्नः पुरुषोत्तमात्मकत्वमभूत् अत उक्तं। स्वेनैव "द्वाविमौ पुरुषौलोकेक्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मातक्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोकेवेदेच प्रथितः पुरुषोत्तमः ॥" इत्यादिनानुक्त सिद्धमेव। पूर्वोक्त प्रकारेणास्य पुरुषोतमत्वमस्यैवास्य धामनोपि

अत उक्तम् "नतद्भासयते सूर्यो न शशांको न पावकः । यद्गत्वा न निवर्तंते तद्धाम परमं मम ।" इत्यादिनाऽप्यपि वैकुंठ संज्ञिकं ज्ञेयम् । वस्तः तस्यापि अक्षरात्मकत्वमेवास्तीत्यणुभाष्ये प्रभुचरणै निरुपितमस्ति ॥ किंच । वरदानादिकमप्यनेनैव स्वरुपेण मूलस्वरुपाभिप्राय साहित्येन भवतीत्यवधार्यं भवति खलु किंच शारीरीलीलावसरे यद्यपि योगमायास्वयमंधकार रुपांतिरष्करणीं प्रक्षेपितवती तथापि लोकवेद प्रसिद्धः पुरुषोत्तमः अस्पर्श योगान्तरे भगवन्निकट एव स्थितो विज्ञेयस्तस्य पूर्वोक्त प्रकारेण पुरुषोत्तमावयवस्य भावादेः साम्यत्वात् अनधिष्ठितं यत्किंचित् तत्कार्यक्षमं न भवति न भविष्यति । यद्यपि भगवान् षड्गुण रसात्मकत्वेन रसात्मकः सम्पन्नः रंतुं मनः कृतवान् तथापि तदधिष्ठानमादौ ससृज श्रीमत्स्वामिनी मुख्यभक्त मुखेंदुं पश्चादेव-मनश्चिकीर्षितं निखिलं निरवधिरुपं कायवाङ् मन इन्द्रिय व्यवहार व्यासंगादिभिरति गोचरं भगवतो भक्तानां च मनोरथांतरुपं फल पर्यवसायित्वमभूत् । तथैवास्य लोकवेद प्रथित पुरु-षोत्तमस्याधिष्ठातृत्वेन साक्षाद् भजनानंद पुरुषोत्तमोऽक्षर ब्रह्मणः सत्तांग भूतस्य लवलेशस्यापि संबंधो न भावनीयः न वा साक्षात्पुरुषोत्तमत्वं किंतु लोकवेद प्रथित पुरुषोत्तमस्य यत्किंचित्तत्तु तत्पर्यवसायित्वेन पृथगांग भूतं विभावनीयं ॥ यद्यप्यक्षर ब्रह्मणोभावना साक्षादक्षरातीत पुरुषोत्तमे दिदृक्षात्युद्रेकरुपाऽस्याधिष्ठानमस्ति तथापि तद्भावन विषये भगवदाकृते र्भावरुपाया भवनंप्रति कारणताऽस्पर्श मुखारविंद वल्लभाग्नेरेव न तत्र किमपि तदक्षर ब्रह्मणः स्वतः पुरुषार्थ रुपत्वं । एवं सत्यप्यस्य लोकवेद प्रसिद्ध पुरुषोत्तमस्य सर्वाधिक्यत्व सर्वोत्कर्षत्वमनुक्त सिद्धमस्ति । किंचैकादशवर्ष पर्यंतं साक्षादक्षरातीत पुरुषोत्तम सन्निधानादाकृत्या सौन्दर्यादिभिः भाषणादिभिरनुभवादिभिश्च तदाकारस्तदाकृतिरेव बोद्धव्या । सान्निध्य मात्रेणैव श्रीकृष्णप्रेमा विमुक्तिदानं श्रीमद्वल्लभाग्नेः तन्निखिलत्व विशिष्टं साक्षाद्भजनानंद रमणप्रिय मुखारविंदफल सर्वांग बाह्याभ्यंतरयोस्तत्सन्निध्युग्र महिम्ना लोकवेद प्रसिद्ध पुरुषोत्तमाकृतौ स्वरुपेण अनुभ-वादिभिश्च साम्यातिमात्रकत्वस्य दर्शनात्तो कः सन्देहो न कोपीत्यर्थः । यदस्तत्साम्याखिल धर्मवत्वेनैवोद्धवादीन् प्रति रासाद्यनुभव पर्यवसायिनीं लीला स्वेनैवोक्ता । किंच कुरुक्षेत्रागम प्रस्तावेऽपि श्रीमद्व्रजेन्द्रादीन् प्रत्यपिचबाललीलामारभ्य यावंति कर्माणि साक्षाद्भगवताकृतानि अपि तथा विधिवत्वेनैवोक्तानि पूर्वं प्रासंगिका वार्तादिभिर्देर्भ्यां निहत्यगाढाश्लेषादिना श्रुप्रलाप मूर्च्छादिनापि च तत्सामयिकं निखिल व्रतान्ते तथा विधिवत्त्वेनैव ॥ तथैवाभूत् व्रजादागतानामपि तथात्वात् रासमंडल मंडनानां स्वरुपतो लीलातोऽनुभवतः सौन्दर्य साकारतो वेषाभरण विभूतिभिश्च तदाकारस्तदाकृतिमत्वं बोद्धव्यं भवति । यतः परस्परयोः समानाधि-करणत्वादुद्धवस्य प्रणयिनो व्रजे प्रेषणंतेन सार्द्धं पूर्वानुभवानुरुपं निखिलं यदनुभूतं परमांतरंग भक्तयोगमायाविनिर्मितास्पर्शयोगांतरे स्थित्वोक्तया तथैव प्रतिबोधितास्ताः परस्परयोः स्वरुपेण भजनेनासक्तया विरहेणचैक्यानुभवातु पूर्व्या परस्परं विरहोद्रेकजन्यखेदादिकं तस्य प्रतीति-रभूत् वस्तुत आकृत्यैव तासां तथात्वस्य प्रतीतौ बहिः संवेदनाधिक्यादांतरे आंतर संबंधिनो-ऽभावात्तत्स्वरुप एवात्यभिनिवेशोऽभूत् ॥ एताः योगमाययैव गोपगृहिणीत्वेन गोपानांगृहेषु स्वाद्भुत कर्मानुचरित्रै भगवदभिप्रायेच्छानुचारिभि रासमंडल मंडनानां स्वरुपनिवहं मुखार-विंदफल वल्लभाग्नि अनुभव निखिलावयवधारि शारीरीलीला वस्तु वास्तवमधिष्ठानमधिष्ठाय एव नवीनोत्पाद्य संपादिता विज्ञेया तासांरास मंडल मंडनानां आकृत्यादेः निखिलत्वेनसार्द्धं । यत एतासामप्याकृत्यादेः साम्याखिलावभूते र्लोकवेद प्रसिद्ध पुरुषोत्तमस्यापि पुष्टिभक्तिमार्गीया अपि ब्रह्मादयोऽपि सर्वे मोहंगताः ॥ न केषांचित्तद् ज्ञानसंबंधिनी वस्तु वास्तवी बुद्धिरभूत । येतु केवल साक्षाद्वल्लभाग्नि वाग्विलासाब्धिमालोडयतत्सारभूतं निखिलं ब्रह्मानंदादस्पर्श ब्रह्मांडात परमनुभूय स्वतंत्रासंति । तेतु परमहंसाः परमविवेकिनः स्वानन्य भजनेषु स्वरुपानुभव

स्तारतम्यताभिः विवेकमेव कुर्वन्ति करिष्यन्ति अपि च ते षां तदनुभव नैसर्गिक धर्मत्वात् न ते कुत्रापि केनाप्यंशेन मुह्यंति । पुष्टिभक्ति मार्गीयाणांमोहावस्था श्रोतव्या सुबोधिनी व्याख्यानं शृण्वंति व्याख्यानपि क्रियंते । उलूखलादि लीलारभ्य मृत्स्नाभक्षणादि लीलांतेन चतुर्मूर्ति भगवांस्तस्यैव विक्रीडनं तस्यैव निखिलानि चरित्राणि न पुरुषोत्तमस्येत्यपिनिश्चीयंते । पुन "यातेकृष्णे लोकरीत्या नैकटयाभावतः" इत्यादिनापि निर्णीयंते । परं त्वेवनैजानंत्येव । पुनस्तत स्वरूपेण चतुर्मूर्ति भगवानविशिष्टेन लोकवेद पुरुषोत्तमेन स्वानुचरो व्रजवर घोषसीमंतिनीषु साक्षाद्रासमंडल मंडनासु भगवदंगसंग साक्षात्संबंधानेक रसलीलाविर्भाव विशिष्टासु प्रेषित स्तत्किं श्रीमदाचार्य चरणानां लेखाखिल वास्तवतस्तत्स्वरुपस्य प्रद्युम्नांगभूतत्वाल्लोकवेद प्रसिद्ध पुरुषोत्तमात्मकत्वाद्भगवद्भोगयोग्य सामग्रीषु तस्यानधिकारत्वात् दृश्यते परस्परं सजातीय धर्मातिमात्रकत्वमितिकिं इति परामर्शाभावात्तेषां पूर्वोक्त प्रकारेण भगवन्मोहवशान्न तदाकलयितुं मनसापितेशेकुः । एवं सत्येवमेव व्रजंति धावंति । वस्तु विचारे क्रियमाणे तत्प्रासंगिकत्वं निखिलं सर्वेभ्योऽज्ञातमेवाभूत । इतितु मां प्रति परम कृपयापितृचरणैर्यद्रहस्यं गुह्याद् गुह्यतरं श्रीमन्मुखारविंदफल वियोगाग्नि निगूढाशय विद्भिर्युक्तं तमेव तदीयानां परम हंसानामनन्य भजनपराणां विवेक ज्ञानक्षोभभरभाविताशेषिनां शुभायैव तच्छुद्ध निरावरण निर्दोष पूर्णगुणाखिल सामग्री विशिष्ट विज्ञान विषय संसिद्धये मया निरणायि ॥ इत्यनेन उद्धवागमने ताभिः सार्द्धं भगवद्वियोगकथा प्रसंगे कुरुक्षेत्रेऽपिच पूर्वानुभवांनुभूत प्रसंगोद्घाटने परस्पर समवायि सम्बन्ध सौष्ठवत्वान्नकोऽपि विरोधबाधः शंकनीयः । एतद्रहस्यं श्रुत्वा तदीयास्तदनन्य भजनपरा असंशयाभूत्वा तथैव हृदि संनिविश्य यद्रहस्य स्वरुपं मया प्रदर्शितं तदनुभवात परावृत्य-भावांतरे स्वरुप भजनान्तरेवानागंतव्य चेदिति श्रुत्वा प्रमाद्यिष्यंति तदातुयेनेदं रहस्य-मग्निकुमारेण प्रकटितं तस्यैवकृपाविषयानिष्पत्तेरभावात् निष्फलत्वात्तेरेवप्राधान्यात्तद्व्रजना-ग्रहादक्षर प्रर्यसायित्वमेव सेत्स्यति नाधिकतरमिति बुद्ध्वा यत्कर्तव्यं तत्सुखेनैवकार्यम् ॥ वस्तुतः "सदा सर्वात्मभावेन भजनीयो व्रजाधिप" इति निदेशाशयमाश्रित्यैव व्रजे श्रीमद्गोव-र्द्धनाचल शिरोमण्यादौस्वस्थितिं विधाय व्रजवर घोषरत्न सीमंतिनीनां चतुर्थाश्रमाचरणादिकं विभावयन् प्रभोर्विरहानुभव एव कर्तव्यस्तदितरानंद प्रपंचमखिलमपि विसृज्य इति तु पुष्टि भक्तिमार्गीयं भजनाध्यासफल पर्यवसायि र्भवतिवै ॥१८॥

एवं कर्ममार्गप्रवर्तकत्वे बहवः हेतून्निरुप्य स्वस्यापि यागकरणं स्वीयानां भक्तिमार्गाप-राधाभावशिक्षार्थनान्यार्थइतिज्ञापनायोक्तं यागादौ भक्तिमार्गैकसाधनत्वोपदेशकः ।

यागादौ भक्तिमार्गैकसाधनत्वोपदेशकः ॥
पूर्णानन्दः पूर्णकामो वाक्पतिर्विबुधेश्वरः ॥१९॥

यागादिर्यस्य दानादिसः यागादि तस्मिन्यागादौ भक्तिमार्गैकं मुख्यं यत्साधनत्वं तदुपदेशक इति । विरहानुभवैकार्थ सर्वत्यागोपदेशक इति नाम्नोऽर्थ संदर्भे या भाव संपत्तयो निरुपि-तास्तासामनुसंगो भक्त्याचारोपदेष्टा च इत्यस्य व्याख्या । निखिल भावसंपत्तिषु प्रमिलितो विज्ञेयोऽस्यास्तुसंगो मुखारविन्द फलवियोगाग्न्यनुभव भक्त्याचरणानुकूलानि कर्माणि तेषां मार्ग प्रवर्तकत्वे मंतव्यः । अस्य कर्ममार्गस्य प्रवृत्ति मुखारविन्द फलवियोगज महाविरहाग्नि यज्ञ साक्षात्परमसौंदर्यसाकाराखिलसुषमांविशिष्टः कृष्णः फलं यस्य, तदनुभव संकेतमुख्य श्रीमत्स्वामिनीनां भावनारंगभूमिकायामेव, तत्रैवान्वेष्टव्यं उक्त भावाखिलाधिष्ठानत्वात्तस्याः ।

अत एवोक्तं यागादौ भक्तिमार्गैक भक्तिरुप मुखारविन्द फलवियोगाग्निमार्गैक इति यागादिर्यस्य साधन स एतेरपि विरहानुभवाग्निचयवात्मकत्वात्फलरुपत्वात्तस्य दानादेः सयागादिरत उक्त भक्तिमार्गैक साधनत्वोपदेशको भक्तिमार्गीयत्वेन मुखारविन्द भक्तिरुप भक्तिमार्गीयस्य समुच्चयार्थस्त्वेनैकं मुख्यं साधनत्वं तदुपदेशक इत्यर्थः । मुखारविन्द फलवियोगाग्नेस्वरुप लीलारस भावात्मकस्य परम सौंदर्य साकार नानात्व विशिष्टस्य यावग्न्यः सामग्र्यास्तासामपि साधनतः स्वरुपतो विरहाग्न्यनुभवातिमात्रकत्वाद्यागादेः स्वरुपाण्यपि तथांगभूतान्यवगंतव्यानि भवंति । ननु वेदोक्त कर्माखिल विधि विशिष्टो यागस्तस्य सकामत्वात् दिविदिव्यभोग पर्यवसानानश्वरत्वात्साक्षान्मुखारविन्द फलवल्लभाग्निनां तत्करणेऽसंभावितत्वाद्वियोगाग्नि रुपेण वियोगाग्नियागः करणेऽत्यंत सामंजस्यं यथा भवति तथैवस्तीत्यत्रायमाशयः । अत एव पितृचरणैः मुखारविन्द फलवियोगाग्न्यनुभवमार्गीया संध्या प्रदर्शितास्ति । तथैव तन्मार्गीयत्वेन यागस्यापि रुपं कथं न मंतव्यं । शुद्धानन्य भजनफलप्राप्तौ साधन संप्राप्तस्यापि तथात्वादेकानुस्यूतत्वात् । श्रीराधे प्रियतमदृक् संगम संजात हासदृक् सलिले । भवदीयै स्नानमेभूयासततं न पाथोभिः । इत्यनेन सलिल स्नानादेर्वैलक्षण्यं द्योतितं । त्रिष्वणमिह भवदंघ्रि प्रणतिः इत्यनेन संध्या जप कीर्तनादेरपि वैलक्षण्यं ध्वनितं । संध्याप्रकृष्टदैन्येन जापस्तु तापक्लेशैर्विगाढ भावेन कीर्तनं नाम्नामित्यनिन संध्याजप कीर्तनादेरपि वैलक्षण्यं मुखारविन्द फलवियोगाग्न्यनुभवः मार्गीय सूचितं । भूयान्मेभ्यव्यवहारस्तावक तांबूलचर्वितेनैव पानंकरुणाकृतस्मितावलोकामृतेनैव । इत्यादिनापि क्षुत्पिपासादेरपि वैलक्षण्यं ज्ञापितं । अस्तं गच्छत्सूर्या शुशुक्षणौदिवसदुःख होमस्तु । त्वत्पृष्ट प्रियवार्ता कथनं मे ब्रह्मयज्ञोस्तु । ब्रह्म यज्ञस्य भिन्नभिन्नमार्गा एव प्रदर्शिताः पितृचरणैः मुखारविन्द फलभक्तिमार्गीयत्वेन । भवतीनां प्रियसंगम संजातमनो महोत्सवेक्षणतः । तर्पणमिह सर्वेन्द्रिय तृप्तिर्भवतान्मनोरथाश्यामे । प्रिय संगमतो मनोमहोत्सवे क्षणतः । तर्पणं सर्वेन्द्रियतृप्तिर्मनोरथाप्याद्देराप्यनिर्वचनीय स्वरुपं द्योतितं । इत्थं जीवनमस्तु क्षणमपि भवदंघ्रि विप्रयोगेतु मरणं भवतादेवंभावे शरणत्वमेव भव । इत्यादिना स्व जीवनत्वं पूर्वोक्त निर्विशिष्टं श्रीमत्स्वामिनीनां मूर्ध्नि–सरोरुहयो विविध भाव संपत्तिमति सौरभाघ्राण विषये एवं सूचितं । तदभावेन तद्विप्रयोग दशान्वितेनात्यंतखेदवशात स्वदेहादेरप्यभाव एव प्रदर्शितोऽत उक्त मुखारविन्द फलवियोगाग्नि यज्ञादौ मुखारविन्द फलवियोगाग्नि कर्म विशिष्टा निसाधनान्यप्युपदिशंतीति निश्चिन्त्येोक्तवंतोऽग्निकुमाराः यागादौ भक्तिमार्गैक साधनत्वोपदेशक इति नन्वस्तु एवमेव परंतु स्वस्य विरहात्मकत्वाद्विरहाग्निमयत्वाद्याग करणेन कथं भक्तिमार्गापराध निवृत्तिरति चेत्सत्यं भक्तिमार्गेऽपराधद्वयं देवतांतर संबंधः भक्तिमार्गीय फलाभावश्च । आचार्यैः मुखारविन्द फलवल्लभाग्निभिर्वाग्रूपेण नंदादीनुपदिश्य देवतांतर भजनादिकं त्याग करयित्वा पुष्टिभक्तिमार्गीयत्वं निखिलं प्रदर्श्य स्वयं यागकरणेन स्वीयानामपराधद्वयं निवारितं देवता यागभंगाद्देवतांतर भजनं निवारितं तद्भजनाधिक्यात्पूर्वं स्व स्वरुपानुभवस्य फलाभाव एव स्थितस्तत्त्यागे स्व स्वरुपानुभव फल दानामपि कृतवान्यतो यागभंग फलदानाभ्यांमपराधद्वयं निवारितम् । एतस्यापि यागस्य फलत्वेन भक्तिरेवोद्देशः कृतः । ननु स्वर्गादेरपीत्येतावती शिक्षा तदीयैस्तद्याग करणेनैव ज्ञातानाप्यथेति ज्ञापनायोक्तं यागादौ भक्तिमार्गैक साधनत्वोपदेशक इति तु पूर्व निरुपित भाव संपत्तेरितरानुसंधान पूर्वकं व्याख्यानं देवतायागभंगकरण पर्यवसायित्वेन स्व स्वरुपानुभव एव फलदान परत्वे ननु मूल लीलायाम् । कतिपयानि नामानि भूमावतरणयोगखिल चरित्र व्यापकानि कतिपयानि नामानि नित्यरुपाणि मुखारविन्द फलवियोगाग्नि चरित्र रुपाणि तथैव श्रीमद् व्रजेन्द्र सद्मनि लीलानामपि स्वरुपाणि विज्ञेयानि । हेदोलदोलादि महोत्सवा ते सर्वेमूललिलानुकरणाखिल सामग्री विशिष्टा विज्ञेयाः ।

विजय दशम्यादिभूभावतरणयोग युक्तोत्सवाद्यो मंतव्यास्तेषामधिष्ठानं साक्षात्पुरुषोत्तम स्वरूपानुभवादेरेवास्ति तेन कृत्वा तेपि भावात्मका उत्सवरूपा विज्ञेयाः तत्तदुत्सवागते सति सामग्र्यादिभिः परस्परं मिलनाति प्रसंगाद् तद्व्यपदेशाच्छीअंग स्पर्शादिनाश्लेषांदिभिभक्तै सहानिर्वचनीया लीलाद्यनुकरणात्तेषांमपि भावात्मकत्वमस्माभि निश्चीयते। भावात्मकत्वेन परामर्शे परमोत्सवत्वमेवोपपद्येत। नतु लौकिकानुकरणत्वं। अत उक्तं श्रीमदाचार्य चरणैः। लौकिकेषु च धर्मेषु यत्रैव हरिवेशनं निवर्तते तदेवात्रवन्हे दारुमयं यथेति। तस्मात्किंभूमाववतरण निखिल चरितार्थेषु लोकवत्सु किंमूललीलायां सर्वत्र साक्षाद्विधा शृंगार रसालय विविध संचित विचित्र भाव संपात्यात्मादर्श मुखारविंद फलवियोगाग्नेरेव करणं निवर्तते। तदेवात्रवन्हे दारुमयं यथेत्याकृत पूर्वापर परामर्शज वास्तव हृदयारुढान् यद्यपि स्वीयानां शिक्षार्थमेव याग करणं तथापि यागस्य स्वर्ग फलत्वेन श्रुतिप्रतिपादनादाचार्याणामपि स्वर्ग सुखाकांक्षा कामित फलाकांक्षा वा भविष्यतीति कस्यचिद्बहिर्मुख स्याशंका निरासायाग्रिमनामाहु॥ <u>पूर्णानंदः</u>॥ पूर्णः अगणित आनंदोयस्य सः। तेनास्यैवानंदस्यान्यानिभूतानि मात्रामुपजीवन्तीति श्रुत्या स्वार्गादि लोक सुखस्यापिभगवदानंद लेश कथनादाचार्याणां तदाधारभूतत्वात् स्व स्वरुपानंदेन लीलानंदेन भावानंदेन भावनानंदेनानेकरासाद्यनुभवानुभूत्यानंदेन पूर्णत्वात्तन्मात्रानंदस्य लेशानंदात्मकत्वात्तेनानंद लेशेनाऽऽब्रह्म स्तंभ पर्यन्तं विविध सुखातिव्याप्तेः सुरेन्द्रादयः दिवि दिव्य भोगान्मोक्षान्ते तदा तु पूर्णानंद परमात्परम वल्लभाग्नेस्तत्सुखानुकांक्षी संभावनापि न संभवतीति कथं बहिर्मुखाशंकित संभावनापि इति ज्ञापनायोक्तं पूर्णानंद इति। यद्वाय-श्राग्निबीजामृतबीजात्मकत्वेन साक्षाद्भगवन्मुखारविंदफल रसाखिल सामग्र्यधिष्ठातृत्वेन वेणुरव वर्त्मना हरिण्यादिनां भावनारंगभूमिषु केवल भगवदात्मरुप स्वामिनीत्वं विविधानुभवरस साकार प्रयुक्तं संपाद्य। क्वणित वेणुरववंचित चित्ताः कृष्णमन्वासतकृष्णगृहिण्य इयद्वधि पर्यंतं पूर्णत्वमुक्तवंतो वल्लभाग्नयस्तदास्वस्य पूर्णत्वे किं वक्तव्यं। यद्वा मुखारविंदाधिष्ठातृत्वेन वेणुनादद्वाराऽनिर्वचनीयां परम सौंदर्य साकाराखिल लीलास्वरुप भावभावनद्रव्य द्रवस्वरुपात्मिकां सुधांवज्रवरघोषरत्नसीमन्तिनीनां श्रुतिपथान्तरे मर्मणिप्रवेश्य तस्याएव बर्हापीड नटवर स्वरुपमुत्पाद्य तदनुभवेनैव बाह्याभ्यंतर भेदेन ताः पूर्णाःकृता। कामितफलत्वेनैव तासां तत्स्वरूपानुभव साक्षात्फल संबंधार्तिरुपोद्देकत्वेनैव फलत्वं निष्कामत्वेनापितत्स्वरुपानुभावाखिल विभूत्याप्तिविषये विविधानंदानुभव तारतम्येन यत्साक्षात्संबंध फलं तदेव संपाद्यता अपि पूर्णाः कृतास्तदा स्वस्यपूर्णत्वे किं वक्तव्यं। यद्वा पूर्णाः पुलिंद्य उरुगाय पदाब्जराग श्रीकुंकुमेन दयितास्तनमण्डितेन तद्दर्शन स्मररुजस्तृण रुषितेन लिम्पन्त्य आनन कुचेषु जहुस्तदाधिमित्यादिना श्री शुकेनापि वल्लभाग्नेः पूर्णत्वं तृणादिषु क्षुद्रजातीयां पुलिन्द्यादिषु द्योतितं। तदातस्मिन्नश्नोयत्पूर्णत्वं तद्वक्तुं कः शक्नोति। अंगसंगवतीनां कुंचमंडलस्थकुंकुमेनाग्निशिखिना विविध भावोद्बोधनेन रुषितानि तृणांनि तेषामग्रभागेषु किंचित्किंचित्संलग्नमितियावत्तद्दर्शनेन स्मरः स्मरणं जातं तासांशुद्रस्मृतेः मूलाधिष्ठानं मुखारविंदाकृतावग्निरुपायामेव तदनुभवोद्रेक संस्मरण विद्योतत्कुचमंडलालिप्त कुंकुमाखिलभाव चरितार्थतामुपगम्य तद्रूषितेषु तृणेषु तदखिलार्थतां रसरुपां कृत्वा तद्रसेन निभृतानिकृतानि तानितृणानि पुनस्तासांशुद्धभावोद्रेकाधिकयात्तेषामग्रभाग जलयंत्र प्राय स्फुटीभूता अभवन्। पुनस्तद्रसबहिर्निस्सरणे ताः हरिदासवर्य संगोग्रमहिमामृतरसार्द्राः स्वस्वांजलिनांतरं संनिगृह्याननेषु कुचेषु लिपितवत्यस्तदनुभवजन्यमाधितल्लेपन संस्पार्शानंदभरवशाज्जहुरितिभावः। यत्रक्षुद्रजातीया पुलिंद्योपि पूर्णानंदानुभवेन वल्लभाग्नि संस्मरण विधिना पूर्णाजातास्तदातत्पूर्णत्व संपादके वल्लभाग्नौ पूर्णत्वे किमाश्चर्य। अत्रतासु पूर्ण प्रमेय बलवत्वमेव तदानंमवगंतव्यं।

नैव तद्दानमवगंतव्यं । यत्र साधनानपेक्षत्वं तत्रैव पूर्णप्रमेय बलवत्वं मन्तव्यं भवति । तद्भवनं प्रतिकारणता हरिदासवर्य संगातिशयत्वस्यैव नान्यस्वेति भावः । यतः प्रत्यहं तदोत्थापन समये यदि श्रीमद् गोवर्धनाचल शिरोमणि शिखरोपरिस्थित्वा मधुमंगलः स्वयं शंखनाद करोति तद् श्रुणवन्त्यः पुलिंद्यः हरिदासवर्य प्रेरिताः नाना रस स्वाद जनकानि कंदमूलफलानि गृहीत्वा तन्निकुंज भवनद्वारे गत्वा गत्वा स्थिताः भवन्ति पुनस्तन्निकुंजान्तराद् हरिदासवर्य प्रेषित मुख्य सहचरी कथाधिष्ठात्रीबहिरागत्य तान्युपायनानि गृहोत्वा पुनस्तथैव तं निकुंजं प्रविश्य दंपत्यग्रे समर्पयति । अत उत्थापन समये फलादिकमेव समर्पणीयं । पूर्वोक्त प्रकार निरुपण श्रवण क्रियानुष्ठानाग्रह प्रसंगाद्यतस्तासां पुलिन्दीनां तद्दान भवनं प्रतिकारणं हरिदासवर्य संगस्यैव भगवत्स्वरुपनुभव फलसंबंधः मुखारविंद फलवियोगात्मक साधनैरेव भवति तद्भक्तानां हरिदासवर्य प्रभृतीनां संगातसाधनाधिक्याद्भाव पूर्वकत्वादेवप्रमेयबलेनैव साध्याधिक्यं भवत्यतो भगवत्संगात्तद्भक्त संगस्यात्युत्कर्षत्वमस्ति । वस्तु विचारे क्रियमाणेऽस्त्येवमेव । अत एव व्रजवनयोर्यदिपुलिंद्यादिपूक्तप्रकारेण पूर्णत्वं व्रजवर घोषरत्न सीमन्तिनीभिरेव गीतमनुक्तसिद्धमस्ति तेषांतत्पूर्णत्व कर्तरि पूर्णत्वानंतस्य निर्णेतुं कः क्षमोभविता न कोपीत्यर्थः । यद्वा यः सन्मनुष्याकृतिः साक्षात्परम सौंदर्य निसर्ग रसात्मकाकार मूर्तिमांस्तदधिकरणभूतस्तस्य पूर्णानंदानंतत्वस्य सावधिकत्वस्या भावादनिशंभृशं प्रदर्शकस्यांतं व्रजवर घोषरत्न सीमन्तिन्योग संगभूताऽपिनयेयुस्तदातदधिकरण भूतस्य हुताशस्य मुखारविंद फलवियोगाग्नेः सएषोग्नि वैश्वानरोयतः पुरुष इति श्रुत्युक्त साभिप्राय समुदाय विशिष्टस्यांतं गंतुं निर्णेतुं द्रष्टुं कें क्षमाभवितारो न केपीत्यर्थः । यद्वा । "यावदंतःस्थितो वन्हि प्रकटो वानिशोन्नहितावंदंतःस्थितोप्येषो न दारु दहन क्षम" इत्यारम्य उद्गतोग्निः सर्वत्राग्निं लीनं जनयितुं शक्नोइत्यंतेन यावंति लीला विशिष्टानि परमालौकिकचंद्र सामग्र्यादि विशिष्टानिरुपाणि कृतानि तानि केवल स्व विरहाग्न्यात्मकानि तावन्तितैः पंचात्मकं स्वरुपं रस समूहात्मकं रासायनेक लीला संपृक्तम् प्रकटीकृत्य शारीरी लीला प्रदर्शिता । तस्यां तासांयत्पूर्णत्वमभूत्तत्वनभिव्यक्तं तदनुभवपराणामनुभव परामर्श सौकर्य संपत्यैव व्यक्ततरमभूतत्पूर्णत्व संपादकत्वं बल्लभाग्नेर्मुखारविंद फलस्यैव तदा तस्य मुखाकृत्यखिल परमसौदर्य साकाराखिल विशिष्टस्य वल्लभाग्नेः पूर्णत्वे किं वक्तव्यमिति यावत् । यद्वा मुखारविंदाकृत्यखिल सुषमा सांद्रत्व साहित्येन व्रजवरघोषरत्नसीमन्तिनीनां भावना मर्ममंडलेषु भावना भावाग्निवर्त्मना निशंभृशं व्रजन्ति तदा तेषु निरवधित्वेन स्वरुपानुभवेन रसायनेकलीलया यत्पूर्णत्वं करोति तन्निर्णेतुंता नशेकुः स्तदातान्म्य इतरे के तं निर्णेतुं शक्ताभवितारो न केपीत्यर्थः । अतएवतत्समुच्चयार्थमभिप्रेत्यैवाग्निकुमारा उक्तवंत ॥ पूर्णानंद इति ॥ द्वितीय शंकापरिहाराय द्वितीयं नामार्थमाहुः ॥ <u>पूर्णकामः</u> ॥ पूर्णाः निरवध्यानंदरुपाः भगवतोरसात्मकब्रह्मणोऽनुभवानुभविनांकामित सुखापेक्षयाप्यगणित सुख पूर्णाः अवाग्विषयरुपाः मननिन्ध्यास शुद्ध समाधिनाप्यवेद्यरुपाः कामाः यस्य सः । व्रजवर घोषरत्न सीमन्तिनीनां बर्हापीड नटवर स्वरुपानुभव साक्षादंगसंग संबंध फल कामित कामविशिष्टानां तेनैव नटवर वपुषा परम सौंदर्य साकाराखिलमात्रेण तदनुभवाध्यास वस्तुं वास्तवेन निष्कामेन कामपूर्णत्वं कृतवंतः स्वयं वल्लभाग्नयः पुनर्याज्ञिकानां स्वर्गादि सुख फल प्रेप्सुनामपि यज्ञ फल रुपेणाहंहि सर्वयज्ञानां भोक्ता च प्रभुरीश्वरः इत्यादि वाक्यैस्तत्स्वरुपेणैवाग्निवपुषां कामपूरको भवति । तदास्वस्य तत्कामित फलाकांक्षापूर्वकं वेदोक्त कर्मानुसंधान साहित्येन यागकरण तत्संभावनानुसंधाने प्रयोजनांशस्याप्यभावात्कथं करिष्यति स्वस्य पूर्णानंदत्वात् पूर्णकामत्वादत्यंतालौकिकत्वा "त्प्राकृताः सकलाः देवाः गणितानंदकं बृहत" इत्यादिनाक्षर ब्रह्म पर्यन्तं गणितानंदत्वं निरुपयतः स्वकी-

यांस्तद्भजनवर्त्मनः परावर्तयन्ति । तदा तु यज्ञोद्भवस्य फलस्य स्वर्गादिलोकसुखस्पष्टस्यत-त्फलावांतरीयत्वात्तस्मिन्स्वयं स्वभावनापि करिष्यन्ति न कदापित्यर्थः । अनेन द्वितीयाकांक्षायांपि नियोसोप्युक्त इति सर्वमनवद्यं । भक्तिमार्गे फल कृष्णस्तदास्वादस्तु दुर्लभः जीवाना-मतएवान्यमतेषूत्पद्यतेरतिरित्यादिना कृष्ण फलत्वेन रसरुपत्वेनास्वाद निरोधाधिष्ठान रुपेण स्वयमेव मुखारविंद फलवियोगानलस्तेनैव रुपेण वदति कृष्णफल रसास्वादस्तुदुर्लभस्तदुर्लभात्पौ जीवानामन्यमतेषु अन्यभजन स्वरुपांतर मननिदिध्यासादिसंप्रदायोद्बोधकेषु रतिरुत्पद्यते जायत इत्यर्थः । एतद्वाक्कार; प्रथमं तदतिरिक्तेषु कामितसुखाद्यनुभवेषु कथं प्रवर्तन्ते न कदापीत्पर्थः। वस्तुतः स्वकीयान्प्रति लक्षयंति पूर्णानंदः पूर्णकाम: स्वयंसाक्षाद्भगवन्मुखारविंद फलवियोगाग्नि सांद्रं स्वरुपानुभवारिक्तं यत्किमपि किंचिदपि न विचिन्तनीयमिति स्वभाव परावृति पूर्वक-त्वादेतच्छ्रवण पूर्वंतुस्वभाव विजयार्थमेवैव स्वभावस्य विजय एव कर्तव्यो विजयाभावानुभवे स्वभावस्य वर्तते एतत्श्रवणातरं पूर्वानुभवानुसंधानाग्रहवत् स्वभावस्य विजय एव कर्तव्या । विजय शब्देन तत्स्वभावस्य दाढयंत्यंतं दूरीकर्तुं प्रयासस्यातिप्राचुर्यं द्योतितम् । यतः स्वभाव विजय सामर्थ्यं निर्दोषपूर्णगुणरुपं श्रीमच्छ्रमसरित् कृष्णायामेवानान्यस्यां यतस्तुर्य प्रिया रुपत्वेनापि सर्वासां व्रजवर कुमारिकानां श्रुतिरुपाणां च मनोरथांत स्वरुपानुभवादेर्वास्तवत्वे-नानुभवादिकं कारयति स्वप्रियत्वं तासां प्रियत्वयो: स्पर्दाभावपूर्वकत्वात्तस्मात्स्वस्य तथात्वा-त्त्रैलोक्यां मूल लीलादिस्वपि तथैव करोति । अत: श्री शुकेनाप्युक्तं पुनः पुलिनमागत्य कालिंद्या कृष्णभावनेति पुलिनेपुनरागमनाशयस्त्वयमेव वृन्दावन प्रियायाः पुलिनेतच्चरणरेणु प्रचुरसा-श्रयंत्य: स्वभावपरावृत्ति संसिद्धयेतथैव भावोत्सवा अभवन् तस्मान्मार्गीय सिद्धान्तस्त्वयं । आदौस्वभाव विजयार्थे श्रीमद्वृन्दावन प्रियायाः श्रमसरित एवाश्रयः सर्वात्मभावेन कर्तव्यस्तेन सर्वात्मभावदानं लीलोपयोगिक देहादिकं स्वभाव विजय पूर्वकमनिर्वचनीयं मर्वावेद्यं फल-मार्गीय फलप्राप्ति प्रयासांतरुपं मूलाधिष्ठानमवाप्स्यतिसेत्स्यति इत्यर्थः । तुर्य प्रियाया आश्र-यावलंबस्य तत्तदानाखिल सामर्थ्यमत्वात्तूर्य प्रियात्वेन व्रत मध्यस्था भगवदात्माविन्यासादि-करणभूता चंद्रावली मुख्य कृष्णभावाग्निरुपा कोटिकंदर्पलावण्याधिष्ठात्री श्रीस्वामिनी तुर्यप्रियात्वेन स्वयमेव । नतु द्वारकाधीश संबंधानुसंधान परामर्शे इति तु पुष्टिमार्ग मर्यादाखिललांगग-वेषणाद्विरुद्धापत्तौ तद्भजनपराणां भजनपूर्वेपरामर्शेऽसामंजस्यातिमात्रकत्वात्तदेवतुर्य प्रियात्वं विभावनीयंमितियावत् । किंच भक्तिमार्गाब्जमार्तण्ड पुत्रीत्वेन सर्वासां व्रजवरघोषरत्न सीम-न्तिनीनां किंबहुना द्विधाश्रृंगार रसात्मकस्य भगवतश्च कामपूरक भवति । तदा तस्यः पितरि कामपूर्णत्वे किं वक्तव्यमिति सर्वसुरभ्यम् । एवं पूर्वनाम्नि आचार्याणां पूर्णकामत्वमुक्त्वाऽनः परं यत्रान्येषामपि काम पूरकत्वमस्ति तत्र स्वयंकाम पूर्णत्वे किं यदवधिपर्यन्तं व्याख्येयमिति ज्ञापयन्ताग्रिमनामाहुः ।। वाक्पतिः ।। वाक्पतित्व कथनेनाऽऽचार्याणां भगवन्मुखारविंदाधिष्ठात्र्यग्नि-रुप कथनेन याग हविर्भोक्तृत्वेन उक्तं भवति तेन यागकर्तृणामपि हविर्भाक्तृत्वेन यत्र कामपूरकत्वं तत्र स्वपूर्णकामत्वे किं वक्तव्यमित्येतद् ज्ञापनार्थमुक्तं वाक्पतिरिति। इयं भावार्थ पद्धतिः सातु विभूत्यंगपरत्वेन मुखाधिष्ठातृत्वेनाग्निरुपेण हविर्भोक्तृत्वेन कामपूरकत्वमुक्तं नतु साक्षाद्विधाश्रृंगार रसरुपविरहाग्निना । एवं कर्ममार्गीयाणां कामपूरकत्वमुपपाद्यत्तदंग परत्वेन तद्विभूत्यंशांशपरत्वे नाग्निरुपेण ततो भगवद् ज्ञानमार्गीयाणामपि मनोरथांत कामपूरकत्वमुपपादनायाग्रिमंनामाहुः । विबुधेश्वरः ।। विशेषण बुधाः ज्ञानिनः ज्ञानविशेषो भक्तिमार्गीयत्वं तेषामीश्वरः फलदाता विशेषेण बुधाः साक्षाद्विधा श्रृंगार रसरुपे परम सौंदर्य साकाराखिल मूलाधिष्ठानस्वांतरीयानुभवाध्यास शुद्ध संप्रदायेन समानंद मात्र करपाद मुखोदरादिरुपे भगवत्यावेशितधियस्तदनुभव कामितफलवि-शिष्टास्तदितरेभ्यः कामोपद्रवेभ्यऽपस्मृतायो व्रजजनाएव नतु बहुशास्त्र शब्दज्ञान विषयपरास्ते-षामेवेश्वरः स्वयं मुखारविंद फल रुपेण फलदातेत्यर्थः । अस्मिन्मार्ग मुखारविंद फलानुभवभाववति

वियोगशतवलिते विबुधाः व्रजजनाएव। एषां कृष्ण एव धर्मादि चतुष्टय पुरुषार्थ फलरुपत्वं तदतिरिक्तं किमपिकिंचिदपिनास्ति तेषामीश्वर इत्यर्थः। वीत्युपसर्गादन्येभ्यो बुधेभ्यो ब्रह्मादिभ्य एतेषां विबुधादे वैलक्षण्यं साधनतः फलतः स्वरुपभजन भक्तिमार्गीय संप्रदायतश्चजनयंतोऽग्निकुमारा उक्तवन्तो विबुधेश्वर इति। यद्वा ते विबुधः किं लक्षणा स्त्रितयात्मक सन्मनुष्याकृति परमसौंदर्य साकाराखिलाधिष्ठानो मुखारविंदफल वल्लभाग्निस्तत्स्वरुपाखिल चरितार्थेषु तत्तद्विज्ञान वास्तव विषयिन आदिमेसंति। पुनस्तथैव तद्रूपानुभावानुरुप प्रमेय बलेन द्विधाश्रृंगाररस स्वरुपानुभवानुरुपावलिषु बाह्याभ्यंतरभेदेन निरोध संज्ञिकासु अग्नि रुपमनुभूय तत्तदाकाराकृतिमबिभ्रन् पुनस्तत्तद्ज्ञानविज्ञान शुद्धान्तरीय क्रियादिभिः संपन्नैस्तन्मार्गीयत्वं स्वस्मिन् विबुधत्वं स्थायित्वेन संपादितवंत इत्यभिप्रेत्यैव पितृचरणैरुक्तं विबुधेश्वर इति॥ तेषां फलदाता शास्ता इत्यर्थः॥ तद्वदत्रापि तन्मार्गीयत्वेन विबुधा स्त्रितयात्मक मुखारविंदफल वल्लभाग्नि कृपारस मूर्तिमूर्तयः सेव्यस्वरुपद्वारा साक्षाद्भगवतो निखिलरासादिलीला विशिष्टस्य श्रीमत्स्वामिनीनां निगूढभाव कोटिकंदर्परुपस्यैव प्राकट्यं कृतवंत इतः परं विबुधत्वं किं वक्तव्यं। यादृशी सेवना प्रोक्ता-तत्सिद्धौ फलमुच्यते इत्युक्तत्वादत्रद्रष्टव्यं। श्रीमद्वल्लभाग्नि नामाग्रहविषयः स्वमार्गीय मर्यादांगभूतः। यादृशी मानसी सा शुद्धमनोधर्मातिमात्रकांऽतरीय विरहाग्नयवयवाखिल चित्रचरित्रवति स्वरुपानुभवेन लीलाद्यनुभवेनापितत्सिद्धौसत्यामेव फलमुच्यते। नतु तदसिद्धौ सत्यामिति ध्वनयन्तः स्वकीयान् लक्षयति। यादृशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते तत्सिद्धावसिद्धि विधायकान् प्रतिबंधादीन् प्रदर्शयन्ति। उद्वेगः प्रतिबंधो वा भोगोवास्यात्तु बाधक.। त्रयाणां साधन परित्यागः कर्तव्य इति निदेशाशयं सेवा विषयाखिलं विज्ञान क्रियाबोध विशिष्टं निगृह्यैव ते तथैव कृतवान्नतो विबुधास्तेषामेवेश्वरो नत्वविबुधानां, तस्मादादौतु सेवायां राजाभय शंकापूर्वकं यत्कतव्यं तत्कारयेत् मंदिर वस्त्रादिक भाषणादिकं गमनागमनगतौस्वच्छाया भगवदासनाद्युपरि नव पातयेत्। शय्या सम्मार्ज़नादेर्विधौभावनायाम् परं सावधानं भवितव्यं स्वपाद स्पर्शास्पर्श विचारे तत्परो भवेत्। वस्त्रादि सेवायां स्वस्य परस्य पादस्पर्शे यत्नवान् भवेत। यथाहं श्रीमद्गोवर्धनाधीश वस्त्रसेवादिषु घर्षणविधौवा कोमलत्वं संपादने स्वपादयोः पृष्ठभागे निधाय ज़घनिदुकूलेनाच्छाद्यानुसरामि तथैव श्रीमद्वल्लभाग्निमार्गीयाऽपि-भगवत्सेवायामनुसरेयुः। यद्यपि पितृचरणानां पादुका प्रभ्वासन पार्श्वेऽस्ति श्रीमदगोवर्धनाधीश पार्श्वेऽपि साक्षात भगवन्मुखारविंदफलवल्लभाग्निनां पादुकास्ति परंतु तत्रापि मार्गमर्यादयो-त्सवादिं प्रस्तावे तिलकादिकं विधाय हस्तक्षालनं कृत्वा पुनर्भगवत्सामग्र्यादिषु स्पर्शादिकं क्रियते तथाऽकरणे प्रत्युत प्रत्यवायो भवेदेव न तत्र संदेहः। इति विज्ञाय प्रकटित शुद्धपुष्टि भक्तिमार्गाचार्याणां निदेशाशय मर्यादयैव यत्कर्तव्य तत्परिणामे फलप्रदं भवति तन्मार्गमर्यादामतिक्रम्य यत्कर्तव्यं अनधिष्ठितम् तत्परिणामेऽनिष्ट फलप्रदं भवति। खलु अनधिष्ठितम् साधनं विचारणीयम् अधिष्ठितं फल कथं साधयिष्यति तेन साधनेन सेत्स्यति न कदापीत्यर्थः। तस्मान्मार्गाचार्येषु प्रभुबुद्ध्या तेषां चरणारविंदयोः सेवनं प्रभुवदेव परंतु यदि पृथकत्वेन तयोरेव सेवनं स्यात् तदा तथा विधिवत्वेन तथैव सेवनं परमोपपन्नमस्ति। यदि साक्षाद्भगवतः स्वरुपसेवनं स्वगृहे वर्तते पुष्टि भक्तिमार्गोक्त प्रकारेण तदातु यथा प्रभुभिरेव स्वसेव्य स्वरुपादिषु कृतं तथैव कर्तव्यं वा यथास्मदियाः कुर्वन्ति तथैव कर्तव्यं तस्मात्पुष्टि भक्तिमार्गीयै श्रीमद्वल्लभाङ्गयंगीकृत दैवजीवैर्मदीयैरपि यत्कर्तव्यं तत साक्षाद्द्विधा श्रृंगार रसालय मुखारविंद फल वियोगाग्नि निदेशाशय समन्वितं एव। नतु स्वकल्पित व्यवहाराग्रह पूर्वकं तत्वनीष्ट फल साधकं भविष्यत्येव न तत्रसंशयः। यत उक्तं यादृशी सेवना प्रोक्ता तसिद्धौ फलमुच्यते। इत्यादिना पुष्टिभक्तिमार्गीयस्य साधन दशाया सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छया।

माचार्योक्त प्रकारेण सेवा करणे परमान्तरंगा मानसि तत्सिद्धौफलं साक्षाद्विधा श्रृंगार रसात्मक स्वरुपानुभवसंबंधरुपं भवेदिति तस्येदमेवालौकिक सामर्थ्यं। अस्मिन्सामर्थ्ये वस्तु विचारेक्रियमाणे पूर्ण प्रमेय बलरुपं विरहाऽनुभवानुरुपं भाव बीजमितिभावः। यदाधुनिक जीवस्य तादृश पूर्णालौकिकैश्ववीर्यादि गुणवतासमं साम्येन रति रसोऽदेधश्च भवतीति तदा अलौकिक सामर्थ्यं तथोक्तं विवरणे। नहि साधारणस्य तादृशेन महता समं एतत्कर्तुंशक्यं रसाभास हेतुत्वात्। अत उक्तं श्रीमदाचार्य चरणैः। यादृशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते। अलौकिकस्य दाने हि चाद्यः सिध्येन् मनोरथ इत्यादिनाऽलौकिकस्येति मानसी सा परामतेत्युक्त्या सा सेवा परमांतरंगरुपा भावात्मका भावात्मकां प्रतिकारणता मुखारविंद फलवियोगजदैन्यभर वास्तवस्यैव अतः परम स्वतंत्र पुरुषार्थरुपा पुष्टि भक्तिमार्गीय चित्रकार परामर्षां शुद्धाध्यासाविष्कार हेतुभूतेत्य लौकिकस्य प्रभोर्दाने परमकाष्ठापन्न स्वरुपसंबंधाभिलाषरुप भावदाने सः आद्यः पुष्टि फलरुपः सर्वोत्कृष्टो मनोरथः सिद्धयेन्मनोरथस्तस्मादस्मिन्पुष्टिभक्तिमार्गे सेवानुसंधानप्रवृत्तिविधौ श्रीमदाचार्य चरणनामुक्तप्रकाराखिल विधानत एव करणे सर्वोत्कृष्ट फलासौ तथात्व फलदान संदर्शने तथैवानुसर्तव्यमितिभावः। तदुक्त प्रकारातिरिक्ताचरणे सर्वथैव मार्गाद्भ्रश्यते न तत्र संदेहः। यथा मदीयाः मां पुरुषोत्तमं निश्चित्य भजन्ति तेन किं प्रकटित शुद्ध पुष्टिभक्तिमार्गाचार्याणां प्रसन्नता सिध्यति न कदापीत्यर्थः। एतेषामाग्रह विषये भगवदिच्छैव नियामकत्वादस्माकमप्याग्रहोनास्ति दुष्टाग्रहवतां स्वभाव परावृत्तौ। इयदवधि पर्यंन्तं विरहानुभवैकार्थ सर्वत्यागोपदेशक इत्यारभ्य विबुधेश्वर इत्यंतेन केवल रसरसात्मक पुरुषोत्तम स्वरुपानुभवादिषु निवेशिषतधियां विरहानुभवाशेष कृतिकृतावदानानामेवावस्थानुसंधान परत्वेनैव यानि यानि मुखारविंदफल वल्लभवियोगाग्निनां नामानि तानि तथैव ज्ञातव्यानिति तद्दान प्रकारातिरिक्तदानं तत्फल संसिद्धये साधनवतां द्वादशांगभूत श्रीभागवत श्रवणोत्सुकानां स्वस्व चित्त शुद्धयर्थे प्रयत्नात्मनां महात्म्यज्ञान पूर्वकत्वात्करणायैव तत्प्रकार ज्ञापनायाग्रिमं नामाहुः॥ कृष्णनामसहस्रस्य वक्तेति॥

कृष्णनामसहस्रस्य वक्ता भक्तपरायणः॥
भाक्तयाचारोपदेशार्थनानावाक्यनिरुपकः॥ २०॥

कृष्णस्य फल रुपस्य यन्नामसहस्रं तस्य मुखारविंदरुपेण वक्ता प्रकाशक इत्यर्थः। लौकिकेषु च धर्मेषु यत्रैव हरिवेशनं निवर्तते तदैवात्र वन्हे दारुमयं यथेत्यादिना स्व वाक्य संदर्भेनापि लौकिकेषु च धर्मेष्वपि हरेराविर्भाव प्रसंगाद्यथा दारुत्वं वन्हेः संबंधान्निवर्तते केवलाग्निमयत्वं भवति तथात्र कैमुतिकन्यायेन यद्यपि स्वयं मुखारविंदफल वियोगाग्निरुपेण द्वादशांगभूत श्रीभागवतोक्त प्रकारेण नामान्युक्तानि तेषांफलरुप मुखारविंद विरहाऽनुक्ति विषय विशिष्टत्वाद्यथाग्नि संबंधेन दारुत्वस्य निवृत्तिस्तथांशकलावतारसंबंधादे निवृत्तौ सत्यां विरहाग्नि संधात सौष्ठवत्वात् कृष्णफल रुपत्वमेव बुध्यतां। अत एवोक्तं कृष्णनाम सहस्रस्य वक्तेति। तदीयैः साधनदशाचरण प्रवृत्ति मध्यगैस्तथैवानुसंधेयं तथैव विभावनीयं तन्नामसहस्रं। ननु भागवत सहस्रनामवक्तृत्वं वैशंपायनादिष्वपि वर्तते तथापि तेषां पुराणान्तर प्रसिद्ध नाम्नामेव वक्तृत्वं नतु फलात्मकस्य कृष्णस्य तत्रापि श्रीभागवतोक्त दशलीला विशिष्टस्य तत्तल्लीला विशिष्टानां प्रतिपादकत्वमाचार्याणामेव नान्येषामप्यस्तीति ज्ञापनायोक्तं कृष्णनाम सहस्रस्य वक्तेति। अतः परं फलात्मकस्य तत्रापि दशलीला विशिष्टस्य नामकथनस्यावश्यकत्व ज्ञापनायाग्रिमनामाहुः॥ भक्त परायणः। प्रथम दशायां साधन परेषु पुष्टि भक्तिमार्गीयेषु भक्तेषु परायणः

सहस्रनामादिकं प्रकटीकृत्य तेषां तथैवार्थात्र बोध संपत्तौ सर्वशः स्वातंत्रिकत्वं संपाद्य स्वभक्त परायणत्वमधिकृत तेन कृत्वा यदंघ्रिनखज्योत्स्नाजालमंडलमध्यगं प्रतिबिंबित विविध-रसानुभवाखिल सामग्री भाव संपत्ति विशिष्टंफल मुखारविंद भक्ताः भक्त परायण प्रासा-दात्तमायान्ति प्राप्नुवन्तीत्यर्थः । पुष्टि मर्यादामार्गे एतेषामङ्गीकारात् । आदौ शरणदानं सर्व धर्मत्याग पूर्वकं संपाद्य पश्चाच्चरणारविंदयोर्नखावलि ज्योत्स्नामंडलेस्वेव मुखारविंद फला-न्यनुभवानुभूतिः द्वादशांगभूत श्रीभागवते नाना वाक्यार्थेषु साक्षाद्व्रजनानंद रमण पुरुषोत्तम निरावरण स्वरुपानुभवातिरिक्तेष्वत्यभिनिवेशात्तथापि मुखारविंद फलभक्तिमार्गीय भक्त परायण प्रसादात्तद्भिरहाग्न्यनुभव संधातपूर्णप्रमेयबल प्राचुर्यात्पूर्वोक्त प्रकारेण रसात्मके ब्रह्मणि परम सौंदर्य स्वतः साकाराखिल रासाद्यनेक लीलाविशिष्ट एव तेषां स्थितिरभूदित्यत्रायमभिप्रायः । एवं पूर्वोक्त प्रकारेण भक्त परायणत्वं निरुप्य स्व प्रकटित भक्तिमार्गीयाचार ज्ञापकमग्रिम-नामाहुः ॥ भक्त्याचारोपदेशार्थं नाना वाक्य निरुपकः ॥ साक्षाद्भक्तिमार्गीयो यः आचार आचरणं तदुपदेशार्थं नानाविधानि यानि वाक्यानि नवरत्न भक्तिवर्धिन्यादीनि तेषां निरुपकः तत्तदर्थावि-बोधक इत्यर्थः । वस्तुतः स्व प्रकटित भक्तिमार्गीयाचरणोपकूलानि तद्धर्मसाम्याति मात्रकानि यानि यानि वाक्यानि फल प्रकरणीये श्रीभागवतेवाद्वादशांगे नवरत्न भक्तिवर्धिन्यादिषु संति तानि-तान्यादयः भक्तयाचारोपदेशाः येषुवियुज्य तथैवस्वकीयानूप लक्षय त्याचार्याः । यद्वा साक्षाद्भगव-न्मुखारविंदे फलवियोगाग्नौभोग्ययोग्य सामग्री संपादनार्थं भक्तिमार्गीयो व्रजवरघोषरत्न सीमन्तिनीनां मार्गीयो यः आचार अन्यसंबंधेभ्योऽस्पर्शः तत्संबंधमात्ररहितः केवल भगव-द्भोग्यैकतात्पर्यवान् तदुपदेशार्थं नानाभावरुपं प्रदर्शकानि वाक्यानि यस्य सः । पयोदध्वा-भिक्षामि नव धृत गोधूम चणकेक्षवैरत्युत्कृष्टं विविध रसभोज्यत्वतिमुदा ॥ विधायाधायार्था चितरुचिर पात्रेषु रहसिप्रियं प्राप्यांकस्थं किमपि समवोचत्प्रियतमा । अस्मदीय पदार्थानां भोगः कार्यस्त्वयैवहि । अन्यथा मार्गं मर्यादानंक्षत्यं भोजलोचन । इतरोपभोग शंकादवदहन सुतप्त मंतरस्माकं स्वांगीकृतिनवजलदैः शिशिरयगोपीजनप्राण । लोकविगीतं नाथस्फुटमस्माभिस्तथा कृतं तस्मात् । बालक लीला प्रौढयात्वयैव संपादनीयः सः । कार्याऽयावृत्तिरन्येषां यदास्मा-भिस्तदातथायतनीयं समुद्वेल बाललीलाभिवाचर । इत्यादिनोक्तयाग्रेतत्तद्भावरुपा सामग्री विनि-योगाय वदन्ति । रज तमयेप्ययति सूक्ष्मे पात्रे नवनीतमतिनवं निहितं अत्र मुखारविंद फल वियोगाग्निभक्त्याचार स्वरुपं शुद्ध समाधिना द्रष्टव्यं येन भक्त्याचारेणास्पर्शयोगेनान्यसंबं-धगंधमात्ररहितेन रजतमये श्वेततरे सात्विक भावाध्यासावधि निरवधित्वेन प्रदर्शके सात्विक रसात्मक सृष्ट्युद्भूतांयान् निर्दोषपूर्णगुण सामग्र्यखिलास्वाद निभृतं निरुपधि भावविषयं स्नेहसांद्ररुपं नवनीतं अतिनवं प्रथमावस्थोद्भूत भगवद्भोगयोग्यार्हनिहितं इति मध्यस्थ वचनं मयात्वद्भोगयोग्यं निश्चितमस्तीत्यत्रायंभावः । अनति सूक्ष्मे इत्यनेन तस्यां यत्सौंदर्यादिकं सात्विकभावाग्न्यखिलल्लीलानुचरित चरित्रमत वेशाभरणादिभिर्धम्मिल्लादिभिर्वक्रनेत्रां चलभ्रूल-तावक्रसुषमादिभिश्च तदनिर्वचनीय सात्विक भावाग्न्यूद्भूतं दर्शनीयमेवास्तित्वद्भोग्याहमस्माकं दर्शनीयं हे रसिकचूडामणि रमणप्रिय यद्यपि साक्षात्तवस्वामिनी मुख्यसात्विकगुण सामग्रीना-मधिकरणभूतास्ति तथापि गत गर्वा परम सुंदरीयतोनाति सूक्ष्मत्वेन तस्याः महत्वं गौरवत्वं-द्योतितं त्यः तत्कृत सात्विकभावाद्भुत स्नेहात्मिका सामग्री तस्या एव प्रथम विनियोगाय प्रार्थनमतएव तस्यांपात्रत्वे स्वामिनीसात्विकस्नेहाधिकरणत्वेनातिसूक्ष्मत्वेन महत्वं ध्वनितं । यतोवस्तु वास्तवस्य स्वरुपं त्विदमेव रजतमयपात्रादिभिस्तद्भाव प्रतिनिधि स्वरुपेण बहिरंग धर्मेण रजतमयादेरपि क्रियावयवरुपत्वेन रुपकत्वंभवतु तत्रापि तद्धर्मसंपत्ति निरुपणाद्धर्मि-स्वरुप निरुपण भावसंपत्तिवद् भवति नकापिक्षतिः । बहिरंगेपि ताऽभगवद्भोग्य सामग्रीकरण प्रस्तावे तत्तद्भावरुपत्वेनैव ब्रह्मणो भगवतः स्वामिनी भावात्मकत्वं

विज्ञायैव सामग्रीं कुर्वन्ति । क्रियात्मकासु सामग्रीषु यदि तद्भावात्मकानां सामग्रीणां संगमो भवति तदैव ताः सामग्र्यः सर्वास्तत्स्वामिनी भावरुपा भवंति । राधाधर सुधापातुः किमन्यन्मधुरायितं यन्निवेद्यं तदप्येतन्नामसंबंधेतो भवेदित्यादिना पितृचरणानां सूक्ति वास्तव वस्तुना तदेवावगम्यते । तद्भावेनैव भावमूर्तिताः सकल सामग्र्यो बिभर्ति यतः सात्विक नवीन स्नेहवती स्वयं बाह्याभ्यंतरभेदेन स्नेहात्मिकां सामग्री संपाद्य स्नेह एवेच्छति तद्भावात्मकाखिल संदर्भस्य तत्स्नेह भावात्मकावयवमात्र संप्रदायात्मकत्वात्तस्माधूर्यमपि तस्यां तथैव तत्स्नेह नवीन सामग्रीमंगीकुरुष्व तदनंतरं तस्यां तथैव तत्स्नेहः स्वामिनी सात्विक धर्मविशिष्टः संपादनीय इति प्रतिबोध्य रमणप्रियं यत्र पूर्वोक्त प्रकारेण नवीनं स्नेहं सात्विकभावविशिष्टं सन्निहितमस्तिस्वेनैव तत्र प्रेषयमीतिभावः । तस्मात्प्रकटित शुद्ध पुष्टिभक्तिमार्गाचार्यमार्गे भगवत्सेवा फलरुप साधन संपत्तौ परम सावधानतयास्थातव्यम् । तत्स्वरुप सेवकैस्तद्भोग्ययोग्य सामग्री करणविधौतु सर्वात्मभावेन यत्नवान्नादौतदनुसंधायैव सामग्रीकार्या । श्रीमत् स्वामिनीभावाखिलानुभवानुरुपा गृहस्थानां स्वभाव सजात्यानुकुल्येखिलत्वं विधायैव निश्चित्यैव तेषामनुकूल्ये सेवादिकं कार्यं उदासीनत्वे स्वयंकार्यं प्रतिकूले गृहं त्यजेदिति । निदेशाशयमास्थायैव तथैव कर्तव्यं । भगवतर्थं प्रत्यहं नूतनतरसामग्री विधाय श्रीमत्स्वामिनीनां भावात्मकत्वमनुभावयन्समर्पणीया । सामग्र्यादिषु प्रमादो न कर्तव्यः । रसात्मकस्य ब्रह्मणो भगवतो भावात्मकस्य भुक्तं मधुरस्याहार्यस्यैवातिप्रियत्वात् । यथा व्रजवर वेषरत्न सीमन्तिन्यः सामग्र्यारंभे आर्द्रौ महानसेकपूरागरुकस्तूरीपंकेनैव लिंपंति पुनः सुवर्ण कटाहादीनि पात्राणि तैरेव सामग्रीं कुर्वन्ति अगरु दारुणाग्निंविधाय स्वयमपि श्रृंगारात्मकं श्रीमत्स्वामिनीनां भावरुपं विधाय तस्मिन् स्थिता भवंति भोगसामग्री पाकशालायां विविध सौगंधादिभिरार्द्रा विलासादयो निर्बंधा विज्ञेया । विविध सुरभितप्रसूनार्कवासितानि पात्राणि सामग्र्यधिकरणभूतानि स्व स्व निकटे नीत्वा तत्पराः भवन्ति समानशील व्यसन भावसंपत्ति विशिष्टाभिः परमांतरंग सर्वाभिरेव रमण प्रिय भोगाय गोधूमचणकपिष्टोद्भूता सामग्र्यः कर्कटीबीज मोदकादिकं च कुर्वन्ति तस्यां तस्यां सामग्र्यां श्रीमत्स्वामिनीनां हृदिकेवल स्नेहगुणैः प्रगुंफितेशिक्ये मुखारविंद फलवियोगाद्यनुभवांतरीयनिरोध मुक्तिमार्गीयैं विविध भावमुक्त गुच्छैरुद्बोध समुद्ग्रथिते तस्मिनस्ति सिता हेमपात्रे विविध रसतत्वघनीभूता सिता यथा सुधानिर्यासनिचयः सुंदरः शीतलाकृतिस्तथैव शिक्ये सनालनाभिकोशावयवरुपे परम सौंदर्य साकाराखिल वास्तवानुरुपानुभवांत मुक्तिरुप विशिष्टैर्भाव संदर्भमुक्त गुच्छैः प्रगुंफिते परापश्यंतिभ्यां तस्मिन्संनिहिता स्थिता सिता विज्ञेया तां मध्यमा प्रदर्शयति । कस्मिन्पात्रे सा संनिहिता हेमपात्रे तद्रसस्थायितत्व धर्मीभूता सिता परम सौंदर्य तत्वावयववती श्रीमत्स्वामिनी अंगाभास सन्निधिभाव सांद्र एवावस्थातुमर्हास्ति नान्यत्राधारग्धेययोर्मूलोतपत्तिस्थानैक सौष्ठवत्वात्तस्या शिक्यस्य प्रतिनिधि स्वरुपेणोरसिकंचुक्युपरि विविध रत्नावलिभिर्मुक्तावलिभिरसितपद्म गुच्छैविविध भूषण संपृक्तैः संदर्शनविधौ तस्या एव भावसंतते रुपलब्धेस्तदनुभवपराणां श्रीमद्भलाभाद्यंगीकृत जीवानां परमहंसानां पद्मनाभप्रभृतीनामनुभव सौकर्यभाव परामर्श प्रयास साधनाधिक्ये साध्याधिक्यस्यातिमानकत्वात्तेषामवस्था विषयादेः रुपकत्वं वक्तुं कः शक्यते । अत एव पितृचरणैरपि तथैवाक्तमस्ति तत्प्रसादत एवेयं विवृत्तिरपि तादृशी ॥ रजतमयेऽति सूक्ष्मेपात्रे नवनीतमति निहितंशाणे शिक्येमुक्ता गुच्छवतित्वं गृहाणेदं । इत्यस्य भावार्थानुसंगतिः सात्विक भावसंपत्तिवत्यां निरुपिता तद्भाव प्रतिबोधनाय द्वितीय शिक्यार्थं स्पष्टयन्त्यग्निकुमाराः तन्निकटेस्ति सिता हेमपात्रे इत्यादिनास्यभावार्थस्यैवानुषंगो विमर्षणीयो भवति । अत्र भावात्मकत्व निखिलनिरुपण विषये हि भावात्मकेन समाधिना परामर्श

व्यासंगस्यैव प्राचुर्यमेवापेक्षितमस्ति तस्मात्तदेवकार्यं वस्तुविचारे क्रियमाणे तद्भोग्य योग्य सामग्रीकरणविधौ तद्भाव भावात्मकत्वेन एव व्रजजनाः परीयांसस्तत्प्रसादत एवान्यत्रापि भविता तत्पादरजसः संस्पर्शादिः सर्वभवन सामर्थ्य प्राचुर्यमानात। किंचास्मिन्पुष्टि भक्तिमार्गे आगत्यादौ स्व भजनाधिष्ठानसाधनाधिक्यात्साध्य फलाधिष्ठानं शुद्ध रसात्मक ब्रह्म स्वतः परम सौंदर्याकार-मत व्यूहरहितं तत्स्वरुपं तस्य यन्निखिलं तद्विज्ञान विषयोऽपेक्षते। आदौ तत्तुनास्ति श्रीमद्व्रजेन्द्र सद्मनिस्थित स्वरुपमारभ्य द्वारिका पर्यंत स्वरुप व्यवस्थैकीकृत्य सुबोधिन्यानुक्रमं निगृह्यतत्साधन भजन परिणत फलंमेनिरे। मार्गंशितुरभिप्राय कलय्यैव पुष्टिभक्तिमार्गाचार्या ईशितारस्त्वेवं लिखंति स्पष्टयन्ति प्रदर्शयन्त्यपि च। अंशानां विभागेन केनचित्तु अंशेन नारायणरुपेण सह स्वयं प्रद्युम्न आविवेशेत्याहुः पुरुषोत्तमस्तु नंदगृह एव मायया सहजात इत्यादिभिः पश्यन्तोऽवलोक-यन्तोपि यदा विवेकिनो न भवेयुस्तत्र वयं किं कुर्मः सुखेनैवाविवेकिनो भजनातिरिक्त भजनीया भवेयुस्तत्रास्माकं का क्षतिः सातु तेषामेव। यत आदिमे शुद्ध स्वरुपज्ञान विषयत्वमेव केषाचिन्नास्ति। पूर्वं तेषां तथात्वेन साकं भजनानुरोध संगतिर्ज्ञायत एवेति हेतोः पूर्वं गोविन्द कलयेत्यस्य वास्तवार्थसमुच्चयोस्माभिः विस्तृतोऽस्ति। तमपि विज्ञाय यदि शुद्ध रसात्मक ब्रह्मणि भगवति स्वात्मनि नित्यप्रिये रतिं न कुर्वन्ति। तदास्माकं प्रयत्नादिभिः किं स्याद्भगवतदिच्छायास्तथा-त्वात् सर्व एव तथैव ववृतुस्तदा तस्मादज्ञान विषय प्रवृत्ति प्राचुर्यान्निवर्तयितुं ऋते पुष्टि-मार्गाचार्यान् के सामर्था भवितारो न केपीत्यर्थः। वस्तुतो भगवत्स्वरुपानुभव विषयिनो-नास्ति। किंतु कृतार्थहेतवोमार्गावेशिणस्तद्विषयाभावे वैतालिकत्वमनुक्तसिद्धमेव तेषां विज्ञेयं। विषयिणः स्वरुपं किं लक्षणं यथा रुपरसगंधस्पर्शादीनां विषयिनस्तत्तद्विषय सुखानुभवे नैसर्गिक धर्मत एव तत्परा संति। तेषां तत्तदनुभवानुवृत्ति प्रवृत्तिप्राचुर्यात् पुनर्बा-लकस्यापि चक्षुरिंद्रियादिकं रुपरसगंधस्पर्शविषयादि ग्राहकमस्त्येव। परंतु तस्य मनस-स्तद्विषयत्वाभावादसौ विषयी न भवति तदनुभव रसास्वाद निरोधजात्यर्भावेन यद्यपि ते त-द्ग्रहणोपकृता सामग्र्यः संति परंतु मनसि तन्निखिल विषयत्वस्याभावात्संत्यपि न संति। तथैव यावत्पर्यंतं भगवद्विषयी न भवेत्स्वरुपानुभवादिभिस्तावदत्पर्यंतमयमपि तोकोऽज्ञानि तत्त-न्निखिल विषय सामग्री ग्रहणेऽक्षम इत्यर्थः। यथा बालकं प्रति तद्विषय ग्रहणाय प्रतिबोधः क्रियते। तत्तल्लक्षगतिः न किमपीत्यर्थ स्तस्य मनसि विषय संध्याविर्भावाभावात्तद्ग्रहणे-पि तस्य प्रयोजनाभावात् स्वाज्ञानावस्थायामेव सो निमग्नोस्ति तथैवेतेऽपि। रुपेण मोक्षदः प्रोक्तः भगवता सह संलापोदर्शनंमिलितस्यच। अधरामृतपानं च भोगो रोमोग्दमस्थता। तत्कू जितानां श्रवणमाघ्राणं चापि सर्वत। तदंतिमगतिं नित्यमेवं तद्भावनंसदा। इदमेवेंद्रियवतां फलंमोक्षो नचान्यथा। इत्यादिभि रुपामृत रसास्वादज निरोधेभ्यः फलमार्गीय विमुक्तिदेभ्यो रहिता विज्ञेयाः। रसेनानंददायक इत्यनेन द्विधाशृंगार रसाखिलानुभवशून्याः। गंधेन भक्तिदः प्रोक्तः। इत्यनेन साक्षाद्भगवन्मुखारविंद फलानुभवे भक्त्यंग निखिल मूर्तिमांस्तदनुभवात्परा-ङ्मुखाः। स्पर्शोनाखिल नुद्। इत्यनेन मुखारविंद फलवियोगानल लेशास्पर्श मात्रेणैव-तत्तापातिरिक्त तापादेः पंचपर्वाऽविद्योत्पादकस्य प्रध्वंसकस्तत्स्पर्श सुखानुभूतिरहिताः। मनोहर-स्तु नादेन योगेनात्म प्रवेशद। इत्यनेन वेणुनादेन भक्तियोग साहित्येन मनोहरेण गोविंदाप-हृतात्मानोनन्यवर्तित मोहिता। इति मोह लक्षणेनेतरानुसंधान विस्मारकेन परमांतरंग भक्तयोग मायाश्रय समुदाय संमत्ति तत्परेन नापहृतात्मानस्तदितर मोहेन स्त्री पुत्रधनाद्यासक्तिवंताः प्रहतात्मान इत्यर्थः। अत एव मार्ग विशयिणो मार्गानुकरणाखिल साहित्येन वैतालिका इति निःसंदिग्ध प्रकारेण ज्ञातव्या। नात्र निवेदनादि संस्कारे विद्यमाने एतेषां महात्म्यज्ञान पूर्वकं गौरवत्वं निश्चित्य वैतालिका इत्युक्तौ केनाप्यशेन शंकनीयं। यत्राग्निकुमारान्प्रति स्वयं

साक्षाद्भगवन्मुखारविंद फलवियोगाग्निना उक्तं । यदा बहिर्मुखाः यूयं भविष्यथ कथंचन तदा-काल प्रवाहस्था देहचित्तादयोप्युत सर्वथा भक्ष यिष्यन्ति युष्मानितिमति र्मम । न लौकिकः प्रभुः कृष्णो मनुतेनैव लौकिकम् । इत्यादिभिस्तत्रैते के भवन्ति न किमपि । तस्मादेवंविदः एवास्मिन्मार्गे मुखारविंदफल वियोगानलभाव संपत्तिमूर्तिमता विबुधा उच्यन्ते । नत्वेवमविदः । यद्यपि पूर्वभक्त्याचारोपदेष्टृमात्रत्वमुक्तं तथाप्यधुना तद्दाढ्यार्थमेव वाक्य निरुपण पूर्व-कमुच्यते इति न पौनरुक्तिदोषः ॥

एवं स्वनानावाक्योपदेशार्थावग भजनितानंदे भक्तिकृत ज्ञापकनामाहुः ॥ स्वार्थोज्झिता-खिलप्राणप्रियः ॥

स्वार्थोज्झिताखिलप्राणप्रियस्तादृशवेष्टितः ॥
स्वदासार्थकृताशेषसाधनः सर्वशक्तिधृक् ॥ २१ ॥

स्वार्थं निखिलमेव मुखारविंद फलवियोगानलाचार्य सेवार्थमेवोज्झितं सेवा विरो-धिथैस्तेषां प्राणादपि प्रियः । अथवा भक्तैः स्वार्थं स्वकृतार्थता सिद्ध्यर्थमुज्झितं निखिल भक्तिमार्गीय विरोधि यैस्तेषां प्राणपियः । स्वार्थोज्झिता व्रजजना एवासन्नान्ये हरिण्योपिच । तैरेव ताः स्तुताः । धन्यास्तुमूढमतय इत्यादिना । तद्भावाविस्कारहेतुभूतोभावार्थो निरुप्यते । व्रजवर घोषरत्न सीमन्तिन्यः सर्वाः भक्तिरुप मुखारविंद फलवियोगारूढ्यनुभवोऽत्पुत्कर्ष शुद्ध समाधिना-तद्भक्तेः साम्यत्वं निखिलंसमासाद्य साक्षाद्विधाश्रृंगार रसरुपस्य ब्रह्मणोभगवत आत्मन उत्तरार्ध भागोत्तरदलाख्य स्थायिभावैकरुपाः सर्वात्मभावाधिकरणरुपा अभवन् । मुख्यभक्तस्वामिनी तादृ-शत्वं बाह्याभ्यंतरभेदेन निखिलमूर्तिमत् तमापुः तेन स्वामिनीसाम्यातिमात्रकत्वेन समंस्वार्थं निखिलंनिरस्यंत्यो रमण प्रियाभिप्रायं प्रतिक्षणेषु नवनव विविध रसोद्दीपनालंबन विभावादि सामग्रीं जुषंतं पुष्णन्त्यः स्वसेवकत्वं द्योतयंत्यो गुणातीता गतगर्वाः सेवामेव कुर्वन्ति । तथैव हरिण्योपि कृतवत्यः प्रिया प्रणयावलोक विविधरसोद्दोपनीभिः सामग्रीभिः विरचितां पूजांदधुः । अत एव स्वार्थोज्झिताभि व्रजघोषरत्न सीमन्तिनीभिरेवस्तुता यतस्तत्रत्यानां विवृतौ श्रीमदा-चार्यचरणैपि प्रपचितमस्ति । भक्त्याच तादृशत्वंच सा सेवा सेवकोचिता । तत्र प्रथमंहरिणीनां भाग्यमभिनंदतीति प्रथममित्यनेन भक्त्या च तादृशत्वप्राप्तौ सेवा सेवकयोरधिकारो मुख्यतस्तासां हरिणीनामेव द्योतितस्तासां ज्ञानक्रिया प्रवृत्तौ निरुपधिस्नेहादेः शुद्धसर्वांग वास्तव भाव-संपत्तेः स्वेच्छातिमात्रकत्वादिति सर्वंसुस्थं । तथैव व्रजसुंदरीष्वपि बोद्धव्यम् । अत एव प्रभु चिकीर्षितेषु सेवाज्ञान विज्ञान क्रियाखिल चरितार्थेषु तासांफलकत्वमाचार्यचरणैरध्यवसीयते । तद्वदधुनापि पद्मनाभदासदीनां च । अत एवोक्तं । यः केवलं हरेरर्थेसर्वथा यत्नवान्स्वतः प्रसंगाद-पिनस्वार्थं महाभागवतस्तु स इति तस्मादेतन्निखिलं भावसमुच्चयार्थमभिप्रेत्यैव पितृचरणैरुक्तं । स्वार्थोज्झिताखिल प्राणप्रियः । ननु स्वार्थ विशिष्टानां प्राणप्रियोभविता न कदापीत्यत्रायमाशयः । कृष्णं फलरुपं भजंतः संतोपि स्वार्थिनः शश्वतः क्लिष्टा एव तिष्ठन्ति तत्रहेतु र्भजनविषयेऽव्यभि-चारदोष विधायकस्वार्थ विषयमध्यपातात्स्वकृतार्थसिद्ध्यर्थं वा भगवतः परमसौंदर्यानुभवार्थ च भजनादिक करणं भगवत्सेवोपयिकं पूर्वं निरुपित निखिलमुत्सृज्य तदेव स्वार्थाखिलां-गभूतं मंतव्यम् । द्रव्याद्यर्थं यत्फलरुपभजन तत्तत्केशाधिक्यविधायकमेवावगंतव्यं । "लोकार्थी चेद्भजेत्कृष्णं क्लिष्टोभवति सर्वदे"त्यादिभिर्वाक्यैः । अत एव स्वार्थोज्झितानामेव प्राणप्रिय उक्तः । वेणुरपिस्वार्थोज्झितो यतो यः मुखारविंदफल बलात्मन्ये प्राणादपि प्रियोस्ति यतोऽ-स्य वेणोः साधनसंपत्त्यभावपूर्वकत्वादेवसुतरां मुखारविंदफलानुभव विभूतौ बाह्याभ्यंतर यो सन्निधेः फलफलात्मकत्व दृश्यत एव नान्वेषण प्रयासः कश्चन । किंच स्वार्थं इन्द्रियाध्यासादिषु वा स्वकृतार्थता सिद्धये साधनान्वितेषु हेतुषु प्रवृत्तिस्तावत्पर्यंतं भवति । यावत्पर्यन्तमुपमि-

मितिमुल्लंध्य साक्षात्परमसौंदर्य सांद्रेण व्रजति तद्वतः स्वार्थोज्झितो भवति । स्वार्थाभिनिवेश विधायकं तदतिरिक्तानुसंधानादिकं प्रध्वंसकं भगवतः परमसौंदर्यसाकाराखिलत्वं तत्प्राप्तौ सत्यामेव स्वार्थोज्झितो भवतीत्यनुमितिः । अत एवोद्धवंप्रत्युक्तं भगवता । "देहश्चनश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्वगमत्स्वरुपमि"त्यादिना "देहाध्यासादेः प्रतिबंध समुदायत्वस्य प्रध्वंसकं साक्षात्प्रत्यक्ष प्रमाण विषयरुपं भगवतः परम सौंदर्य साकाराखिलत्वमेव न तूपमित्यादिकं । अत्र पश्योपमिति । जन्यं यन्निखिलं तत्तदतिरिक्तं वियोगढ़ प्रकटित साक्षाद्भगवन्मुखारविंदफल वियोगाग्नि भक्तिमार्गस्था इदानींतनाः पद्मनाभदासादिभ्योभिन्नाः भगवतः परम सौंदर्यादेऽनुचिन्वन्ति । दृष्ट श्रुताभ्यां मनसानुचिंतयंस्तदा किं तत्सिद्ध्यति किंच सिद्धयेदपि चेत् दृष्टश्रुतयो मुंखारविंदफल वियोगाग्ने संनिधेः सांप्रतत्वंस्यात्तदाभावं तु दृष्टश्रुतयोः प्रकृति प्राकृतप्रपंच मध्यपातात् व्यक्तत्वमेव शुद्ध्येत । यथा कश्चिद्गवय शब्दार्थमज्ञानन् कश्चिदारण्यक पुरुषाद्गो सदृशं पश्यति ततोऽसौगवय शब्दवाच्य इत्याकारा उपमिति । (सन्निधेः फलफलात्मकत्वं दृश्यत एव नान्वेशण प्रयासः क) रुत्पद्यते तत्कारणं सादृश्यं ज्ञानं उपमानं अत्र दृष्टव्यमारण्यकत्व एव गोशब्दार्थस्य निर्वाहात् । सादृश्यज्ञान उपमान प्रतिबंधकत्वान्न साक्षाद्गो दर्शनमभूत् तथैवैव विदामपि यतोऽनुमितावुपमितौ शाब्दिकेपि च साक्षाद्भगवन्मुखारविंदफल वल्लभाग्नेर्मध्यपातादेव तेपि दृष्टानुराग संपादकाः भवन्ति । तदभावेतु चन्द्रभान्वोस्न्येवस्थितः कमलं सरसि शब्दोवरणे वस्तुतस्त्रय एवाप्रयोजकाभवन्ति । तस्माद्भक्तिमार्गमर्यादया सेवाकथाकीर्तनादिकं करणविधावपि वस्तुविचारेक्रियमाणेऽन्वयव्यतिरेकाभ्यामेव निर्वाह परिणितफलाप्तौ सौष्ठवत्वं नोचेत्कथं इत्यात्रायसिद्धान्तः एवं विदात्र सावधानाभवेयुर्मार्ग प्रवृत्त्युपरिलक्ष्यं विधाय ॥ एवं पूर्वनाम्नि भक्तानां स्वार्थोज्झितानांवेणोश्च प्राणप्रियत्वमुक्त्वा प्राणप्रियत्वे ज्ञापक क्रियाज्ञापकं नामाहुः । <u>तादृशवेष्टितः</u> ॥ तादृशैः स्वार्थोज्झितैः सर्वात्मभाववद्भिर्व्रजजनैः परमांतरंगभक्तैः वेष्टितः यदि सर्वाः व्रजसुंदर्यः विविध श्रृंगार रसोद्दीपनीभिः सामग्रीभिरभिभूतासन्मुखे आगत्य स्थिता भवंति भगवतस्तदागंऽमंडलादिषु तथाविधिवत्वेनैव प्रतिबिंबिता भवन्ति । निखिल स्वार्थोज्झित साधनाधिक्य साध्यफलमिदमेव । वेणोस्तु स्पष्टमेव नान्वेषण प्रयासः ॥ ननु निरंतरं तद्भाववतां कदाचिद्भाव व्यभिचारदोषः प्रसज्जेतेति तन्निराकरणायाहुः ॥ <u>स्वदासार्थकृताशेषसाधनः</u> ॥ स्वदासार्थमेव वीक्ष्यालकावृत मुखं भवामदास्यरिति प्रार्थन एव यो दासभावस्तद्भाववतां दासानामर्थमेवकृतान्यशेषाणि सर्वाणि साधनानि येन सः । अलकावृतेमुखे यद्दासभावः सोनुभविनां व्रजजनानामेवानुभवैक वेद्यः स एव स्वदासभाव प्राप्तवतां स्वदासानामर्थमेव कृतानि तापात्मकानि सर्वान्यनुभव विक्षोभात्मकान्यशेषाणि साधनानि यैः । निःसाधन फलात्मा प्रादुर्भूतोऽस्ति गोकुले इत्युक्तत्वात्फलात्मकेभ्यः साधनेभ्यऽतिरिक्तानि यानि साधनान्यशेषाणि तेषामत्र विनियोगादर्शने स्वदासार्थकृताशेष साधनानीत्युक्तौ कथं युज्येरन् तानि न कदापीत्यर्थः । यतो वीक्ष्यालकावृतमुखे भवामदास्य इति तासामुक्तिः भाव संदर्भे मन आविश्य विमर्षणीयं भवति । श्रीमुखावलोकानंतरमेव तन्मार्गीयत्वेन दासभावसंपत्तिमापुस्तर्हि तु दासभाव संपत्याप्तौ मूलबीजं मुखारविंद एवास्तीति निश्चये यदि दासभावसंपत्ति संप्रदाय प्रवृत्ति मुखारविंदफल वियोगाग्नौ तदातु तत्प्राप्त्यर्थं यानि साधनान्यशेषाणि तेषामपि मुखारविंदफल फलात्मकत्वं फलवियोगाग्न्यात्मकत्वं कथं न मंतव्य किन्तु मंतव्यमेव । अशेषत्वोक्त्या यथा मुखारविंदफल वियोगाग्नेर्नानात्वमनेक रासादि लीलावयव विशिष्ट ततत्प्राप्तिसिद्ध्ये तत्तन्मार्गीयत्वेन यानि यानि साधनानि स्व स्वरुपांग भूतानि स्वदासार्थं तेषां कर्तेत्यर्थः । नतु तद्व्यतिरिक्तानि इति बोद्धव्यं । स्वार्थोज्झिताखिल प्राणप्रिय इत्यनेन व्रजजनाएवोदाहृताः वेणुश्च । पुनस्त्वयं तादृशवेष्टित व्रजवर घोषरत्न सीमन्तिनीनां भावसंपत्तिभिरेव वेष्टितो वेणुनेति तु स्पष्टः पुन स्तनैव स्वरुपेण वाच्य कथं तेषामर्थ

तत्फलात्मकेभ्यः साधनेभ्यः अन्यः साधनानि प्रकटं करिस्यन्ति स्वस्य फलरुपत्वात्तत्करणे स्वस्मि-
नैव विरोधापत्तौ नतत्करणे प्रसज्जेत । स्वास्थ्य वाक्यं न कर्तव्य दयालुर्न विरुद्यते भगवान्फल-
रुपत्वान्नात्रबाधक ईष्यते । इत्यादिनापिच एतन्निरुपणान्यन्परमुत्कर्षाभावात् तदीयैरपि तद-
तिरिक्तानि साधनानि कायवाङ्मनोभिरुत्सृज्य यान्युक्तान्यशेष साधनानि तान्येव मंतव्यानि।
यथा विरहानुभवैकार्थं सर्वलौकिक वैदिकादिकं त्यक्त्वा पुष्टिभक्तिमार्गीय चतुर्थाश्रममाविवेश।
सर्व व्रजसुदर्यस्ततो वानप्रस्थ धर्मानुगामीनि कर्माणि "गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमा-
लापविहारविभ्रमैराक्षिप्तचित्ता प्रमदारमापतेस्तास्ता विचेश जगृहुस्तदात्मिकाः" इत्यादि
रुपाणि पूर्वानुभवानुभूति संगतानि साधनानि कृतवत्यस्तथैव तथांगभूतान्यशेष साधनान्यपि
मंतव्य केनहेतुणा विरहानुभवैकार्थंमिति अनेन विशेषण रहरिति विरहस्तु पूर्वोक्त प्रकारेण
साक्षाद्विधाश्रृंगार परम सौंदर्यसाकार विशिष्ट शुद्ध रसात्मक ब्रह्म श्रीमद्यशोदोत्संगलालित-
स्तस्य परम सौंदर्यं साकारातिमात्रकत्वाद्रहस्त्वं राधा सर्वस्वसंपुट विधानत एव रहस्त्वं
अलक्ष कुटीरस्थ इत्यादि विरहस्त्वतदनुभवार्थं यदि तथा विधिवत्वेनैव त्यागादिभिस्तदंग-
भूतानि साधनानि भविष्यन्ति तदैव तत्प्राप्तौनकोपि प्रतिबंधादिकं भगवत्कृतमप्यागत्य प्रतिबंध
करिष्यति तदनुभवार्थं त्यागादेरपि तथा विधिवत्वेन रहस्त्वस्यातिमात्रकत्वात्समवाय संबंध-
स्यापि परस्परयोः साधर्म्यातिशयात् युक्तं च साधनाधिक्यात्साध्यादिकं सुरादिषुनाधिक्यं
यदि साधनंस्यात्साध्ये प्रयत्नं कुत इत्यादिनापि च। अत एव पितृचरणैरुक्तं विरहानुभवैकार्थ-
सर्वत्यागोपदेशकः इति तद्विरहानुभवातिरिक्तं न भगवद्धर्मादिकं तत्त्यागोपदेशक इत्यर्थः।
तदत्यागे तद्विरहानुभवेपिगंतुमनुभवितुं नपारये । तद्विरहस्य यथैकातात्ति मात्रकत्व धर्मास्त-
स्यात्मानुभवातिरिक्तं यन्निखिलं तत्त्यागविशिष्टं तथैव तत्फलप्रेप्सूनां तदनुभविनां यदिस्यात्तदैव
परस्परं अनुभवेऽनुभविनौ परमसौष्ठवत्वयोः समानाधिकरणकत्वादितिभावः। अतोऽस्मिन्मुखा-
रविंद फलवियोगाग्नि भक्तिमार्गे विरहशब्देन साक्षाच्छीमत्स्वामिनीनां निगूढभावः पुष्टिमार्गे तत्वं
कृष्णपदार्थो नटवर वपुरुच्यते तदनुभवार्थं सर्वत्यागोपदेशक इति । तदनुसंधानानुसंधत एव
स्वदासार्थकृताशेषसाधन इति स्व पदोपादानात्मर्यादोक्त साधनानि निराकृतानि वेदितव्यानि॥
ननु यद्यपि स्वदासार्थं कृतान्यशेष साधनानि तैस्तद्रहोनुभव भावसंपत्ति सौकर्यं भवद्भि निरु-
पितमस्तु तथैव तथापि साधनान्यपि तद्रहोनुभवातिरिक्तानि भवन्ति मदितरभजनापेक्षणं वा व्य-
पोढमित्यादिवाक्यैस्तेषां साधनानां इतरपक्ष न्यासंगात्तत्साध्यफल साधकत्वात्किमुक्तं स्वदा-
सार्थंकृताशेष साधन इति चेत्तत्रवदामः । सत्यम् अत एव पितृचरणैस्तवशंकापरिहारायाग्नि-
म नाममुक्तं॥ सर्वशक्तिधृगिति ॥ सर्वालौकिक्यः शक्तयो योगमायांतरंगभक्त्याद्याः सर्वभव-
नसमर्थरुपाः स्व रसात्मक रौद्रगुणाखिल सामग्री विशिष्टाः द्विधाश्रृंगार रसरुपे परमसौंदर्य
साकाराखिलावयववति ब्रह्मणि प्रापणेच्छोद्रेक संवृत्तासु धृष्णोऽतिप्रगल्भास्तासु स्वसामर्थ्यं यथा
योगमाया शक्त्यादिभि रासोत्सवं प्रतिवरदान प्रस्तावादिषु निरवधिकर्तुमकर्तुमन्यथाकरणत्वं
प्रदर्शितं तथैव प्रतिक्षणेऽभिनवतरुणानंदरुपेण प्रकटं करोतीति सर्वशक्तिधृक् । अत्र शक्तिषु-
प्रागल्भ्य कथनेन मुखारविंद फलानुभव प्रापकानि साधनानि तेषु कदाचिन्मुखारविंदफल वियोगाग्निः
साधर्म्यातिमात्रकत्वस्य भक्तभावनाग्निमांद्यदोषतोऽभावःस्यात्तदा ताः शक्तय स्व स्व साम-
र्थ्यैनैव तत्फलपर्यवसायित्वमेव संपादयति । तस्मादत्र न पूर्वपक्षावसर इति सर्वमनवद्यं ।
एतदभिसंधायैवाग्निकुमारा अवादिषुः सर्वशक्तिधृगिति ॥
एवं स्वगत मुखारविंदफल वियोगाग्नि भक्तिमार्ग प्राकट्यार्थं दैवसृष्ट्युद्धारार्थं यथा वेणु-
द्वारा व्रजवर घोषरत्न सीमन्तिनीषु द्रुम द्विजादिषु तृणादिषु कृतं तथैव करणाय भूतले प्रकटीभूत्वा
स्वांगभूत भक्तिमार्गे पद्मनाभादिषु स्वकीयेषु स्वोपदेश स्वाचरणादिना स्व प्राकट्य समये तेषु

स्व निखिल नानाविभूतिमत्तापाङ्ग्यात्मकं परमफलप्रदमितर प्रपंच देहाध्यास प्रध्वंसकं तदेव फलविधायकं सम्यक ज्ञापयित्वाग्रेऽपि या मूल सृष्टिमध्यस्थानुसरिता: मूल लीलामध्यपातिनस्तेषु तथा विधिदत्वेन मुखारविंदफलवियोगाग्नि भक्तिमार्ग प्रवृत्ति: स्ववंश व्यतिरेकण न भविष्यतीति स्व वंशाकरणमिति ज्ञापनायाग्रिमनामाहु: ॥ भुवि भक्तिप्रचारैककृते स्वान्वयकृत्पिता इति ॥

भुवि भक्तिप्रचारैककृते स्वान्वयकृत्पिता ॥
स्ववंशे स्थापिताशेषस्वमाहात्म्य: स्मयापह: ॥२२॥

भुवि भक्तिप्रचारैककृते स्वान्वयकृत्स्ववंशकर्ताऽत्रान्वय पदस्य पुत्र परत्वं ज्ञेयं । एक पदेन मुख्यत्वं ज्ञापितं । वंशप्रकारांतर निराकरणपूर्वकं केवलमौरसत्वं ज्ञापनायोक्तं ॥ पिता ॥ अङ्ग्यन्वयस्याङ्ग्यात्मकत्वाद्ब्राह्याभ्यंतरयोस्तद्रूपात्मकत्वात्तत्स्वरुपलीलागुणसामग्र्यखिल चरिता-र्थताभिरपि वल्लभाङ्ग्यात्मकत्वात्स्त्रीभावाग्निमुख्य स्वरुपगुणविशिष्टातिमात्रकत्वादौरसत्वमुच्यते। तच्छुद्धमौरसत्वं तद्विरहाङ्ग्यंगाखिल विभूतिमदिति ज्ञापनाय पितेति । न तु लौकिकत्व साधर्म्येन साकं पितापुत्रयोरनुसंगोविभावनीय: । न लौकिक: प्रभु: कृष्णोमनुतेनैवलौकिक-मित्यादिनापिच वस्तुविचारे क्रियमाणे निरुपिताखिल सान्वयभाव संपत्ति: । सात्वग्निकुमारेष्वे वेत्युद्धाव्यैव मयाव्यक्तविवृत्तौ लिखितमस्ति । अत्रान्वय पदस्वंपुत्रपरत्वं ज्ञेयं किंचाग्निकुमा-राणां कृपयैवाग्रेऽग्निवंशेपि पूर्वोक्त प्रकारेण मुखारविंदफल वल्लभवियोगाग्निमयत्वं तदवयवत्वं भविता । तदा तथात्वे तथात्वं कथं न मंतव्यं किंतु मंतव्यमेव । परंतु यदा भविता तदैव नोचेत्कथं । वस्तु तस्तु यथाग्नेर्विस्फुलिंगा जायंते ते तत्सदृशा एव पुन: हव्यादिना एधयन्ते । तत्र पश्य वृद्धावप्यग्नित्वं शूक्ष्मत्वेप्यग्नित्वमाद्ये तयोर्न विकृतत्वमंगीकुर्वन्तोऽविकृता भवन्ति । साधारणाग्ने: वंशप्रवृत्तेरियं व्यवस्था तदा साक्षाद्भगवन्मुखारविंदफलविरहाग्ने: सान्निध्यमात्रेणैव कृष्णप्रेमा विमुक्तिदस्य निरवध्यलौकिकानंतत्वविशिष्टस्य लीलालोके व्रजवनयोश्च तापाग्नि-ज्वालातिव्याप्ति संप्रदायेन समंतृणादिषु पुलिंदीनां भावना भावाभिभूतेषु द्विधाश्रृंगार रसावयव संपादकस्यवंशे तथात्वे सत्येव तथात्वं मंतव्यं । नत्वग्निस्थानीयत्वे तदुपशामकजलत्वेन-मंतव्यं वाच्यम्। एतदुद्भाव्यैवास्माभिर्निर्णीतं । अत्रान्वय पदस्य पुत्र परत्वंज्ञेयं । अग्रे तत्कृपया भविता नान्यै: साधनै: ॥ ननु पितृत्वे स्वतुल्यत्वं यदि वंशेनस्यात्तदा कथं स्व प्रवर्तित भाव-प्रवर्तकत्वं भवेदितिशंका निरासायाहु: ॥ स्ववंशे स्थापिताशेषस्वमहात्म्य: ॥ स्व वंशेस्था-पितमशेष स्व महात्म्यंयेन स: । इत्यनेन स्व वंशेऽग्निकुमारे एवाशेषमहात्म्यं स्थापितं । स्व महात्म्यं तस्वरुपकत्वं किं साक्षाद्विधाश्रृंगाररसात्मक मुखारविंदफलवल्लभाग्नेरतिव्याप्तिधर्म-त्वावच्छिन्नस्य रसात्मकब्रह्मणो भगवत: परम सौंदर्य वास्तववस्तु साकाराखिलविभूतिमत सर्वत्र लीलालोके प्रतिक्षणेऽभिनवनवभाववैचित्र्याद्रासाद्यनेकलीलासंपादकत्वं तत्तदनुभ-वादेर्दानकर्तृत्वं स्व गुणातीत साहित्येन तदेव महात्म्यं । अशेषत्वकथनात । यथा मुखारविंद फलवियोगाग्नेर्नानात्वमनंतत्वं तन्महात्म्यादेरपि तथात्वादनंतत्वमुद्भाव्यैव पितृचरणैरुक्तं स्ववंशे स्थापिताशेषस्वमहात्म्य: । तन्माहात्म्यस्यानंतत्वविशिष्टस्य स्वस्यैवानुभवैक-गम्यमानत्वात्स्वपितृवरणै: स्वस्मिन्नेव यत्स्थापितमङ्ग्यवयवसमवायसंबंधातिमात्रके तत्स्व-कीयेषु स्थापनायोक्तं स्ववंशे स्थापिताशेषमहात्म्य इति । वल्लभाग्नेरैश्वर्यादिर्यन्महात्म्यं वेणु-द्वारा व्रजवर घोषरत्न सीमन्तिनीभिरनुभूतं गीतम् निरवधि निरुपधि तन्निखिलान्वितोऽग्निकुमार इत्यत्रायमाशय: । एतद्भावसंपत्ति: सात्वग्निकुमारेष्वेवात उक्तं मयाऽन्वयपदस्य पुत्रपरत्वं ज्ञेय-मिति सर्वं नाम जस्वम् । वस्तुविचारे क्रियमाणेऽग्रे: ... साधनैक लीलानां प्राकट्यमस्ति ।

तस्य बाह्याभ्यंतरयोः प्रत्येकांगस्य परम सौंदर्य साकाराखिलविभूत्यधिकरणभूतस्य तथात्वात्। एवं सति सर्वेषां मूललीलांगभूतानां पदार्थानामग्निकुमारत्वमेवास्ति। परंतु विवेकस्त्वयं। अस्मिन्नग्निकुमारे तत्समुदाय महात्म्यमशेषं स्थापितमस्ति। अतस्तथा विधिवत्वेनाग्रे भूतले मुखारविंदफल भक्तिमार्गे निरवधि निरुपधि परमानंदानुभवानंतत्वविशिष्टं वितत्या प्रकटं करिष्यत्येव। तस्मादङ्गयानंदाधिक्यानाधिक्याभ्यां तारतम्यं लीलालोके व्रजवनयोश्च भावभावनादिस्वस्ति। तत्तारतम्य विशिष्टेन समं तदुद्भावनादिकं फलपर्यवसायित्वेनैव सेत्स्यति। तस्मात्तथैव कार्यं यथा हाहेति शब्दः प्रवर्तते सर्वत्र। तत्र विरहानुभवविभिर्विवेकः कर्तव्यः पुत्रशोकेपि हाहेति तदीयाः वदन्ति धनादिगते सत्यपि ते धनमदांधाः हाहेति वदंति विषयिनोपि स्व विषय गतार्थेसति हाहेति प्रवदंति। व्रजघोषरत्नसीमन्तिन्योपि पुनः पुलिनमागत्य हाहेत्यवोचत। अस्मत्प्रभुचरणा अपि प्रवदन्ति। हा हा नाथ शरण्य हा गोपीजनाधार हा वृन्दावनभूषण हा हा सा नंदानंदसर्वस्व इत्यादिना व्रजवरघोषरत्नसीमन्तिनीनां हाहेत्यस्य ध्वनेः। श्रीमद्वृन्दावने सरस सारस हंस समाध्यासादिषु यद्भूत्तन्मया निरुपितमस्ति पूर्वं। अग्निकुमारणां हाहेत्यस्य परमगहनागतिरुपायां भावसंपत्तौ कनकसूत्रत्रिसूत बृहदति सुभगामलमुक्ताफल संशोभिश्वासदरोन्नतिनतिमन्नाम्नापुटम तत्स्मृतौ तद्दर्शनाभावेपि हाहेति। पद्मराग प्रतिभटवत्कर्णिकारशोभि कर्णोपरिभाग गुंजा पुंज संवलित बर्हिबर्हाद्दू ग्रथित विविधमणिजालमुक्ताफलप्रकर संकीर्णकुसुमाकल शिखराहित नीलमण्युपरिस्थित स्थूल मुक्ताफल संशोभिमुकुट विराजमानोत्तमांगम्। इति स्मृत्वा हाहेति ध्वन्यंतरे स एव मुकुटः स्व समृद्धि साहित्येन नीलकुन्तलैर्गलद मंद मरंद सुरभित विविध रसोद्दीपन संप्रदाय प्रसंकुलैश्चाकचिक्य सुषमा संवृतैः कर्णाभरणज्योत्स्ना प्रभाव्याप्ति संगतैः मुकुटप्रभा विविध रत्नमणिजालज्योत्स्नायूथ प्रतिबिंबादर्शसदृशैः स्थूल स्थूल मुक्ताजालमोहनांग मुकुटांतरवर्ति तत्प्रतिबिंब संशोभिराकाधीशमिवाखिल व्रजवर घोषरत्न सीमन्तिनीनां मनोनक्षत्रैरावृतं गगनं तासां नाभिकोशान्तरीयं आकाशं तद्भावसंपत्तिव्यापकैर्मुखकमलावृतं तन्निरवधि शोभा समुदाय संधातवहतागत्यस्थितो भवति हा हेतिध्वनेरलं करिष्णुरितिभावः। मार्गस्तु हा हेति ध्वनि निर्वाहात्मकोऽस्ति। तत्र स्वास्थ्यातिमात्रवत्वेनैव व्यवह्रियते। तदुःखानुभव भावसंपत्त्यभावे। तस्माद्वस्तु विचारे क्रियामाणेऽग्निवंशस्यैवायं धर्मोऽस्ति यस्मिन्तस्यानभिव्यक्तस्य व्यक्तिरस्ति स एवाग्निवंशोद्भूत रतिप्रभा मुखारविंदफल वियोगाग्ने स्तथात्वस्य समुदाय प्राचुर्यात्। परंतु तद्दानं तु वल्लभाग्निवंशेपि श्रीमत्स्वामिनीनां कृपापूर्ण प्रमेयबलेनैव भवति। नान्यैः साधनैः। अत एव पितृचरणैरुक्तं। श्याम सुंदर शिखंडशेखर स्मरहास्य मुरलीमनोहर। राधिकारसिक मां कृपानिधे स्व प्रिया चरणकिंकरीं कुरु। प्राणनाथ वृषभानुनंदिनी श्रीमुखाब्जरसलोलदृपदत्व प्रियापदतले कृतस्थितिस्त्वां भजामि रसिकेन्द्रशेखर। कृपयति यदि राधा बाधिताशेष बाधा किम परमवशिष्टं पुष्टिमर्यादयोर्मे। वदति यदि कथंचित्स्मेरुहासोदित श्रीद्विजवरमणिपंक्त्या मुक्तिशूक्त्या तदा किम्। किंकरी भवितुं मे राधिका श्रीपद्मसद्मनी धाम्निकामये यत्र पिच्छ मुकुटं तवालुठद्धाति॥ इत्यादिनाग्निकुमाराः स्व सर्वस्वं तस्यामेव निवेदयंतः प्रार्थयन्ते। तत्र हेतुर्यत्र पिच्छ मुकुटं तस्याश्चरणोपरिलुठति तत्रावगम्यत एव रसात्मकब्रह्म श्रीमद्यशोदोत्संगलालितः स्वयं स्व सर्वस्वं तस्यामेव निवेदयन् सर्वेश्वरोपिसन् योगिनां व्रजजनानांध्येयोऽपिसन् मुख्यस्वामिनी सत्ताधीनत्वादेव व्यवहरति। अत एव तद्दानं तु तस्याः कृपाधीनमस्ति। तस्माद्वंश अत एव नवरत्नेउक्तं प्रभुभिरपि। सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यतीति। तस्माद्वंश पद पुत्रपरत्वं ज्ञेयमित्याशयेन मयोक्तं। अग्निकुमारस्य साक्षाद्व्रजनानंद पुरुषोत्तम मुखारविंदफल श्रीभावाद्यखिल भावस्य प्रत्ययबात्मकत्वात्। अग्रेतदभावात्तथात्वेनैवाध्यवसीयते तथात्वेसति तथात्व चात्र को वा विरोधः। व्रज... सर्वैः गोपादिभिः ...

प्रत्यहं श्रृंगारालंकारादिभिरप्यनुभूतः परंतु विरहाग्न्यनुभव मध्यपातित्वाभावात्तेषामनुभव सौकर्यं संपतौ कृत्रिमत्वमेवाभूत्। तेषां ब्रह्माण्डांतरवर्तित्वात्। ननु विद्वन्मंडने व्रजेग्निकुमारः श्रुत्युक्त सिद्धं नित्यत्वं संपादितमस्ति तत्रैतेषां गोपानां कथं ब्रह्माडांतरीयत्वं अनुभावसौकर्य संपतौ कृत्रिमत्वमभूदितिचेत्तत्रवदामः। युगलगीते सुबोधिन्यां। उरुधेति अनेकधा निजशिक्षाः निजेनैव शिक्षाशिक्षणं अभिव्यक्ति प्रकाराः यासु अनेन नादब्रह्म नित्यं निरुपितं तत्र क्रिया शक्तिसाधनमिति तस्य लौकिकत्वे कथं नाद अलौकिको भविस्यतीत्याशंक्य तस्याप्यलौकिकत्वाह। विविधेषु गोपचरणेषु गोपानांसंचार विशेसेषु विदग्ध इति। गोपवेशाचार न वेदोक्ताः किंतु लौकिकाः ब्रह्मांडांतरस्थिता अपि भवन्ति तेन लौकिकेत्राप्रसिद्धाः नापि वेदे। भगवांस्तु सर्वत्रैव विदग्धः यतो ब्रह्मा यं प्रकारं कृतवानित्यादिना तेषां ब्रह्माडांतर वृत्तित्वमनुक्त सिद्धमेवास्ति। यतो मया निर्णीयते व्रजं निखिलं पृथिव्यांभारतेक्षेत्रे एवास्ति परंतु भगवद्धामरुपत्वेनास्यापि नित्यत्व विज्ञेयं चेदस्य ब्रह्मांडातीतत्वं भवेत्तदा तेषां गोपानां ब्रह्मांडातरीयत्वं लौकिकत्वं वेदेऽप्रसिद्धत्वं स्वयमाचार्याः किमर्थं वदे पुरतः सुबोधिनीभावार्थं संगत्या निर्वाह सौष्ठवत्वे योस्पष्टार्थः स एव तद्भावुका सर्वजनीनोऽग्निकुमारैरप्येतदुद्भाव्यैव विद्वन्मंडनेऽस्य नित्यत्वं प्रपंचितमस्ति। भगवत्कृते नित्यत्वात्सो यत्कगेति तस्यापि तथात्वाद्वनेपि कथने नित्यत्वं मंतव्यं परंतु समग्र सुबोधिनी भावसंपत्ति समुच्चयार्थमाकलय्यैव तस्माद्यद्यपि ते गोपादयो निकटवर्तिनः संति प्रभ्वंगसंगोऽस्ति तथापि तेषां ब्रह्माण्डान्तरवृत्तित्वात्तत्स्वरुपाज्ञानान्नते स्वरुपानुभव संबंधि न उच्यन्ते। संबंधेनैव संबंधिनस्तत्रापि भगवत्संबंधस्य लौकिक संबंधस्य वैलक्षण्यातिमात्रकत्वात्संबधस्यैव मुख्यत्वादितर संबंधस्य न विनियोगादिति मर्यादाप्रसंगादग्निवंशेपि साक्षाद्भगवन्मुखारविंदफल वियोगानल संबंधेनैव संबंधातिप्राचुर्यादग्निवंशत्वमुपपद्येत तदभावे पूर्वोक्त प्रकारेण बोद्धव्यं भवति तदीयैः। यद्यप्यस्मत्कुलं निष्कलंकमित्युक्तमग्निकुमारैः परंतु भगवन्मुखारविंदफलवल्लभाग्न्यभिमुखानुभव दाहादि सुखानुभव एव न तु तद्रहिते। एवं मार्गाधीशेनोक्तमग्नि कुमारान्प्रति। "यदा बहिर्मुखाः यूयं भविष्यथ कथंचन तदा काल प्रवाहस्था देहचित्तादयोप्युत" इत्यनेन प्रभ्वनुभवाम मुखानुभव साक्षात्संबंध फलाप्तावेव निष्कलंकत्वं तदभावे सकलंकत्वमिति अभिप्रेत्योक्तं। अस्मत्कुलं निष्कलंकं तत्र हेतुः श्रीकृष्णेनात्मसात्कृतं श्रीकृष्णे: साक्षात्स्वामिनी स्त्रीभावाग्न्यात्मकः सः स्वात्माधीनं तदैव करोति यदा मुखारविंदफल वियोगाग्निनास्नातं रक्षति न तु तदग्निस्नानाभावेन श्रीकृष्णेनात्मसात्कृतमेव संति। यदा बहिर्मुखा यूयं भविष्यथ कथंचन तदाकाल प्रवाहस्था देहचित्तादयोप्युत सर्वथा भक्षयिष्यन्ति युस्मानितिमतिर्मम। न लौकिकः प्रभुः कृष्णोमनुतेनैव लौकिकम्। इति कथंवदेयुराचार्यास्तस्मात्फलानुसंधान सिध्यंतरित परामर्श समुदाय समुद्रालोढनेन सारसमुच्चयार्थोपलब्धिरियमेवजाता अग्निवशेपि अग्न्यात्मकत्वेनैव वंशशब्दार्थ परमफल पर्यवसायी भवति अत एवोक्तं पितृचरणै भूविभक्ति प्रचारैकक्रते स्वान्वय कृतिपतेति। पृथिव्यां भक्ति प्रचारैककृते स्वान्वयकृदित्यर्थं। तदाविष्कार हेतुभूताभावसंपत्तयो मुखारविंदफल वियोगाग्न्यनुभवाकृतिवत्योऽग्निकुमारेस्वेवेति विज्ञायैव मयोक्त अन्वयपदं पुत्रपरत्वं ज्ञेयं। किंच द्रष्टव्य सुबोधिन्यां व्रजेशसुतयोरनुवेणुजुष्टमित्यस्य विवृतौ। नहिबलभद्रः व्रजेशस्य पुत्रः किंतु कृष्णावेशेन कृष्ण एवाविशतीत्यनेन साक्षात्फल रुपकृष्णः श्रीमत्स्वामिनीनां विरहाग्नि यज्ञफलरुपस्तदाविर्भाव विशिष्टत्वेनैव वलभद्रे कृष्णत्वमाचार्यैः निरुपित न तदाविर्भावाभावेन। तस्माल्लीलालोकेपि व्रजवनयोश्चाधुनापि प्रकटित साक्षाद्भगवन्मुखाग्न्यपि साक्षाद्भगवन्मुखारविंदफल वियोगाग्नेः संबंधादेवस्वयं साक्षाद्विरहाग्न्याचार्याः संबंधं मनिरे। शुद्धाऽध्यास न सत्कृतिमंगीकुर्वन्ति। इत्यत्रायमाशयः। किंच द्वारिकायां प्रभासासुर व्यामोह लीलाप्रस्तावे भगवदन्वय एवस्थितः परंतु तदग्न्यभावे तत्स्वरुपाज्ञानात्तेषां

…नादृश्यवस्थाभूत् । वस्तुतः स्वस्य विद्यमाने स्वेनैवकृता तेषां स्वरुपानुभव संबंधाभावस्तेषु स्ववंश- …न ददृशुर्न मेनिरे इतिहेतो अत एवोक्तं प्रभुभिरपि तथैव 'न लौकिकः प्रभुः कृष्णोमनुतेनैव लौकिकम्।' …त्यादिना तद्विरहाग्न्यनुभव पूर्णप्रमेय स्वतंत्राखिल लौकिकभावादलौकिक वंशेपि लौकिकत्व- …यातिशयाद्वारुणीपानादेः संसर्गतस्तदनुभवाभावाविष्कारहेतु मूर्तिमानभूदिति यावत् । यतो- …स्मिन्मार्गे आगत्य नाम निवेदनादिक संस्कार समधिगम्य निश्चिततां न व्रजेयुः मार्गस्य पूर्वोक्त …कारेण विरहाग्न्यात्मकत्वात्तदभ्यासेनैव सिद्धयतीति नियमात्तस्मात्तदीयैरपि निरतरं पठनी- …मिदं मंत्रं। "हा कृष्णमुखारविंद विरहाग्नेः" गुप्ततयाऽनिशं मृश देहकृत्यादावपि मनसि पठनीयं। एतस्य जप्यन्तरे कश्चन प्रतिबंधेनापि मध्ये व्यवधानो न कर्तव्य इति पितृ चरणै र्यदुपदिष्टं मह्य तत्तदेवास्माभिरप्युपदिश्यते । इदं तु द्वादशाक्षरात्मकं मंत्रं साक्षाद्भगवन्मुखारविंदफल त्रित- यात्मक वह्निभाग्न्यनुभव संसिद्धय एव युज्यते । अस्याश्चग्न्यात्मकत्वं संपादकत्वं नैसर्गिक धर्मत्वात्तस्मादिदं कस्याग्रे न निस्कासनीयं पठनीयं गुप्त तया। किंच मैत्रेय आगते सति स्वयम- स्वत्थे प्रसन्नोभूत्तस्मिन्स्वस्वरुप ज्ञानाधिकरणत्वात् कुलक्षयेपि शोकमपि नाकरोत् तस्मिन्माचि- कत्वस्याधिक्य दर्शनादत एव दारुकं प्रति उक्तं लोकवेद प्रसिद्ध पुरुषोत्तमेन 'दृष्टमे ते सर्वे मायाविन' इत्यादिना । अत एवालौकिकः प्रभुः यद्यपि लोकवेद प्रसिद्ध पुरुषोत्तमस्तथापि ज्ञानभक्ति संप्रदाय निरुपणादौ तद्विरहाग्नि मुखारविंदफलांशकलाविभेदेन तस्याग्नेर्मध्यपाता- त्सारसमुच्चयार्थं तत्तदंगभूतेन भक्तिमार्गं पर्यवसायित्वमेव मंतव्यं तस्य तद्विरहाग्न्यांतरीय- त्वस्य संगत्या तथात्वादिति य आवरण अतः ॥ स्मयापहः ॥ स्मयमाश्चर्यमपहंति दूरीकरो- तीति स्मयापहः ।

ननुसिद्धवत्कारेण स्मयापहत्वकथने को हेतुरित्याशंका निराशाय हेतु निरुपकं नामाहुः॥ पतिव्रतापतिः ॥

पतिव्रतापतिः पारलौकिकैहिकदानकृत् ॥
निगूढहृयोनन्यभक्तेषु ज्ञापिताशयः ॥२३॥

पत्युः व्रतमिव नियम इव व्रत नियमो यस्याः सा पतिव्रता तस्याः पतिः । अनेनाचार्येषु यावंतो धर्माः पूर्वोक्तप्रकारेणानंतत्व साहित्येन परमानंदाग्न्यवयवात्मकाः रासाद्यनेकलीला संपादक धर्मविशिष्टास्तावद्धर्मवत्वमत्रापि ज्ञापितं भवति । यदि तावद्धर्मवत्वं तासु न स्या- त्तदाचार्याणामसमत्वेन तत्पतित्वमेव नोपपद्येत। अत एवास्मिन्प्रकटित मुखारविंद फलवह्निभाग्नि- मार्गे आगत्य स्वरुपांतर भजनादिकं तत्पतिव्रतत्वेऽपतिव्रतत्वमेव संपादक भवेहि । तदा यथा व्यभिचारिण्यास्त्रियास्त्याग एवोचितो लोके प्रसिद्ध तदपेक्षया लौकिके स्वयमलौकिकाचार्या स्तस्या स्त्यागमेव कुर्वन्ति केन हेतुना पतिव्रतापतिः नत्वपतिव्रतापतिरितिनियमात् स्वस्मिन्भगव- न्मुखारविंदरुपे व्रजवरघोषरत्न सीमन्तिनीनामेव पतिव्रतत्वं निश्चिन्त्य तासामेव स्वपतित्वं वेणु- द्वारादिभिः ख्यापयंत स्तथैव फलदानं कृतवंतः यत एतद्विमृश्यव स्वरुपांतर भजनादिष्वन्या- श्रयाष्वनुसर्तव्यमिति यावत् । (इदं श्री गोकुलनाथकृतं सर्वोत्तम स्वतंत्रलेखमुपक्रमोपसंहार रहितं समाप्तम् ॥)

सुर ठ्यामाट